हनुमानचिंतामणौ प्राद्ध्रवरत्नः

१२९५

त्वाद्विशिष्टज्ञानस्येति चेत् । श्रोत्रप्रत्येकपदानुभवजन्यसंस्कारमेलकादेकदैवतावत्पदस्मृतिः । तत एकदैव तावत्पदार्थस्मृतौ सत्यां वाक्यार्थानुभवः । न च त्वन्यविषयकसंस्कारेणान्यप्रस्मरणमिति वाच्यं । वाक्यार्थानुभावानुपपत्त्या फलबलेन संस्कारान्तरस्य सहकारेण तत्रैक स्मरणकल्पनात्प्रत्येकवर्णसंस्कारणामिव तत्वानन्यगतिकत्वा... स्मरणे । अथ यत्पदाकांक्षितं योग्यं संनिधानं प्रपद्यते तेन तेनान्वितः स्वार्थः पदैरेवाचगम्यते । न चैव... न्वयानुपसंनिधानेनस्याद्विरम्यव्यापाराभावादिति वाच्यं । एवमपि प्रथममनन्वये हेत्वनुपपत्त्यासात्... स्येदं साममर्थीवैकल्पेन पूर्वस्येति चेत् । अस्तु तावदेवं तथापि चरमन्तावत्पदार्थवटितवाक्यार्थानुभवे ऽक्तैव गतिरनन्यगतिकत्वात् । अत्र वदन्ति सन्निधिर्न शाब्दज्ञानेवान्वयबोधहेतुः । द्वारमित्यादावध्याहृतेनापिधानादिनान्वयदर्शनात् । न तु पिधेहीति शाब्द एवाध्याह्रियते । अत्र प्रयोगात् । अर्थस्यैवान्वयप्रतियोगित्वेनोपयोगित्वात् । आवश्यकत्वाच्च । अर्थापत्तेनुपपात्तकविषयत्वाच्च । न च शाब्दमात्रमुपपादकं । अपि तु तदर्थः । आवश्यकत्वार्थसाहचर्येणादेव... संपत्रशाब्दस्मृतेरन्यथासिद्धेः । अन्यथा पदबोधितस्यैवार्थस्यान्वयबोधकत्वमिति नियमशक्तिकल्पनापत्तेः स्वार्थान्वयपरत्वा

श०मू० छद्वानां द्वारमिति न पिधानान्वयबोधकमिति तदर्थं न्वयबोधार्थमवश्यं शब्दकल्पनमिति चेत्‌ न । लक्षणाया व्यभि
१४ चारात्‌ । तवाप्याक्षिप्तेन कर्त्रान्वयबोधाच्च । अथ द्वारपदसहभावमात्रं पिधेहि शब्दस्य कल्पने लाघवात्‌ न व
14 पिधानाभिधायकानेकशब्दोपस्थितौ विनिगमनाविरहः । संस्कारतारतम्यात्‌ । पदविशेषस्य स्मृतिरिति चेन्न
। आकांक्षादिमत्प्रतियोग्यन्वितस्वार्थपरत्वस्य कॢप्तत्वात्‌ । लाघवेनार्थाध्याहारात्‌ । न चाश्रुतपदानि लक्ष
प्रयोजनकानीति कथमध्याहृते तेषां तात्पर्यमिति वाच्यं । श्रुतार्थान्वयानुपपत्त्याध्याहृते तात्पर्यात्‌ ॥ कथं त
र्ह्योदनं पचतीत्यत्र समभिव्याहृतमात्रान्वयः । कलायादेरपि स्मृतत्वादिति चेत्‌ । तात्पर्यानियमादित्यवे
हि । यत्परः शब्दः स शब्दार्थः । अन्यथा तवापि दैववशात्स्मृतकलायपदोपस्थापितेनान्वयबोधः
स्यादिति । अथ देवदत्तौदनमित्यादिवाक्ये क्रियापदाध्याहाराभावेन कर्मकर्तुरणभिधानात्‌ । तृती
यास्यादिति चेन्न । अध्याहृतपचतिपदेनापि कर्तुरणभिधानात्‌ केन संख्याभिहितेति चेन्न । देवद
त्तस्य पाक इत्यत्रापि तृतीयापत्तेः । तात्पर्यतस्तत्र व्यवस्थितिरिति चेत्‌ । तुल्यं ननु द्वारं पिधेहीत्यादौ । श०म०
पिधानस्य शब्दानुभवे पिधानोपस्थापकपदत्वेन जनकत्वमिति चेन्न । अन्वयप्रतियोग्युपस्थाप १४

कपदत्वेन जनकत्वात् । न तु तद्रूपव्यापकयावत्पदत्वेन गौरवात् । एवं पिधानाद्येपि । अन्यथा गोणात्वा ज्ञानि
कयोरन्वयबोधो न स्यात्त्रयोरणानुभावकत्वादिति ऽच्यते । क्रियापदोपस्थापिता क्रियाकारकपदोपस्था
पितं च कारकं परस्परमाकांक्षते । न चोपस्थितिमात्रं । अन्यथाध्याहारं पिधानं करोतीत्यत्रापि क्रियाकर्मा
ध्याहारादिवान्वयबोधप्रसंगः । क्रियायाः कर्मणश्चोपस्थितेस्तुल्यत्वात् । एवं विधपदोपस्थितेः परस्प
रमाकांक्षा नास्तीति चेन्न । स्वैकांक्षायां पदविशेषोपस्थितत्वं तंत्रं । न तूपस्थितिमात्रं । अर्थविशेषे असा
धुत्वान्नात्रान्वयबोध इति चेन्न । पिधेहीति पदं विनाद्वारमित्यस्याप्यसाधुत्वात् । तदर्थयोगे साधुत्वस्य
तुल्यत्वात् । साधुत्वज्ञानस्यान्वयबोधप्रयोजकत्वाच्च गौरवात् । अपभ्रंशादन्वयबोधाच्च । न चात्र संस
र्गाग्रहो बाधकाभावात् । तस्मात्क्रियापदस्य कारकपदेन कारकपदस्य क्रियापदेनान्वयबोधकत्वं । तत्विकं
चिना परस्य । अपि च सकर्मकक्रियापदयोगं विना द्वितीयानुपपत्तिः । न हि क्रियापदार्थे द्वितीयाप
दार्थयोगे द्वितीयाब्रह्मानयनं करोतीत्यत्रापि द्वितीयापत्तेः । तथा पुष्पेभ्य इत्यत्र स्पृहयतिपदाध्या
हारं विना चतुर्थ्यनुपपत्तिः । यदि च स्पृहयतिपदार्थयोगे चतुर्थी तदा पुष्पमिच्छतीत्यत्रापि स्यात् । अस्य

श्री·सू·
१५

हयतिरूच्छतिपदयोरेकार्थत्वात्। अथ साधुत्वार्थं द्वारं पुष्येभ्य इत्यत्रापि चेहि स्य हयतिपदाध्याहारोऽनुमन्य
ते। नत्वन्वयबोधार्थं तस्यान्वयप्रतियोगिज्ञानादेवोपपत्तेरिति चेत्। तर्हि क्रियापदयोगं विनाऽकारकविभ
क्तिः। कारकपदयोगं विना न तदन्वययोग्यं क्रियापदमिति केवलकारके क्रियापदाध्याहारः। केवलक्रिया
यां च कारकपदाध्याहारः। साधुत्वार्थमावश्यक इति तज्जन्यैवोपस्थितिरन्वयबोधोपयिकी। तस्मात्क्रियाकारक
पदोपस्थापितयोरेव परस्परं तत्तत्क्रियाकारकयोः परस्परमन्वयबोध इति शब्दाध्याहार एव कर्तव्ये पेतस्तु नुव
न्या मैवं। तात्पर्याधीनं शाब्दप्रामाण्यं तत्र तात्पर्यत्वं न तत्साध्यकत्वं पदार्थतत्संसर्गयोः शाब्दसाध्यत्वात्। अर्थवादो त
च प्रवृत्तिनिवृत्तिसाधुत्वात् [illegible] त्वात्तत्र प्रवर्तकत्वं तत्प्रवर्तकत्वं च तत्परत्वमिति पौरुषरीत्याश्रयात्। लाक्षणिकस्या र
ननुभावकत्वेपि लक्षणीयपरत्वात्। काव्यादेः स्वरूपाख्यानमात्रपरत्वेऽपि पर्यवसानाच्च। ननु तद्बुद्धिज
नकत्वं तत्परत्वं। प्रशंसानिन्दावाक्यमपि प्रशस्तनिंदितमु स्वार्थधीहेतुत्वेन तत्परमेव तच्च ज्ञानं प्रशस्ते सर्वः प्रव
र्तते निंदिताच्च निवर्तते इति स्वविषये प्रवृत्तिनि[illegible]जनयतीति तत्परमुच्यत इति चेत्। न गौणत्वात् लाक्षणिकयोरन एम॰
नुभावकत्वात् तद्बुद्धिजननेन तत्परत्वमित्यनैन्याश्रयाच्चात् ज्ञाने [illegible] गपत्वमिति चेत्। तर्हि एकत्रावारणे नानार्थे नानार्थ १५ नयो

पकत्वं तत्परत्वं· तत्र भाव्यार्थस्य साक्षात् प्रकृतार्थस्य तु प्रशंसानिंदावाक्यस्य प्रशस्तनिंदितस्वार्थप्रतिपादनद्वारा· लाक्षणि
कस्य लक्षणीयविषयप्रवृत्तिनि[illegible] नयि ५

नहितज्जातीयंस्वश्चैतंत्रपुरुषप्रणीतमस्ति। अथ स्वतंत्रकृतवेदजातीयं स्वतंत्रपुरुषप्रणीतमित्यनिर्द्धारितविशे
ति षंसाध्यं जीवीक्कचिदस्तीवदितिचेन्नाप्यमानभारते व्यभिचारात्। अथार्थप्रतीत्यतदर्थपरतयाप्रतिसंधीयमा
नपदत्वं पौरुषेयत्वं तस्य प्रथममावश्यकत्वात्। अथैवंभूततएवानुच्चरितोपिमोनिश्लोकः पौरुषेय इतिचेन्न। अ
न र्थज्ञानवताध्यापकेनसिद्धसाधनात्। अन्यथाप्यधमोवेदभास्ताभ्यांव्य[redacted]भिचारात्। अतएववेदत्वं स्वतंत्रपुरुष
प्रणीतवृत्तिवाक्यवृत्तिधर्मत्वाद्भारतत्ववदितिचेन्निरस्तं नेस्वतंत्रप्रणीतत्वं हि वाक्यार्थगोचरयथार्थज्ञानविव्याप
यिषयोच्चारणंत[redacted]पाचतथाविधाध्यापकेनसिद्धसाधनं। एतेनवक्तृत्वानुवक्तृत्वयोर्भेदस्यलोकसिद्धत्वात्। स
वक्तृकत्वंसाध्यमितिनिरस्तं। नापिसजातीयोच्चा[redacted]रणानपेक्षोच्चारणं पौरुषेयत्वं पक्षमानवेदेबाधात्। भार
तेव्यभिचाराच्च। उच्यते। शब्दतदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमितिविषयार्थकत्वे सति शब्दजन्यवाक्या
र्थज्ञानाजन्यप्रमाणशब्दत्वं वेदत्वं। ईश्वरप्रमाया अजन्यत्वात्। वेदार्थस्यानुमानादिविषयत्वेप्यनुमानादेर्वे
ना दोपजीवकत्वात्। स्मृतीनां भारतादिभागस्य च वेदसमार्थत्वेपिशब्दजन्यत्वात्। वेदार्थप्रतीत्यतत्स्मरणयनात्सजा धीजन्य
तीयोच्चारणानपेक्षो[redacted]च्चरितजातीयत्वं पौरुषेयत्वं। आद्यभारतेपितज्जातीयत्वान्नव्यभिचारः। अथवावेद

प्रा॰म॰
१८

16

त्वसजातीयोच्चारणानपेक्षोच्चारितत्वं पौरुषेयत्वं ... रिततन्निप्रमाणतावच्छेद
कवाक्यधर्मत्वात्। स्मृतित्ववदिति। यद्वा वेदाः शब्दजन्यवाक्यार्थगोचरयथार्थज्ञानजन्याः प्रमाणशब्दत्वात्।
भारतवत्। न च पठ्यमानवेदे बाधो भारते मन्वादिस्मृतौ च व्यभिचारः। तेषां द्विकर्तृकत्वात्। तादृशज्ञान
जन्यजातीयत्वं वा साध्यं तत्राप्यतदभावादेव वेदे अपौरुषेयत्वव्यवहारः। नन्वप्रयोजकमिदं वाक्यार्थगोचर
यथार्थज्ञानपूर्वकत्वमेव शब्दप्रामाण्ये तंत्रं न तु तादृशज्ञानस्य प्रमाणजन्यत्वमपि गौरवात्। अन्यथा वेदेपि तद
द्विकर्तृकत्वेन प्रामाण्यं स्यात्। लोके तथादर्शनात्। एवं चानादिमीमांसासिद्धन्यायेनावगततात्पर्यात् वे
दादर्थप्रतीत्यपूर्वं पूर्वाध्यापकेनोच्चारितात् वेदादुत्तरोत्तरस्याध्ययनतदर्थप्रतीतिरित्यनादितैवास्त
तः किं स्वतंत्रपुरुषेणैतत्प्रयोजनस्य परतंत्रादेव सिद्धेः। किंच पूर्वकालो न वेदशून्यः कालत्वात्। वर्त्तमा
नकालवत्। न चांशे बाधः अंशे चाप्रसिद्धिः। अंशत्वेनानुपादानात्। पूर्वकालो न वेदशून्य इत्युद्देश्य
प्रतीतेरसिद्धेर्नीयतः सिद्धसाधनं। तथा पूर्वकालीनं वेदाध्ययनं गुर्वध्ययनपूर्वकं अध्ययनत्वात्। प्रा॰म॰
इदानीन्तनाध्ययनवत्। न च लिप्यनुमितवेदाध्ययने व्यभिचारः। लिपेरप्यवैयौनपूर्वकत्वात्। न चैवं भारत। १८

य१

नेकार्थान्वयबोधपरत्वेऽवृत्तिद्वयविरोधस्यदोषत्वेऽपि भाषापत्तेः यत्रमुख्यार्थधीप्रत्वेनप्रथममन्वयबोधानंत
रत्वाद्वृत्तिकाश्चैन्वयबोधस्तत्रावृत्तिरेवातस्माद्युगपत्तात्पर्यग्रहेसतिनावृत्तिः। किंत्वनेकार्थपरत्वेसत्येवय
त्रतात्पर्यबोधक्रमादन्वयबोधक्रमस्तत्रावृत्तिः। प्रथमोच्चारणस्यपर्यवसितत्वादितिलोके स्फुटत्वाद्वेदेपीदं
तात्पर्यमितितस्यापौरुषेयत्वात्। अत्रमीमांसकाः। यथोच्चारणएकत्वात्दुच्चारणंवेदेपरंतंत्रंतथातात्पर्यमपि
तात्पर्यएवैकमेवेतिपरंतंत्रंनतुकस्यापिप्रथमंतात्पर्यमनादित्वात्। एवंएवंवाक्यार्थज्ञानेच्छयोच्चा
रणमुपजीव्याग्निमाग्निमस्यतदिच्छयोच्चारणात्। तदिच्छयातदुच्चारणमेवहितत्परत्वंलोकवेदसाधारणंसाचे
च्छास्वतंत्रापरतंत्रावेतिनकश्चिद्विशेषः। तदवधारणंचानादिमीमांसाधारापरिशोधितन्यायाद्वेदस्तुभय
वादिसिद्धं अतस्तात्पर्यानुरोधान्नवेदस्यपौरुषेयत्वेनन्वर्थज्ञानं विनोच्चरितवेदात्कथमर्थधीर्वाक्यार्थज्ञानं
विनातस्यतीतीच्छयोच्चारणभावात्प्रतिपुरुषमुच्चारणभेदाद्धितिचेन्नहि पठ्यमानभारतादपितथाभूतार्थधी ८
नस्याद्व्यासेनयदिच्छयायदुच्चारणं कृतंतज्जातीयत्वादर्थज्ञानंविनापिपठ्यमानाद्भारतादर्थधीरितिचेन्नहि
वेदेपितुल्यंतत्तात्पर्यकजातीयत्वस्यनियामकत्वात्। अन्यथापठ्यमानवेदान्नवाक्यार्थधीनस्यात्। ईश्वरा

चै ३ः

शा॰ मू॰ प्रणीतत्वात्। अथ वेदः पौरुषेयो वाक्यत्वाद्भारतवदिति चेत्। को वेदः। अनुगतधर्माभावेन तस्य शाखासु स्ता
१७ नानार्थत्वात्। तथा हि नमुचं एव वेदपदप्रयोगविषयो वेदः। अनुव्याप्योक्तकथनात्। नापि शाखासमुदायः। स्ता
तस्य वेदनिरूप्यत्वात् समुदायस्याप्रतिपादकत्वेन वाक्यत्वासिद्धेश्च। नापि स्वर्गकामादिवाक्यं स्मृतिभारता
17 दौ पठितत्वात्। नापि संदिग्धकर्तृकवाक्यं वादिनो निश्चयात्। बाधानुमानयोस्तुल्यत्वेन मध्यस्थस्य संश
य इति चेत्। तर्ह्यनुमानाभ्यां तस्य संशयो मध्यस्थस्य संशयप्रमानंतरं चानुमानमित्यन्योन्याश्रयः। नापि विवादा
ध्यासितं वाक्यं। अनुगतधर्मं विना विवादपदस्याप्यभावात्। भारतादावपि तत्संभवाच्च। नापि महाजनानां वेद
व त्वेनानुगतव्यवहारात् वेदत्वं जातिः। देवदत्तीयत्वानुमापकशब्दजातिभिः संकरप्रसंगात्। किंच पौरुषे
यत्वं न तावदर्थधीजन्यत्वं तदुच्चारणधीप्रभवत्वं वा। अव्यापकतदुभयजन्यत्वेन सिद्धसाधनात्। नाप्युच्चारण धी
स्य सादित्वं प्रत्युच्चारणं सादित्वात्। नापि स्वतंत्रपुरुषप्रणीतत्वं पठ्यमानवेदभारतयोस्तदभावात्। तज्जातीयं स्वतं
त्रपुरुषप्रणीतमिति चेत्तर्हि पठ्यमानभारतं व्यासस्य न ममेति कथं स्यात्। स्वातंत्र्यं च यद्युच्चारणव्यक्तौ तदा ममापि यदात णम॰
पुरुष दुच्चारणसामान्ये न व्यासस्यापि। किंच स्वतंत्रप्रणीतजातीयत्वं यदि साध्यं तदा घ भारते स्मृतौ च वाक्यत्वमनैकान्तिकं १७

पातां४

वेद ध्ययनमपि तथा स्यात् । तस्य भारतादेर्व्यासादिकर्तृकत्वेन कथनादिति । उच्यते । वेदप्रामाण्याधीनं तत्प्रामाण्य
र मित्यात्माश्रयः । न च एवं वेदप्रामाण्याधीनमुक्तोऽन्नं वेदप्रामाण्यमिति व्यक्तिभेदमादाय नात्माश्रय इति
वाच्यम् । एवं तत्सर्वस्यापि तत्पूर्वप्रामाण्यात् प्रामाण्यमित्यनवस्थानात् । अनादित्वाद् यमदोष इति चेन्न । मू
मा लभूतप्रत्यक्षप्रमाणान्तराभावाद् अपर्यवसानात् । स्वतः प्रमाणं वेद एव वेदे सर्वत्र मूलमिति चेन्न । सर्वेषामेव पर्यवे
दापेक्षत्वेन स्वतः प्रमाणत्वाभावात् । अत एवाचारात् । स्मृतिः । एवमाचारादौ तत्र विश्वासबीजपरानपेक्षमूलभू स्मृते
तप्रमाणाभावाद् अपर्यवसानभयेन तत्र वेदमूलत्वकल्पना । अनादिमहाजनपरिग्रहादनादिवेदप्रवाहप्रा
माण्यावधारणेऽपि तन्निर्वाहके तदनपेक्षमूलभूतप्रामाण्याभावेनानाश्वासबीजपरानपेक्षैवा । अन्यथा हे
मूलकत्व स्मृत्याचारयोरप्येवं प्रामाण्यावधारणे प्रमाणान्तरकल्पना न स्यात् । तस्मादाश्वासबीजपरानपेक्षस्वारप्रेत त्य
मूलकत्वादेव वेदस्य प्रामाण्यं महाजनपरिग्रहेऽदव धार्यते । एतेनानुमानमपि निरस्तम् । मूलभूतप्रत्यक्षं
विना वेदप्रामाण्यानुपपत्त्या साध्याभावसिद्धौ बाधात् । ननु वेदो न पौरुषेयः स्मर्यमाणकर्तृकत्वादिति बा
बो धकमस्त्विति चेन्न । कपिलकणादगौतमैस्तैश्शिष्यैश्चाध्यापयद्भिर्वेदे सकर्तृकत्वस्मरणस्य प्रतीयमानत्वा

त१

१९ त्तान वक्तृत्वमूलभूतानुभवाभावात्स्मरणानुपपत्तिः। पौरुषेयत्वानुमानादेवानुभवात्। स्मरणमेव बाधकमिति चेन्न अ
। एवं सत्यस्मरणानुभवयोरन्योन्याश्रयात्। अथैतदर्थं स्मरणाभावेपि प्रमाणान्तरस्यानुभावकत्वात्। न हि भाविस्म
18 रणमपेक्ष्य प्रमाणमनुभावकं। तस्मात्तपस्तेपानाच्चत्वारो वेदा अजायन्त ऋचः सामानि जज्ञिरे इति कर्तृश्रवणाच्च प्र
तिमन्वन्तरं चैषां श्रुतिरन्या विधीयत इत्यादिकर्तृस्मरणाच्च पौरुषेयत्वे बाधकं विना अर्थवादमात्रे स्वस्य वक्तुमश
क्यत्वात्। स्वयंभूरेष भगवान्वेदो गीतस्त्वया पुरा। शिवाद्या ऋषिपर्यन्ताः स्मर्तारोऽस्य न कारका इति महाभागवते पु त
राणीयवाक्यस्य श्रुतिविरोधेनान्यत्र तात्पर्यात्। न च कार्यपरमेव प्रमाणं कर्तृस्मरणस्य सर्वत्राविरुद्धार्थत्वात्। सक
र्तृत्वार्थवादस्य स्वर्गो नरकं स्यार्थवादस्येव ईश्वरमुपासीतेति विधिविशेषत्वाच्च साधयिष्यते सिद्धार्थस्य प्रामा
भ्रम ण्यं न चैवमानं दोषी श्वरे तत्र मानान्तरविरोधात्। पुरुषस्य प्रमादैर्भूयिष्ठत्वेन वेदे नाश्वास इति चेन्न। धर्मिग्रा दि
हकमानेन नित्यसर्वज्ञत्वेन सिद्धेस्तत्र दोषाभावादिति। ननु तथापि प्रयोजकं पौरुषेयत्वानुमानं नित्यनिर्दोष
त्वेनैव तत्प्रमाणत्वोपपत्तेरिति चेन्न। वर्णानां नित्यत्वेन तत्समूहस्य सुतराम नित्यत्वात्। न च तदसिद्धा तथाहि पि०
वर्णात्मकः शब्दो नित्यः समवेतत्वे सति उत्पत्तिमत्वात् घटवत्। न च हेत्वसिद्धिः उत्पन्नो गकारो हृद्धो ऽत्पद्यमा १९

परत्वं लक्षणैर्णां च मुख्यार्थपरत्वं स्यात् । योग्यतासत्त्वात् । नापि तत्प्रतिपादकत्वं तात्पर्यं विनानन्तर्येत्यन्योन्याश्रयात् । प्रशं
सादिवाक्यस्य प्ररस्याद्यप्रतिपादकत्वात् । लाक्षणिकस्याप्रतिपादकत्वाच्च । अथ गंगापदं स्वार्थं विना वितीरं प्रति भा
पादयत्तत्परमिति चेत् । न मंचाः क्रोशंतीत्यत्र तेन विनापि पुरुषे तात्पर्यात् । गंगादिपदं मत्स्यादिपरं मुख्ये तीरपरं च
स्थ्या स्यात् । अविनाभावस्य तादवस्थ्यात् मुख्ये वाधके सतीति चेत् तर्हि मुख्यार्थपरत्वेन स्यात् । न स्याच्छ्रजद्वै छसीत्यत्र ग ग
मनाभावपरत्वात् । उच्यते । तत्प्रयोजनकत्वं तत्परत्वं तदर्थप्रतीतिः प्रवृत्तिनिवृत्ती च प्रयोजनकत्वं न साध्यत्वं अन्योन्या
श्रयात् । नापि प्रतिपाद्येच्छाविषयत्वं यस्य यदिच्छाविषयः तत्प्रतीतिपरत्वापत्तेः । तदर्थसाध्यत्वेनेच्छानियम इति चेत्
न । रहदधूमरूतज्ञातस्य तात्पर्यभेदेन साध्यस्य बहुविधतया वाक्यभेदप्रसंगात् । पुंभिरिच्छया नियंतुमशक्यत्वात् । किंतु
प्रतिपादकेच्छाविषयत्वं मुख्यार्थस्य सात्ताद्भूतार्थस्य तु प्रशंसानिंदावाक्यस्य प्रशस्तनिन्दितस्वार्थप्रतिपादनद्वा
रा लक्षणिकस्य शब्दस्य लक्षणीयविषयप्रवृत्तिनिवृत्तिजनकत्वं तत्परत्वमिति चेन्न । तात्पर्येण ज्ञानं जनयितव्यो यः
शब्दो वक्त्रा यदिच्छया प्रयुक्तः स तत्परः । सा चेच्छा प्रतिपाद्यधीप्रवृत्तिनिवृत्तिविषया इति तत्परत्वं । नानार्थात् ।
श्लिष्टादनेकपदार्थान्वितैकक्रियापदान्मुख्यलाक्षणिकपराद्वा वृत्त्या क्रमेणानेकार्थज्ञानं न त्वेकदैव । सकृ
दुच्चरितस्य सकृदर्थपरत्वनियमेनैकदैव तत्रोच्चारणेऽनेकपरत्वाभावादिति सकलतांत्रिकैकवाक्यतया वदन्ति

घटपतेच्चारण वृ॥५

श०मू० अत्र ब्रूमः। अनेकार्थप्रतीतीच्छया एकमुच्चारणं भवत्येवापुमिच्छया नियंतुमशक्यत्वात् यद्विच तदुच्चारणं नाने
१९ कार्थपरं तदावृत्तिरपि न स्यात् तात्पर्यनिर्वाहार्थमावृत्तिकल्पनात् अन्यथैकपरे पि तदापत्तेः अत एव तदुच्चा
रणस्योभयपरतायां नावृत्तिकल्पना तस्मात्तुल्यवदनेकार्थोपस्थितौ तात्पर्यादित्ताने युगपदेवान्वयबोधो नेका
19 भवति सामग्र्यास्तुल्यत्वात् प्रथममेकस्यान्वयबोधो न तदन्यस्येति नियंतुमशक्यत्वात्। अविवादाध्या
कमे सितमंत्रपदोच्चारणं एकदा एकशक्तिविषयमेवानुभावयति एकपदोच्चारणत्वात् यद्वा एकत्रोच्चारणे
नानाशक्त्या नानार्थाननुभावकं नानार्थत्वादेकपरनानार्थपदवदिति चेन्न। अनेकानुभवसामग्रीसत्वेन
बाधितत्वात्। सामग्रीविरहस्योपाधित्वाच्च। अत एवात्तमानयेत्युक्ते भिन्नप्रकरणादिनाभिन्ने तात्पर्यप्रमा
घ यां भूमेवाप्रतिपर्याये एकदैवावृत्तिं विनानेकार्थप्रतीतिर्न तु जत्रैकाविलंबते। एवं द्वंद्वं पटं चानयेत्यत्रानयन
पदस्योभयपरत्वे एकदैवान्वयबोधो नत्वावृत्तिः। वाक्यभेदस्त्वर्थभेदान्न त्वानभेदात्। गंगायां जलं घोषश्च
वसतीत्यत्र गंगापदस्य तात्पर्यवशात् युगपत्तीरयोरेकपदोपस्थितौ जलघोषयोरेकदैवान्वयबोधः। न च यु
गपद्वृत्तिद्वयापत्तिरिष्टत्वात् तात्पर्याद्धि वृत्तिः। न तु वृत्त्यनुरोधात्तात्पर्यं। गौणलाक्षणिकयोर्नुरोधापत्तेः। ग्म०
तृ तात्पर्यनिर्वाहार्थं तयोर्वृत्तित्वेन कल्पनामुख्यला[illegible]क्षणिकयोरेकैकमात्रपरत्वे युगपद्वृत्तिद्वयविरोधः। अत्र १९

स्रवा ३

नोस्तिकोलाहलइतिप्रत्ययात्।नचव्यंजकाभावात्एषुमांप्रागनुपलब्धस्यैवोपलब्धिमात्रंतस्योत्पन्नोगकारइ
तिप्रत्ययात्नचायमौपाधिकः।अन्त्योत्पत्तावगृह्यमानायामपितदनुभवात्।नचस्मर्यमाणारोपोबाधकाभावा
त्।अन्यथाघटोत्पत्तिरपिनसिद्ध्येत्।ननुश्रोत्रानुविधानात्परंश्रणोमीत्यबाधितानुव्यवसायाच्छ्रोत्रादन्येनगृ
हीतुमशक्यत्वात्।श्रोत्रग्राह्यैवानुपूर्वीसाचघसमानप्रागभावप्रतियोगित्वंटस्येतिप्रागभावप्रतियोगित्वमु
त्पन्नत्वंवर्णस्यप्रत्यक्षमिति।तन्नघज्ञानानन्तरंज्ञानविषयत्वंटस्यानन्तर्यंतयोरानुपूर्वीसाचमनसैवगृह्यते।
घटपटज्ञानयोरिवतदुपनीताचश्रोत्रविषयः।ननुसएवायंगकारइतिप्रत्यभिज्ञानबाधितमिदमित्येकेकागका
रादिव्यक्तयः।यद्यपिप्रत्यभिज्ञायानित्यत्वंनविषयः।तथापिविनाशकत्वाभिमतशब्दान्तरादीनामन्तरासंभवेपिता
वत्कालीनतांगकारस्यगृह्णातीचितावत्कालंस्थिरश्चैनंकःपश्चान्नाशयिष्यतीतिपराभिमताशुतरविनाशित्वव्या
तिरेकोनित्यतायामेवपर्यवस्यति।नचधर्मि[illegible]गोगकारस्यभेदेप्येकजातीयत्वेनप्रत्यभिज्ञा।तथासतितज्जाती
ययमितिस्यात्।ननुसएवायमिति।अथतारत्वमन्दत्वविरुद्धधर्माध्यस्तविषयत्वेनसानप्रमाणंनचतारत्वादीनांस्वा
भाविकत्वंविरुद्धत्वंचासिद्धं।मन्दस्तारोगकारस्तारोनमन्दोन्यइत्यनन्यथासिद्धप्रत्यक्षात्तत्सिद्धेः।नत्स्यपिशैत्यद्रवत्वे
स्वाभाविकेईत्यत्रप्रत्यक्षात्त्र्यस्त्रमाणात्किंपःतद्रूजत्वेनभासतेसतसतद्धर्मएवतत्प्रासतिरक्तःपटोलोहितःस्फटि

प्र॰म॰
१०
20

करुत्वादावपि तथास्यादविशेषात् दिति चेन्न । न रक्तत्वादीनामन्यधर्मत्वस्थितौ स्फटिकादीनां च तद्भिन्नधर्मत्वस्थि
तौ जपाकुसुमादेरन्वयव्यतिरेकानुविधानाद्बाधेन तत्र भ्रान्तत्वात् । न चेह तारत्वादेरन्यधर्मत्वे स्थितिर्न्नापि गकारादी
नां तद्भिन्नधर्मत्वं । नाप्यन्यस्य तारत्वादिधर्मिणोनुविधानं न चावश्यस्वीकृतवायोरेव धर्मास्तारत्वादयो गकारादि
गतत्वेन भासंत इति वाच्यं । स्पर्शाग्रहे त्वचो व्यापाराभावेन त्वचातद्ग्रहात् । न च श्रवसा तद्ग्रहः । श्रवायवीयत्वेन वा
युमात्रधर्मग्राहकत्वात् । चक्षुर्वत् । तारत्वादयो न वायुधर्माः श्रावणत्वात् कादिवत् । वायुर्वा न श्रवणमात्रग्रा
ह्यधर्मो मूर्त्तत्वात्परवत् । अत एव तारत्वादयो न वायुधर्माः ध्वनिधर्मा वायुधर्मस्य ध्वनेरग्रहात् । न च ध्वनिरूपः
शब्दो नभोवृत्तिरेव तथा सति तद्धर्मतारत्वादिग्रहः श्रवसेति वाच्यं । तारो गकार इत्यत्र ध्वनीनामस्फुरणात् । त
त्कारणाभावाच्च । न च व्यक्त्या विना जातिस्फुरणं तस्या व्यक्तिसमानसंवित्संवेद्यत्वात् । न च स्मर्यमाणतारत्वाद्या
रोपो बाधकाभावात् । प्रथमतस्तारत्वाद्यग्रहणप्रसंगाच्चेति । मैवं तारत्वादयो न गकारादिजातयः । गत्वादिना सांक
र्यप्रसंगात् । न च नानैव तारत्वं तारकारानुगतप्रत्ययाभावप्रसंगात् । न च सज्जातीयसाक्षात्कारप्रतिबंधकतावच्छे
दकशब्दवृत्तिजातित्वेन नानातारत्वेष्वनुगमः । तदप्रतिसंधानेपि तारत्वाकारानुगतप्रत्ययात् । तारत्वमन्दत्वे वा नश राम॰
ब्दवृत्तिजातीसप्रतियोगिकत्वात् । नापि तारत्वमन्दत्वयोर्विरोधः । य एव गकारस्तार आसीत् स एव मन्द इदानीमिति

समयभेदेनवक्रभेदेनचतयोरेकत्रप्रतीतेः।तारोयंनतारतरस्तारान्मन्दोन्यइतिभेदप्रतीतिरस्तीतिचेत्।धर्मिणोरभेदेन
वक्रभेदेनचतयोरेकत्रप्रतीतेः।तारोयंनतारतरस्तारान्मन्दोन्यइतिभेदप्रतीतिरस्तीतिचेत्।धर्मिणोर्भेदेभासमानेवि
शिष्टधर्मिभेदप्रतीतेर्द्धर्मभेदविषयत्वात्।एकत्रलोहितोयंनश्यामइदानीमितिप्रतीतिवत्।नवतीव्रेणगकारेण
मन्दगकाराभिभवात्।तयोर्भेदः।नहितदेवतदभिभावकंतस्यैवतेनैवतदैवग्रहणाग्रहणयोर्विरोधादितिवाच्यं।तार
त्वव्यंजकवायोर्बलवत्त्वेनमन्दत्वव्यंजकवाय्वभिभवात्।मन्दत्वस्याग्रहणात्।नवतीव्रेणगकारेणमन्दगकाराभिभ
वात्।तयोर्भेदः।नहितदेवतदभिभावकंतस्यैवतेनैवतदैवग्रहणाग्रहणयोर्विरोधादितिवाच्यं।तारत्वव्यंजकवायो
र्बलवत्त्वेनमन्दत्वव्यंजकवाय्वभिभवात्।मन्दत्वस्याग्रहणात्।संतुतारमन्दत्वस्याभिन्नाएवगकाराः।तत्रत्यभिज्ञा
नेबाधकाभावात्।तस्माद्वायुधर्माएवतारत्वादयः।शब्दगतत्वेनभासन्ते।आदर्शधर्माइवमुखादौ।तद्ग्रहणंचस्प
र्शस्यपुरस्कारेणकर्णशष्कुलीत्वगिन्द्रियप्रयोगेनतारमन्दजनकवायूनांत्वयाप्युत्कर्षापकर्षस्योद्भूतस्पर्शस्य
वशीकारात्।श्रोत्रेणैववाचक्षुरादेर्यत्रवायुधर्मग्रहणंतत्राप्ययोग्यत्वमुपाधिः।अन्यथाश्रोत्रेणस्वगुणोनगृह्येत
।नइन्द्रियेतरस्यतथादर्शनात्।चक्षुर्वानपार्थिवंरूपग्राहकमपार्थिवेन्द्रियत्वात्।रसनवदित्याद्यपिस्यात्।अथयोग्ये
योग्येनगृह्यतेस्वगुणः।परगुणोवायोरप्यतोचफलबलेनकल्प्यते।तर्हिश्रोत्रस्यापिवायुधर्मग्रहेतुत्वंनचतारोग

श·मू·
१९
21

कार इत्यत्र वायोः प्रतीतिः। न चावायुशब्दयोस्त्वचा [illegible] श्रोत्रेण वा ग्राहकेन तादात्म्ये गकार इत्याद्यारोप इति चेत्। एकमये
न्द्रियग्राह्ययोः संसर्गाग्रहात् संसर्गव्यवहारः। अस्तु वा त्वगिन्द्रियोपनीत एव श्रोत्रेणारोपः। श्रोत्रेणैव वा तादात्म्यग्रहोपीत्यु
र्क उत्पत्तिमत्त्ववासिद्धं तत्प्रतीतेः। अन्यत्र पूर्वो यं गकार इति प्रत्यभिज्ञानेन बाधितत्वात्। ननु प्रत्यभिज्ञैव तद्याबाधि
ता गत्वजात्योपाधिको भेदप्रत्ययो गकारे संभवतीत्युक्तमिति चेत्। न गत्वजातेरसिद्धेः। भेदे भासमाने त्वभेदप्रतीतिर्व
तिमात्त्वचितात्। न च गकारे भेदप्रतीतिरस्ति। तारत्वमन्दत्वे अपि न भेदे हेतू स एव तारः स एवेदानीं मन्द इति प्रत्यभिज्ञा
नात्। गकारानित्यत्वेपि तथा संभवतीति चेत्। तर्हि नित्यत्वेपि करणकुलीत्वगिन्द्रियोपनीतवायुधर्मोत्पत्तेरुपाधि
त्वं संभवति। न च वायोः प्रतीतिः उत्पन्नत्वेनैव तत्प्रतीतेः। लोहितत्वेनैव जपाकुसुमस्फटिके। अस्तु वा प्रागनुपल
भ्यमानत्वेनोत्पन्नसादृश्येन स्फुटोत्पत्तिमत्त्वारोपः। न चैवं घटपटादावपि नोत्पत्तिः सिद्ध्येदिति वाच्यं। कुलालव्यापा
रानन्तरमनुभूयमानघटस्य तद्व्यापारात् प्रागनुभूयमानघटेन नाभेदो भासते किन्तु भेद एवेति तत्र प्रागसत्त्वसिद्धेः
ति। गकारे उत्पत्तिप्रतीत्यनन्तरं कंठताल्वादिव्यापारात् पूर्वमनुभूयमानगकारेणाभेदप्रत्यभिज्ञानात्। दीपवत्तस्य
व्यंजक एव। अथ शब्द उत्पद्यते उत्कर्षवत्त्वे सत्यपकर्षवत्त्वात्। माधुर्यवत्। अत एवानित्यत्वमिति चेन्न। तारत्वमंदत्वयो रम०
रुत्कर्षापकर्षयोर्गकारे पूर्वन्यायेनासिद्धेः। सिद्धौ वा जातिसंकरभयेनोत्कर्षापकर्षयोर्जात्योः शब्दत्वसत्त्वव्याप्ययोरत्र १९

प्रत्यक्षत्वं च समवायघटध्वंसवत् ॥ ननु विनाशाग्रहे शब्देयोग्यस्यापि प्रत्यक्षत्वं तत्र ॥ धर्माधर्मा आत्म

न्नेनानित्येन शब्दस्य साधारण्याभावात् । अत एव सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकसामान्यमुत्कर्षः । तत्प्रतिबन्ध
साक्षात्कारविषयतावच्छेदकसामान्यमपकर्ष इति साधारणो हेतुरुपास्तः । तारत्वादेर्गकारजातित्वासिद्धेः । साधनावच्छि
न्नसाध्यव्यापकस्य मूर्तगुणत्वस्य श्रोत्रत्वस्य चोपाधित्वादप्रयोजकत्वाच्च न हि कारणाधीन एवोत्कर्षोपकर्षश्च
परममहति परमाणौ च परिमाणे प्रत्येकं सत्त्वात् । न चोभयस्यैकत्र सत्त्वं कारणप्रयोज्यं एकैकवत् द्वयोरपि प्रत्येक
मेकत्वात् । स्यादेतत् । श्रोत्रव्यापारानन्तरं इदानीमुत्पन्नो गकारो नास्ति विनष्टः कोलाहल इति प्रतीतेः प्रत्यक्षमे
व शब्दानित्यत्वं विनाशिभावत्वेनोत्पत्तिमत्त्वानुमानाद्वा प्रत्यक्षप्रतियोगिकाभावत्वेन हि प्रत्यक्षत्वापत्तेः । तदि
न्द्रियग्राह्यत्वेऽपि प्रतियोगिसमवायिलिङ्गपरामर्शाभावयोर्ग्रहणाच्च । नोभयं गौरवात्स्मृतत्वं संयोगध्वंसाप्रत्यक्ष
त्वापाताच्च । न च प्रतियोगियोग्यत्वस्य सत्त्वं यत्रानुपलब्धिविरोधितस्याभावस्तत्र गत्यतत्त्वे वायुस्पर्शध्वंसोऽपि प्र
त्यक्षः स्यादिति वाच्यं । आश्रयनाशजन्यस्य तस्य ग्राहकेन्द्रियसन्निकर्षाभावात् । किं च यस्य सत्त्वं यत्रानुपलब्धिविरो
धितस्याभावस्तत्र गृह्यत इति योग्यानुपलब्ध्यर्थः । अत एव पृथिवीत्वाभावो जलपरमाणौ न प्रत्यक्ष एव वायो रूपाभा
वः । अस्ति च तथा शब्दे तस्य सत्त्वे च समवधाने च प्रतीतिप्रसंगात् नैवमिह कारणाभावप्रतीतिर्नास्तीति चेत् ॥ इहेदा
नीं शब्दो नास्तीति प्रतीतेः । तस्माद्यत्राधिकरणे देशे समये वा प्रतियोगी वर्तते तत्र तदभावो निरूप्यते । अत एव सद्यामभा
वो निरूप्यत इत्युक्तं । शब्दप्रागभावस्य च सत्त्व एवेन्द्रियसन्निकृष्टत्वान्नाश्रयसन्निकर्षापेक्षा इन्द्रियविशेषणतया नाभावग्रहण

श॰प्र॰ मितिचेन्नात्र्ययोग्यत्वस्योपाधित्वात् अन्यथा गुणस्य संयुक्तसमवायेन शब्दग्रहः स्यादिति मैवं। अत एव शब्दस्य व्यंजकविरहा
२२ दनुपलब्धिमात्रं न तु ध्वंसः। तन्न व्याप्येत। सकलतदुपलंभकसमवधानेतदनुपलब्धिरूपायायोग्यानुपलब्धेरभावात्। प्र
22 तियोग्युपलंभकव्यंजकवायोरभावात्। विनष्टत्वप्रतीतिरपि लिंगिन्द्रियोपनीतव्यंजकवायुस्पर्शध्वंसोपाधिकैव। चायु
न्नोत्पादकः किन्तु व्यंजक इति किं विनिगमकमिति चेत्। इदानीं श्रुतपूर्वो गकारो नास्ति विनष्टः कोलाहल इति प्रतीत्यनं
तरं पुनः स एवायं श्रुतपूर्व एवायं गकारः पुनः स एवायं कोलाहल इति प्रत्यभिज्ञानमेवावर्द्धंसप्रतीत्यनंतरं स एवा
यं घट इति [redacted] प्रतीत्या ध्वंस एव सि
ध्यति। अत एव तारत्वतारतरत्वमन्दत्वमन्दतरत्वप्रतीतीनां भ्रमत्वकल्पनमित्यपास्तं। एतास्वपि सतीषु भेदप्रत्यभिज्ञाना
त्। स्यादेतत्। शब्दः प्रयत्नसाध्यः। तदनभिव्यक्तः सतितदनंतरमुपलभ्यमानत्वात्। घटवत्। अभिव्यंजकत्वं हि इन्द्रि
यसंबंधप्रतिबंधकापनायकत्वादिन्द्रियसन्निधापकत्वाद्वा। कुड्याद्यावरणनेव घटादि। तदुभयमपि शब्दे न संभवति नि
त्यसमवेतत्वेनावरणापनयनसंनिधापनयोरभावात्। नापि श्रोत्रसंस्कारात्। इन्द्रियसंस्कारो हि नीलनालोकादेः स
कृदिन्द्रियसंबंधयोग्यसर्वार्थोपलब्ध्यनुकूलसंस्कारजनकत्वं दृष्टं। तद्वदत्रापि सकृदेव सर्वशब्दोपलब्ध्यनुकूलं श्रो
त्रसंस्कारमादध्यात्। तथा च सर्वशब्दोपलब्धिः स्यात्। तदुक्तं। सकृच्च संस्कृतं श्रोत्रं सर्वशब्दान्प्रकाशयेत्। घटायोन्मीलि
तं चक्षुः परं नहि न बुध्यते। अथान्वयव्यतिरेकाभ्यां कार्ये प्रतिनियतजनकजन्यत्ववदत्रापि प्रतिनियतव्यंजक[redacted]व्यं एम॰
ग्यत्वमितिचेन्न। बहोर्हि नप्रतिनियतव्यंजकव्यंग्या एकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वात्। घटगतैक
२२

त्वपरिमाणवत्। न चावयवसंयोगवद्गुत्वाद्यंजकव्यंग्येनावयविनोत्पलव्यंजकदीपाद्यंग्येन तस्मिन्नीलिम्नोपघटइत्तिपश्य
व्यंजकसंगे त्कौनैकत्वेन वाव्यभिचारः। अवयवसंयोगावयविनोर्नीलोत्पलत्वयोश्च व्याप्याव्याप्यवृत्तिनोनुपलत्वस्याधिकरणि
त्वेनैकावच्छेदेनस्त्यभावात्। वद्गुत्वपृथक्त्वव्यंजकव्यंग्यत्वं चावयवैकत्वयोरिति न परस्परव्यभिचारिव्यंजक
व्यंग्यत्वं। अत एव नीलावलाकेत्यत्र रूपपरिमाणयोरुद्भूतनिपातवंशासंख्यापरिमाणयोश्च न व्यभिचारः। मेवाव
र्णाः प्रतिनियतव्यंजकव्यंग्याः श्रोत्रेण सहसमानेन्द्रियग्राह्यत्वात्। गंधवदित्यपास्तं सप्रतिपक्षत्वात्। वस्तु
तस्त्वनन्यथासिद्धप्रत्यभिज्ञानबलेनाभेदसिद्धौ प्रतिनियतव्यंजकव्यंग्यत्वसाधनस्यैव वलवत्वं। शब्दस्य शब्दजनक
त्वं शब्दनाशकत्वं ना। वीचीतरंगन्यायेनोत्पत्तिकल्पनं कल्पनमेव। शब्दस्य शब्दाजनकत्वात्। अविनाशकत्वाच्च
। अत्याद्यशब्दवत्। एतेन शब्दो नित्यः सामान्यवत्वे सत्यस्मदादिवहिरिन्द्रियग्राह्यत्वादित्यपास्तं। प्रत्यभिज्ञाविरो
धात्। शब्दत्वगत्वादेरसिद्धेश्च। तस्मादाकाशो नित्योव्योमैकगुणत्वात्। परिमाणवत्। श्रोत्रग्राह्यत्वाच्छब्दत्ववत्। विशे
षगुणान्तरसमानाधिकरणो कर्त्तृगुणत्वात्। समयपरिमाणवत्। पृथिवीतरनित्यभूतनित्यविशेषगुणत्वात्। अपा
कजत्वे सति नित्यभूतैकसमवेतत्वात् जलपरमाणुरूपवत्। अव्याप्यवृत्तित्वे सत्यनात्मविभुगुणत्वात्। कालप
परिमाणवत्। विपक्षेबाधकं च प्रत्यभिज्ञानमेवेति। अत्रोच्यते। गकारादिवर्णो नैकैकः। अस्ति ष्ठकसारिका
मनुष्यप्रभवेषु स्त्रीपुंसतद्विशेषप्रभवेषु च गकारादिषु स्फुरतो वैलक्षण्यात्। तत्स्वरूपतो भेदप्रथा इक्षुरसादिमा

२

प्र.मू.

१२ 23

ष्ठुर्यवत्। नच येयमौपाधिकाभेदप्रतीतिः। नहि विदितकुंकुमानुरागानुरागी तीव्रस्त्रीपुंसप्रभवत्वमानुभविकमुपाधिः
इन्द्रियासन्निकर्षेण स्त्रीपुंसादिभेदमविदुषोपि शब्दभेदप्रत्ययात्। यतोनुमापयन्निशुकशब्दोयं स्त्रीशब्दोयमित्यादि।
अन्यथान्योन्याश्रयात्। तत्प्रभवत्वे ज्ञाते भेदप्रत्ययः तस्माच्च तदनुमानमिति॥ नच कृपाणान्वयव्यतिरेकानुविधानात्
।कृपाणमुखदीर्घत्ववदौपपत्तिकमौपाधिकत्वं। अन्यानुविधानाभावात्। अथ व्यंजकवायोरेव वैलक्षण्यं शुका
दिगकारगतत्वेन भासते वायोरनुपलब्धेस्तेनैव रूपेणेति चेन्न गकारादिगतत्वे बाधकाभावात्। नचाभेदप्रत्यभिज्ञानं
बाधकं। नहि य एव शुकशब्दः स एव स्त्रीशब्दः श्रवणप्रत्यभिज्ञानं। अन्यथा तेषु भेदज्ञानाभावेन क्वचिद्विशेषज्ञानेन
स्यात्। नचाभिव्यंजकवायोरेव वैलक्षण्यं शुकाद्यनुमापकं तस्य गकाराद्यवृत्तित्वात्। तत्रचारोपेनमिति भ्रान्तत्वापा
तात्। तस्माद्यथा कृष्णो गौः शुक्लो गौरिति भेदे भासमाने गवानुगतप्रतीतिर्गोत्वमालम्बते तथा शुकादिगकारेषु भे
दे भासमाने यं गकारो यमपि गकार इति बुद्धिर्गत्वमालम्बते। इति प्रत्यभिज्ञा च भेदप्रथमा चोपपद्यते। किंच यदि क
त्वादिकं न जातिः तदा कोलाहलप्रत्ययो न स्यात्। तथाहि नगरादौ बहुभिर्वर्णानामेकदोच्चारणे दूरस्थेनानभिव्यक्त
ककारादिवर्णविभागं कोलाहलमात्रं श्रूयते। न च तत्र वर्णान्यस्य ध्वनिरूपस्य शब्दस्य श्रुतिः सम्भवति तदभिव्यंज
कभेरीताडनादेरभावात्। नच वर्णाभिव्यंजका एव ध्वनिव्यंजकाः सन्निधाने पि श्रूयमाने वर्णे तच्छ्रवणप्रसंगात्। १०
नच वर्णाभिव्यंजकवायुभिरेव हि ध्वनिमात्रमभिव्यज्यते कंचिज्जकस्य गव्यंजनद्व ध्वनिव्यंजने। सामर्थ्यात्। तत्सामर्थ्ये

त्वात्तत्समर्थशंखादेरभावाच्चान च तत्र शब्दत्वमेव प्रतीयते शब्दो न व्यक्त्यग्रहे तात्पर्यग्रहात् न चाभिव्यंजकवायुरेव कोला
हलत्वेन प्रतीयते। शब्दत्वेन प्रतीयते। शब्दत्वेन प्रत्ययात्। सन्निधावपि तथा प्रत्ययप्रसंगात्। गकारादिग्रहेपि
तेषां परस्परग्रहणात्तत्समीपे भेदाग्रहात् कोलाहलधीरिति चेन्नात्तेषु वैधर्म्याभावात्। तदभावेन्योन्याभावस्याभा
वात्। स्वरूपस्य ग्रहणात्समीपे वर्णककारेषु भेदाभावेन तदग्रहे कोलाहलप्रसंगात्। तदंशेनैकवर्णोच्चारणस्य
तद्धेतुत्वे दूरेपि तदप्रतीत्यापत्तेः। तस्मादवश्यं गत्वादिजातिरूपेवाचदग्रहे ककारादिग्रहेपि कोलाहलबुद्धि
व्यपदेशौ। अस्ति च शब्दस्य केपि जातिविशेषः श्रोत्रग्राह्यः। तस्मात्प्राच्यादिदिग्देशविशिष्टशंखप्रभवत्वम
नुमीयते अव्यपदेशत्वेपि तूणादीनां माधुर्यादावन्तरवन्तत्सत्वात्। अन्यथादिग्देशविशिष्टशंखादीनग्र
हे श्रोत्रस्यासामर्थ्यात्। तत्प्रतीतिर्न स्यादेवात्। तथापि गत्वादिना पराभावानुपपत्तेश्शुककारादिषु श्रुका
दिप्रभवत्वमनुमीयते तच्च व्यवहारणात्। ननु श्रुककारादिस्वेका जातिरस्ति। शुकप्रभवत्वानुमापिका। तथा व्यवहा
रकारिकाचागत्वादिना शंकाप्रसंगात्। गत्वं तु न नाना॥ अननुगतत्वेन ततोनुगतव्यवहारानुपपत्तेः। अत एव

ग॰म॰ तारत्वमपिगत्वादिव्याप्यंनानुगतत्वंतन्निश्चयेपिगत्वसंदेहोव्याप्यतावच्छेदकरूपानिश्चयात्।नचानुगतव्य
वहारानुपपत्तिः सजातीयसाक्षात्कारप्रतिबंधकतावच्छेदकत्वेनानुगतेषुनानातारत्वेष्वनुगतव्यव
हारसंभवात्।तदवच्छिन्नेव्यवहारसिद्धेः।तारत्वमन्दत्वेनजातीसप्रतियोगिकत्वादितिचेत्।तारत्वतात
त्वादयउत्कर्षरूपाजातिविशेषाएवतेचाश्रयेगत्वमांगाएवगत्वंतेनरूत्कर्षावच्छिन्नायथामधुरत्वा
दयउत्कर्षव्यवहारमितरसापेक्षाःकुर्कुर्वन्नितथामन्दत्वादेरप्यातारत्वादिव्यवहारोउत्कर्षश्चजातिरू
पादन्योसंभावितएवगकारेतुनैवं।अननन्यथासिद्धभेदप्रत्ययबलेनवक्र ऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽ
ऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽ एम०
ऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽ

विशेषानुमानबलेन च तत्सिद्धेर्गत्वकत्वव्याप्यतन्नानात्वस्वीकारात्। तथापि वायुवृत्तित्वे शब्दकादिककारादि
व्यंजकवायूनां विजातीयत्वेवावश्यं। तथा च ककारव्यंजकवायुत्वव्याप्यं यदि शब्दकवर्णाभिव्यंजकवायुत्वं तदा
शुकगकारव्यंजकवायोर्न स्यात्। अथ व्यापकं तदा सर्व एव कव्यंजकवायव शब्दकवर्णाभिव्यंजकवायवः स्युः
तस्माद्वायुवृत्तित्वेपि तासां नानात्वमावश्यकम्। अथास्तु स्त्रीपुंसादिगकारभेदः तथापि यावद्वक्तृभेदमनं
ता एव नित्या वर्णाः प्रत्यभिज्ञानादिति चेत्। अस्तूत्पादविनाशप्रतीतौ सत्यामपि स एवायं गकार इति प्रत्य
भिज्ञा। अस्ति च तदनंतरमप्युत्पादविनाशप्रथा। न चोत्पत्त्यादिप्रतीत्यभेदप्रत्यभिज्ञयोरन्यतरस्य परस्परं
विहायान्यद्बाधकमस्ति। न चांशो परस्परं बाध्यबाधकभावेपि विनिगमकं येनैकस्यांतत्वेनाविरोधः स्या
त्। कथं वा भेदाभेदज्ञानयोरन्यत्रावधारितं परस्परप्रतिबंधकत्वं परिभूय प्रथमं तयोरेकसत्वेप्यपरोत्पत्तिरित्य
इति संकटप्रविष्टत्वात् प्रत्यभिज्ञानशब्दनित्यत्वे प्रमाणयितुं शक्यते। नन्वेवमुत्पत्तिमत्त्वादिनाप्यनित्य
त्वसिद्धिः कथमासत्यमानत्वादादिबुद्धिप्रत्यभिज्ञयोरप्येवंरूपविषयभेदः एकविषयत्वे विरोधेनैका
नंतरमपरानुत्पत्तिप्रसंगात्। एवं भेदे भासमाने प्रत्यभिज्ञा जातस्तज्जातीयत्वविषयो न व्यक्त्यभेदः। नन्वेवं

२६ तज्जातीयोऽयमिति स्यान्न तु सोऽयमिति वाच्यम् । तज्जातीयत्वप्रतीतेरपि सोऽयमित्याकारदर्शनात् यथा सैवेयं गाथा तदेवे
26 दमौषधं वैद्यैः कृतं ममापि प्रत्यहं क्रियमाणमस्तीत्यादौ । न हि तावद्व्यसनमात्रमानुपूर्वी तरणाज्जनदीदीनादि
प्युत्पन्नानात्वात् किंतु तद्व्यापारणानंतरमुच्चारणांतरं ज्ञानानंतरं ज्ञानं वा तच्च नानेति तदतीगाथापि नानैव न
चाभेदे भासमाने उत्पादादिबुद्धिरेवान्यस्योत्पादादिकमवगाहते गकारादिगतत्वप्रतीते भ्रांतत्वप्रसंगा
त् न चेष्टापत्तिः अभेदे भासमाने तद्विरुद्धधर्मेत्वप्रमानुदयात् विनिगमकाभावेनोभयस्यापि य
थार्थत्वाच्च कुतर्हि तस्याप्यभेदो विषयः यत्र प्रथमं न भेदप्रथा अत एव भेदसत्वे तदज्ञानात्क्वचित्साभ्रा
न्ता तस्माद्यत्र भेदप्रतीतिस्तदितरबाधकाबाध्या तत्र प्रत्यभिज्ञैव न भवति भवतीच्च तज्जातीयमात्त्वमालम्ब्य
ते न तु भ्रांता विशिष्टदर्शने भ्रमानुदयात् । अपि च यथाशब्दादिध्वनीनामुत्पत्तिविनाशप्रतीतेस्तार
त्वादिविरुद्धधर्मसंसर्गाच्चानित्यत्वे सैवेयं गुर्जरीत्यादिप्रत्यभिज्ञा तज्जातीयत्वविषया तथा वर्णप्रत्यभि
ज्ञापि अन्यथा ध्वनयोऽनित्याः स्युः उत्पत्तिविनाशतारत्वादिप्रतीतीनां प्रत्यभिज्ञानबलेनौपाधिकत्वात् एम०
न च वर्णेषु तारत्वेनैव भासमाना ध्वनय उपाधयः संभवंति न तु ध्वनिषु वर्णास्तत्तज्जनककं[illegible]ठताल्वभिघा २६

तामावादितिवाच्यम्. वर्णोच्चारणाद् शब्दाग्रामपिगुर्जरीकादिजनकानामभावात्. तस्मादुत्पत्तिविनाशतारत्वा
दिप्रत्ययस्यप्रत्यभिज्ञानस्यचतुल्यत्वेद्वयोरपिनित्यत्वमनित्यत्वंवा. नचोभयोरपिनित्यत्वमेव. उक्तन्या
येनप्रत्यभिज्ञायास्तज्जातीयविषयत्वात्. किंच. यदिव्यंग्यः शब्दः स्यात्तदावाय्वालोकाभावेघटस्येवव्यंज
काभावेशब्दस्यानुपलंभात्संशयः स्यान्नतुइहइदानींशब्दोनास्तीतिनिश्चयः तस्माद्वर्णोनित्योऽनित्यो
वा. सत्वेसत्युत्पत्तिमत्वाद्स्मदादिवाह्येन्द्रियग्राह्यत्वेसतिजातिमत्वात्।अस्मदादिप्रत्यक्षगुणत्वाद्वा
आत्मैकत्वप्रत्यक्षत्वपक्षेविशेषगुणत्वात्।व्यापकसमवेतप्रत्यक्षविशेषगुणत्वात्।अनात्मप्रत्यक्षगु
णत्वात्।अव्याप्यवृत्तित्वात्।ईश्वरज्ञानंतुनतथा. तत्प्रयोजककारणाभावात्।वहिरिंद्रियव्यवस्थाहेतु
गुणत्वात्।अभूतप्रत्यक्षगुणत्वात्।उत्कर्षापकर्षशब्दप्रवृत्तिनिमित्तजातिमत्वाद्वा इत्यादि. रसत्वादि
व्याप्यजातेर्नानात्वेपितादृशशब्दप्रवृत्तिनिमित्तत्वस्यसाधारणात्. नचात्रसाधनावच्छिन्नस्यपक्षधर्म
त्वावच्छिन्नस्यवासाध्यस्यव्यापकः स्पर्शवत्समवेतत्वमुपाधिः।सर्वत्रवर्णात्मकशब्दप्रवृत्तिनिमित्तीकर
णीयोमगुणेष्वनित्येषुध्वनिषुसाध्याव्यापकत्वात्।स्पर्शवत्पदस्यपक्षमात्रव्यावर्त्तकत्वेनपक्षेतरत्वाद्वे

११ 21

तियदा च वर्णा एव न नित्यास्तदा केवलकथापुरुषविवक्षाधीनानुपूर्व्यादिविशिष्टवर्णसमूहरूपाणां प
दानां कुतस्तरां वतत्समूहरूपस्य वाक्यस्य कुतस्तमां च तत्समूहस्य वेदस्येति। तथापि परतंत्रपुरुषपरंपरा
धीनतया प्रवाहाविच्छेदमेव नित्यतां ब्रूम इति चेत् न स्मृत्याचारानुमितानां शाखानामुच्छेददर्शनात्। स्या
देतत्। विवादपदमपूर्वबोधिका स्मृतिः। स्मृत्यर्थानुभवजनकवेदमूला अविगीतमहाजनपरिगृहीतस्मृ
ए तित्वात्सत्यत्ववेदमूलस्मृतिवदिति। वेदमूलत्वं वेदैर्थानुभवजन्यत्वम्। ज्ञानद्वारा च ज्ञायमानस्यैव वेदमूलस्य
स्मृतिहेतुतयानुमानं कुविंदस्यैव ज्ञानादिव्यवहितस्य पटे। न तु कारणाकारणता वेदे सत्येव तत्स्मृतिसंधाने
स्मृतिप्रणयनात्। वेदार्थस्मृतितान्वप्रसिद्धिसिद्धा स्मृत्यर्थश्च स्मृतितरवोपस्थितः। न च स्मृत्यर्थबोधक
वेदानुमाने स्मृत्यर्थरूपवेदार्थस्य विषयत्वाद्वेदोनुवादकः। ज्ञानांतरोपनीतस्य विशेषणत्वेन विशिष्ट
बुद्धिसंभवात्। पाककृतौ मानसप्रत्यक्षायां पाकस्य संज्ञासंहितज्ञाने संज्ञायाः। ज्ञानायथार्थत्वे तदनुव्य
वसायेभ्रमविषयस्यैवास्य यथार्थातभ्रांतित्वसंकरापत्तिः। ननु शब्दार्थानुमानस्य विषयस्तस्यासिद्धत्वे एम० ११
नाजनकतया स्मृत्यव्यापकत्वात्। सच वेदोनुमेय एवास्तु अनुमितादेवार्थमवधार्य स्मृतिप्रणयनसंभवात्

त्वं वाक्यत्वं न चात्र पदक्रमः। अनुच्चार्यमाने तस्मो उच्चारणाधीनस्य पुनः पदक्रमीयमानत्वात् उच्चाधीनस्य ज्ञातस्याभावादिति चेन्न नहि अभिव्यक्तं वाक्यत्वं अप्यवाच्यं ज्ञानार्थं उच्चारणाधीनम्

न चासंसारमपठितस्य न वेदत्वम्। ऽनुत्पत्तितोऽभिव्यक्तितो मौ निश्लोकवदभिप्रायतो वानुपूर्वीहीनवर्ण

मात्रस्य निरर्थकत्वात् ज्ञानजनकसमभिव्याहारस्यानेकत्वे विशेषानुमानाच्चेतिचेत् । न तस्य त्वर्थज्ञाप

कत्वेनैव ज्ञातस्य वेदस्य तस्य त्वर्थानुभावकत्वात् । नहि शाब्दबोधे नियतपदानुपूर्वी हेतुर्व्यभिचारात् । पदस्य

वर्णविशेषानुपूर्वीनियमेपि तत्तद्वर्णानुपूर्वीकपदविशेषत्वेन न हेतुत्वं हस्तकरादिपदानां प्रत्येकं व्य

भिचारात् । किन्त्वव्यभिचारी तदर्थज्ञापकत्वेन ज्ञातस्य लाघवादावश्यकत्वाच्च तदर्थज्ञापकत्वमेव क्वचि

द्वर्णक्रमस्य विशेषणानामुपयोगः । अत एव वर्णलोपादौ कुम्भमानयेतिशाकारसंदेहे त्तियावुच्चारणे वा

हस्तकरसंदेहेपि वाक्यार्थबोधः । ननु क्रमेकपदवर्तित्वं गोरश्व इत्यादावपि भावात् । किंतु विशिष्टा

र्थपरशाब्दत्वम् । तच्चात्रास्त्येव । अथानुच्चार्यमाणस्य न वाक्यत्वम् । अन्यथा वाक्यमुच्चारितेत्यत्रानन्व

यापत्तिः । अनुच्चरितमो निश्लोकस्य वाक्यत्वं न स्यात् । उच्चारणादशायां वाक्यत्वे वाकस्यासत्वमेव स्यात्

+ न वार्थानुभावकत्वमिति चेत् । न । लिप्यनुमितामपि वाक्यत्वादर्थबोधकत्वाच्च । लिपितुल्यावस्थितिः ।

किंच । वाक्यमुच्चार्यते न तूच्चारणाद्वाक्यत्वम् + एकदा तावत्पदानामुच्चारणाभावात् । न च कृतक्रिय

१८

२४

माणाकरिष्यमाणो व्याकरणस्य वाक्यत्वम्· समुदाये प्रत्येकस्याभावात्। तस्मादर्थविशेषज्ञापकत्वे नैव ज्ञाताद
र्थविशेषधीः। अत एवास्ति वह्निलिंगमिति शब्दात्प्रतीतधूमेव वह्नेरनुमानम्· न तु तदर्थज्ञापकत्वेन ज्ञाता
दर्थज्ञानमात्रम्· न तु संसर्गधीः। घटः कर्मत्वमानयनं भावनेयत्र तद्बोधकमिति ज्ञानेपि घटमान
येतिवाक्यादिवान्वयावबोधात्· एवं वान्वयप्रकारकमित्वाद्युपस्थापकविभक्त्यादिमत्पदविशेषस्य
तद्व्याप्तिताकांक्षादेश्चार्थज्ञानं वाक्यार्थधीहेतुरतो नतैर्विना ज्ञापकत्वमात्रेण ज्ञातादर्थधीरिस्तक
णादिसंदेहे सकारसंदेहे कुशमानये त्यादौ च विभक्त्यादिज्ञानादेव वाक्यार्थावगम इति चेन्नैवम्· न हित
त्तद्विभक्त्यादिमत्पदविशेषत्वेन वाक्यार्थधीहेतुत्वम्· अननुगमात्· किंतु घटः कर्मत्वमानयनमित्या
द्यन्वयविरोधिपदाज्जन्योपस्थितिस्तथा· सा चेहाप्यस्ति। वस्तुतस्तु· नानापदात्पदार्थोपस्थित्यनंतरं वाक्या
र्थबोधे तत्रैव सामग्री· अनुमितत्वे दाद्वाक्यार्थानुभवे विलक्षणैव सा स्मृत्यर्थज्ञापकत्वे नैव ज्ञातस्य स्म
त्यर्थानुभावकत्वात्· धर्मिग्राहकप्रमाणेन तथैव तस्य सिद्धत्वान्नवेश्वरस्येवाशरीरस्य कर्तृत्वे· अत एव व राम०
र्णपदविभक्त्यादिविशेषघटितत्वेन ज्ञातस्यास्वपदस्य वाक्यार्थानुभावकत्वात्पदार्थस्यानीमत्तस्यवा १८

क्यार्थस्तत्र वर्णसमूहः पदं पदसमूहो वाक्यमित्यत्र ननो ग्रहः । प्रमाणशब्दत्वमात्रेणात तस्य सिद्धेः अन्य
थाऽकृप्तहेतुं विना नसोऽनुमापक इत्यादौ तदसिद्धावाश्रयासिद्धिः सिद्धौ बाधः तेन विनैव सद्धोऽनुपप
त्तिं परिभूय तदनुभावकत्वस्य धर्मिग्राहकमानसिद्धत्वात् । अत एव वस्तुतो निंदाभ्यां कल्पितविधि
त निषेधवेदार्थमधिगत्य प्रवृत्तिनिवृत्ती अन्यथा विधिनिषेधकानां नानाप्रकारकत्वे विभक्त्यादिम
त्यदस्यानुमातुमशक्यत्वान्न ततोऽर्थधीः स्यात्तथापि वक्तृज्ञानानुमानानन्तरमिवानुमितानुमाना
देव वाक्यार्थसिद्धौ लौकिकवाक्यवद्वेदस्यानुवादकत्वं स्यादिति चेत् न धर्मिग्राहकमानेन स्व
पा त्यर्थज्ञापकत्वं ज्ञातासंभूतसामग्रीकत्वेनानुपपदमेव वाक्यार्थबोधोदयात् अपेक्षणीयान्तराभावात्
अनुमानस्य व्याप्त्यादिज्ञानापेक्षितत्वेन विलम्बितत्वात् न च वेदस्यापि योग्यतादिज्ञानापेक्षिततया वि
लंबः तन्निरपेक्षबोधकस्यैव धर्मिग्राहकमानसिद्धत्वात् । योग्यतादिविशिष्टस्यैवानुमानाद्वारे एवं
मंगलाचारस्याविगीतशिष्टाचारत्वेन कर्त्तव्यतामनुमाय सा कर्त्तव्यता वेदबोधिता अलौकिकाविगी
तशिष्टाचारकर्त्तव्यतात्वादिति तद्बोधकत्वेनानुमितवेदात्कर्त्तव्यताधीस्तत्प्रवृत्तिः । ननु सआचा

१९ रोवेदवेधितकर्त्तव्यताकस्मादृष्टाचारत्वादित्यनुमितवेदान्तकर्त्तव्यताधीनः विभक्त्यादिकं विनानुमितवेदान्तकर्त्त
29 व्यताज्ञानाभावात । मंगलमाचरेदित्येवंरूपस्यचवेदस्यनानुमानम् · तथाव्याप्त्यभावात् · तस्मात्तस्यकर्त्तव्यतामनु
मायतद्बोधकवेदानुमानम् · प्रथमं कर्त्तव्यतानुपोमानेपिवेदानुमानमविनाभावात् · नचतत एवप्रत्यक्षवे
न३ दानुमानंप्रत्यक्षत्वेऽक्षेदानुपपत्तेः · शाखांतरवत । यन्नुं अपेक्षाकर्त्तव्याः कार्याऽपेक्षकायोऽपेक्षकाइत्येवं
रूपमेववाक्यमनुमेयमुपस्थितत्वात् · एवंचतत्रेवार्थेप्रतिपुरुषमन्यान्यवेदानुमानंनदोषाय · एकार्था
नेकपदोपस्थितौचानेकवाक्यानुमानमेवेति · तन्न · आचारतोवेदानुमानेमंगमाचरेदित्याद्यन्यतरोप
स्थितौनियामकाभावात् · अनेकवेदकल्पनेचस्वानुभवविरोधः मनुस्मृतिमूलंचानेकंवाक्यंनास्म
कमितिकथमाधुनिकोनेकमनुमिनुयात् · नचस्मृत्यर्थबोधकोवेदः स्मृतिसदृश एवानुमेयोनिय
मतः स्मृतेरुपस्थितत्वादितिवाच्यम् · तदर्थे स्मृतेरपिनानाप्रकारकत्वात् · तस्यप्रदोषाद्यावनुवरितस्येव
वेदत्वं । श्रोत्रग्रहणार्हं तपाच्चशब्दत्वम् । वाक्यत्वमर्थबोधकत्वादित्येतदेवयुक्तम् । स्मृत्याचारेणानुमि स्म०
तोवेदोर्थंबोधयतीतिपूर्वंपूर्वेणानुमितोवेदाद्गुत्तरोत्तरस्मृत्याचाराविति नांधपरंपराशङ्कार्थंशक्तिय १९

इव स्वतंत्रप्रमाणमूलकत्वात्· तस्मान्नित्यानुमेयत्वं वेदस्य न तूच्छेद इति· अत्रोच्यतोऽच्छिन्नवेदाद
र्थप्रतीत्यस्मृत्याचारयोरुपपन्नेन सामग्र्यन्तरकल्पनम्। अत एव नाश्रयासिद्धिर्बाधो वा· स्मृत्याचारानु
मितवेदस्यास्माभिरभ्युपगमात्। इदानीं च स्मृतेरर्थप्रतीत्याचारएव कर्तव्यतामनुमाय प्रवृत्तिः· न चैवं किं वेदेनेति
वाच्यम्· तुल्यत्वात्· अविनाभावाच्च तत्कल्पनं तुल्यम्· तथा च स्मृत्याचारयोर्वेदजन्यानुभवमूलत्वानुमानादेव
पक्षधर्मताबलात्प्रत्यक्षवेदमूलत्वसिद्धिः· अन्यथा तस्यानुभावकत्वाभावेन मूलत्वानुपपत्तेः· तस्मात्स्मृत्याचा
रानुमितो वेदः· प्रत्यक्षोऽध्ययनविषयश्च वेदत्वात्सम्मतवत्· अन्यथा सामग्र्यंतरकल्पने गौरवप्रसंगः· ननु स्तु
तिनिंदार्थवादेन कल्पिता द्विविधिनिषेधवाक्यात्कथमर्थमवगम्य प्रवृत्तिनिवृत्ती· न हि तत्र वर्णपदविभक्तिविधि
प्रत्ययपदक्रमविशेषाणामनुमानं संभवति व्यभिचारादिति चेत्· न· स्तुतिनिंदार्थवादाभ्यां प्रवृत्तिनिवृत्ति
पराभ्यां प्रवृत्तिनिवृत्तिहेतुरर्थ एव कल्प्यते लाघवात्· न तु विधायकनिषेधकवाक्यं गौरवादुक्तदोषाच्च·
यत्र वार्थवादादेव तदर्थावगमस्तत्र तिष्ठत्वमित्यादौ तत्र न तत्कल्पनापि· अथ तस्याध्ययनविषयत्वे शाखान्ता
वदङ्गभिर्मेधाविभिराध्यात्मिकशक्तिसम्पन्नैर्ध्रियमाणशाखायाऽच्छेदासंभव इति चेत्· न· एकस्य न सक

३० 30

लशाखाध्ययने शक्तिरित्येकेनैवार्यैरपि तदनध्ययने शाखोच्छेदसंभवात् एकानधीताया अपराध्ययनवि
षयत्वनियमे मानाभावात् । शाखात्वस्यैव प्रत्यक्षशाखात्वस्याप्रयोजकत्वात् यद्यपि सहस्रशाखाविदो व्यासा
दयः संत्येव तथाप्यध्ययनाभावशाखा एव शाखोच्छेदः ननु शाखोच्छेदे वर्णपदवाक्यहानिशङ्कया प्रत्यक्षवेदादपि
वाक्यार्थप्रयोगयोर्निश्चये वैदिकव्यवहारमात्रं तु स्यादिति चेत् न श्रूयमाणमात्रस्यैव महाजनपरिगृही
तत्वात्तन्मात्रबोधितांगेतिकर्त्तव्यतयैव शिष्टैरनुष्ठीयमानत्वाच्च तदर्थनिश्चयात् न चोच्छिन्नशाखाबोधि ना
तेतिकर्त्तव्यताशंकयैकस्मिन्नपि कर्मण्यनाश्वासप्रसंगः नोच्छाखेतिकर्त्तव्यतापरिशीयत्वात्तस्येति सांप्रत
त मः सन्निहितैस्तत्कर्मणां नानाशाखाबोधितसकलेतिकर्त्तव्यताबोधनायैनमेव कालक्रमभाविनमनाश्वा
समाशंकमानैर्महर्षिभिः प्रसंगितामहाजनपरिगृहीताः स्मृतयः इति नानाश्वासः अन्यथा एकस्यसकल
शाखानवगमाच्छाखान्तरबोधितेतिकर्त्तव्यतासंशयेनैकशाखातो नार्थनिश्चयः स्यात् यत्तु विभक्त्यादि
मत्त्वतत्पदानां तदर्थं तत्समुदायानां च प्रत्यक्षत्वात्तेष्वपि कश्चिद्वेदस्तत्रायं समुदायो वेद इत्यनिश्चय एव नि ए°
त्यानुमेयार्थः वेदत्वात्तत्रानुमेयमिति तन्न प्रत्यक्षवेदातिरिक्तवाक्ये तदभियुक्तानां महाजनानां वेदत्वा

भावनिश्चयात्। अत एव वेदत्वाभावनिश्चयात्। अत एव वेदत्वं तत्र नानुमेयं बाधाद्धि शिष्यकंपन्नाज्ञा
नाबाधमेवेद नाजनकत्वं वेदत्वं नानुमेतं यतज्ज्ञनकत्वस्य प्रत्यक्षत्वात्। नाध्ययनविषयत्वं तदभावान्नजातिर
नभ्युपगमादिति। स्यादेतत्। स्मृत्याचारयोर्वेदमूलकत्वे तत्रोच्छेदादि विवादस्तद्वत्त्वसिद्धम्। तथा हि। वेद
समानार्थामहाजनपरिगृहीता च स्मृतिः स्वार्थोपस्थित्यनन्तरं स्मृत्यर्थानुभावकवेदानुमाने लिङ्गम्। तथा
च प्राथम्यात्साध्यप्रसिद्ध्यर्थमुपजीव्यत्वात्स्मृतेरेवापूर्वादिवाक्यार्थज्ञानमस्तु किं वेदेन। तदर्थस्य स्मृति
त एव सिद्धेः। अपूर्वस्य प्राक्स्मृतैकवेद्यत्वेन स्मृतितो ज्ञातस्य ज्ञापकत्वेनानुवादकतापत्तेश्च। सा च स्मृत्यंत
रादित्यनादिरेव स्मृतिधारा बूपकी। अन्यथा मनुस्मृते। एवं तवापि वेदानुमानं न स्यात्। सर्वैव स्मृतिः
स्मृतिजन्यवाक्यार्थप्रमाजन्यमहाजनपरिगृहीतत्वेन च प्रमाणमिति नान्यपरम्परा प्रत्यक्षाव स्मृतिः स्मृति
मूला। नानुमितानुमितवेदवत्तस्याः अननुभावकत्वात्। वेदार्थस्मृतिताप्रसिद्धिस्तु प्रत्यक्षवेदमूलस्मृ
तिसादृश्यपेण भ्रमास्त्रत्यक्षवेदावोधितलोभन्यायमूलस्मृताविवर्तात्रिकाणाम्। लिंगाभासत्वन्यवेदमूल
कत्वाभ्रमाद्यासंभवंतीनसंभवनमूलान्तराणां वेदमूलत्वं कल्पयति। अथ स्मृतिरिव तद्वेदमूलकत्वप्रसि

३१ द्धिरपि महाजनपरिगृहीता। एवं च सा वेदमूलत्वनिर्वचनात् अविगीतमहाजनपरिगृहीतवेदमूलकत्वप्रसिद्धिः
त्वात्। प्रत्यक्षवेदमूलस्मृतौ तत्प्रसिद्धिवत्। एवं वेदार्थस्मृतिताप्रसिद्धिरपि। अन्यथा महाजनपरिग्रहान्नादेरे
वेदस्मृत्योरपि प्रामाण्यं न स्यादिति चेत्। न। गृपहस्त्यादिस्मृतेतत्प्रसिद्धेर्व्यभिचारात्। प्रत्लोभादित एव त
त्संभवाद्विचारकाणां विप्रतिपत्तेश्च तत्र तत्प्रसिद्धौ विगानं महाजनानामिति चेत्। न। गृपहस्त्याद्यत्रापि
मूलान्तरसंभवाद्विप्रतिपत्तेश्च विगानमिवर्त्तमानम्। अत एव स्मृतीनां न्याममूलत्वे संभवति वेदमूलकत्व
प्रसिद्धावपि न वेदमूलकत्वम्। न च वेदमूलेयमिति कृत्वा स्मृतेर्महाजनपरिग्रहात्तन्मूलत्वम्। वेदमू
लेयमिति प्रथमं ज्ञातुमशक्यत्वात्। शक्यत्वे वा किमनुमानेन। न च वेदमूलत्वेन प्रकारेण महाजनप
रिग्रहः। असिद्धेः। मन्वादिस्मृतित्वेन एवं महाजनपरिग्रहणाद् इतरेषां परिग्रहानुष्ठानाद्युपपत्तेः। तत्रै
एवं होलाकाद्याचारेऽपि वेदलिङ्गेनैव कर्त्तव्यताज्ञानोपपत्तेः किं वेदेन। तदर्थश्च लिङ्गादेवोपपत्तेः। अवि
गीतालौकिकविषयशिष्टाचारस्य वेदमूलत्वदर्शनाद्वेदानुमाने वा विगीतशिष्टाचारत्वेन भोजनाद्या राम०
चारोऽपि वेदमूलः स्यात्। वेदं विनापि तत्कर्त्तव्यताधीसंभवान्न तदर्थं वेदः। इतीहापि तुल्यम्। आचारकर्त्तव्य ३१

ता[redacted]रनुमानयोरनादित्वेनावारणीयत्वात् कर्त्तव्यतानुमानमूलकत्वान्नान्धपरंपरा । तत्र पूर्वानु
मानस्य सापेक्षमुत्तरानुमानमिति स्वतंत्रप्रमाणमूलकत्वाभावात्ता व्याप्तिपक्षधर्मतासत्वेन सर्वेषां स्वतंत्रप्र
माणत्वात् । नापीतरप्रामाण्याधीनं सर्वस्य प्रामाण्यमिति न निरपेक्षत्वम् । प्रसक्तादेरस्थितथात्वापत्तेः ॥ एतेन
विवादपदमाचारो निरपेक्षप्रमाणमूलकः । अविगीतमहाजनाचारत्वात् । प्रत्यक्षमूलवेदाचारवदिति निरस्त
म् । अनुमानस्य निरपेक्षप्रमाणत्वात् । प्रमाणमूलत्वेनैव हेतोरुपपत्तेः ॥ निरपेक्षत्वस्य गौरवेणाप्रयोजकत्वा
च्च । न च सापेक्षत्वेन न प्रमाणता वाक्यादिसत्वात् । अन्यथा प्रमाणे नैरपेक्ष्यस्य वैयर्थ्यात् । न चाचारे वेदमूलत्वप्र
सिद्धेस्तदनुमानम् । असिद्धेर्व्यभिचारात् । अन्यथोपपत्तेश्च । न च वेदमूलत्वेन महाजनपरिग्रहान्तथा । न हि वेद
मूलोयमिति कृत्वा महाजनानां तत्परिग्रहः ॥ वेदमूलकत्वस्य ज्ञातुमशक्यत्वात् । शक्यत्वे वा किमनुमानेनानान्
च वेदमूलत्वेनैव महाजनपरिगृहीतोयमाचार इति ज्ञात्वा तत्र महाजनानां परिग्रहः । गौरवात् सिद्धेश्च एवं म
हाजनपरिग्रहाद्वेदोक्तेरेवापरिग्रहादनुष्ठानोपपत्तेः । तादृशस्मृत्याचारयोर्वेदमूलत्वेन व्याप्तेर्वेदसिद्धिरिति
चेत् । न । असंभवन्मूलांतरत्वस्योपाधित्वात् । अन्यथा लोभमूलस्मृतेरपि वेदमूलत्वप्रसंगः । अस्तु वा स्मृत्या

चारयोरनादित्वम्॰ न चाचारात्स्मृतिः स्मृतेराचार इत्यंधपरंपरा॰ मूलभूतप्रमाणाभावादिति वाच्यम्॰ स्मृत्याचारयोरन्य
योरपि प्रमाणत्वात्॰ अन्यथानततो वेदानुमानमपीति॰ उच्यते॰ प्रलये पूर्वस्मृत्याचारयोरुच्छेदात्सर्गादौ नित्य
सर्वज्ञेश्वरप्रणीतवेदमूलत्वं स्मृत्याचारयोः॰ अन्यथा मूलाभावेनान्धपरम्परापातात्॰ न च मन्वादीनाम
तीन्द्रियार्थदर्शित्वम्॰ तदुपायश्रवणादेस्तदानीमभावात्॰ पूर्वपूर्वसर्गसिद्धसर्वज्ञत्वादय एव त इति
चेत्॰ न॰ प्रमाणाभावात्॰ स्मृत्याचारयोः प्रमाणमूलत्वमेव कल्पकमिति चेत्॰ प्रतिसर्गं तेषामन्यान्यक
ल्पने गौरवमित्येकस्य नित्यसर्वज्ञकल्पनात्॰ न च स्मृतय एव तत्प्रणीताः॰ तासां मन्वादिकर्तृत्वेन स्मृतौ बो
धनात्॰ स्मृतावेव स्मृतीनां वेदमूलकत्वस्मरणाच्च॰ एवं च स्मृत्याचारयोर्महाजनपरिग्रहाद्वेदमूलकत्वसा
धकमपि भगवति प्रमाणम्॰ अत एव प्रतिमन्वन्तरं चैषा श्रुतिरन्याभिधीयत इत्यागमोपि॰ एवं च पूर्वप्रत्य
ल क्षवेदमूलावेव स्मृत्याचारौ॰ अग्रेपि कालक्रमेणायुरारोग्यवं श्रद्धाग्रहणादिशक्तेर्ह्रासापचीयमानत्वात्
दध्ययनविच्छेदेन शाखाविच्छेदात्स्मृत्याचाराभ्यामेव कर्तव्यतामधिगत्य प्रवृत्तिः॰ नन्वेवं स्मृतिरस्तु वेद एम॰
मूला॰ मंगलाद्याचारस्तु ईश्वराचारादेव भविष्यति॰ घटत्विष्यादिसम्प्रदायवदिति चेत्॰ न॰ वृद्धव्यापारध २१

दितत्तन्नदाचारस्यगुरुत्वेनमंगलमाचरेदित्यादिवाक्यस्यैवलाघवेनकल्पनात्‌॰नचमंगलादिपदशक्तिग्रहार्थमाचारस्यावश्यकइतिवाच्यम्‌॰स्वर्गादिपदवद्वाक्यतएवतद्ग्रहसंभवात्‌॰अतएवयत्रवचनमात्रात्परप्रतीतिस्तत्रनाचारःपरीक्षकाणाम्‌।तस्यैवेदत्वेनाप्रामाणितत्वेनशक्तिग्रहार्थंतद्वचनेव्यभिचारात्‌।किंतुतादृशाचारस्यवेदमूलत्वनियमादिति।स्यादेतत्‌॰प्रलयेसत्येवमेतत्सएवतुनास्तिप्रमाणाभावादितिचेत्‌॰न॰कालकपालान्यायेनित्यैरप्रागभावःकार्यद्रव्यानाधारोधारःकार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिर्वा।अभावत्वात्‌॰आकाशवृत्त्यन्योन्याभाववदितिवृत्तप्रलयसाधनात्‌॰एवमेवघटध्वंसपक्षीकृत्यागामिप्रलयसाधनं।यद्वा॰घटःकार्याधिकरणकार्यद्रव्यानधिकरणवृत्तिध्वंसप्रतियोगी।कार्यत्वात्‌।शब्दवत्‌।यद्वा।कार्यद्रव्यत्वंकार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिध्वंसप्रतियोगिवृत्ति।कार्यमात्रवृत्तित्वात्‌॰शब्दत्ववत्‌॰यद्वा।एककालीनाःसर्वेपरमाणवःसमवायोपादेयप्रध्वंसशून्याः।आरंभकत्वात्‌॰नष्टपर्वनारंभकपरमाणुवत्‌।सर्वत्रपक्षत्वावच्छेदकावच्छिन्नसाध्यंप्रतीयतइतिएककालेशून्यतालभ्यते।नचपरमाणूनामपिपक्षत्वेनांशतसिद्धसाधनम्‌॰पक्षधर्मतावलल्लभ्यसाध्याप्रतीतेः।अभेदानुमानवच्चपक्षस्यदृ

३२ प्यांतत्वाविरोधः· यद्वा परमाणवः कार्यद्रव्यानधिकरणवृत्तिकार्यवन्तः नित्यद्रव्यत्वात्। अन्यथा नियमेपि निय
33 मांतरापेक्षायामनवस्थितेः। आगमोप्यमुमेवार्थं संवदतीति कृतं प्रसक्तानुप्रसक्त्या। आचारमूलत्वं वेदस्य प्र
वर्त्तकज्ञानजनकत्वेन भवतीति प्रवर्त्तकं ज्ञानं निरूप्यते· तत्राभि[redacted] आशावत्। भूगो धा(ए)ऽं
लकसन्तानोयम्· भूगोलकसन्तानानधिकरणवृत्तिध्वंसप्रतियोगीकार्यत्वात्· घटवत्· यद्वा· एतत्कर्माति २८
रिक्तानि कर्माणि· एतत्स्मृतिबंधकप्रतिबध्यानि· कर्मत्वात्। एतत्कर्मवत्· नचात्र व्यभिचारशंका सर्वेषा
मेवंरूपत्वात्। अनेनैवं भावे स्वभावप्रच्यवात्+ धर्मसंकल्पाएवं भावनाज्ञानं न प्रवर्त्तकं तस्मिन्सत्यपि अ
प्रवृत्तेः· असत्यपि प्रवृत्तेश्च· कार्यत्वज्ञानं प्रवर्त्तकमिति गुरवः· तथाहि। ज्ञानस्य कृतौ जन्यायां चिकीर्षा
तिरिक्तं जनकत्वमस्ति· तस्यैव कृतिविलंबो हेत्वन्तराभावात्। चिकीर्षा च कृतिसाध्यत्वप्रकारिका कृतिसाध्य
क्रियाविषयेच्छा· पाकं कृत्या साधयामीति तदनुभवात्। सा च कृतिसाध्यताज्ञानसाध्या। इच्छायाः स्वप्रका स्व
रकधीसाध्यत्वनियमात्· अत एव स्वकृतिसाध्ये पाके प्रवर्त्तते· न त्विष्टसाधनताज्ञानसाध्या· स्वकृत्यसाध्ये एम०
पि चिकीर्षापत्तेः। स्वकृत्यसाध्यताज्ञानं प्रतिबंधकमिति चेत्· न· तदभावकारणत्वे गौरवात्· अथाभावरूप ३२

यसिद्धः कृतिसाध्यताधीरसिद्धेत्यतो न लाघवावसर इति चेत् । न । यत्र श्राद्धादनुमानाद्वा देवात्सा तत्र लाघवाव
तारात् । इच्छाया स्वप्रकारकज्ञानसाध्यत्वनियमेन कृतिसाध्यत्वज्ञानस्यावश्यकत्वात् । जनकज्ञानं तु विघटयत एव
वज्ञानस्य प्रतिबंधकत्वात् । व्याप्तिधीविघटनद्वारानुमितिप्रतिबंधकानैकांतज्ञानवत् । अन्यथा स्वकृत्यसाध्य
त्वानिष्टसाधनत्वोपेक्षणीयत्वनिःफलत्वज्ञानं प्रतिबंधकं क्रियाज्ञानमेव प्रवर्तकं कल्प्येत । ननु सनो धात्वर्थ
गोचरेच्छावाचित्वाल्लाघवाच्च कृताविच्छा चिकीर्षा सा च रेच्छाविवेष्टसाधनताज्ञानादिति चेत् । न । वह्निना सा
धयामीतिवत्तत्र कृत्या साधयामीति इच्छा कृतिपूर्वमननुभूयमानत्वात् सन्नंतवाच्यत्वेन गौरवेणाच
प्रत्याख्यात्, मपूर्वकत्वात् । किंच पाकं चिकीर्षतीत्यत्र प्राधान्येन पाकस्येच्छाविषयत्वमनुभूयते न तु कृतेः ।
धातोश्च सन्प्रत्ययाभिधेयेच्छाप्रकारवाचित्वं ओदनं बुभुक्षत इत्यत्र भोजनविषयतयौदनस्येच्छाविषयत्वानु
भवात् । इष्टसाधनत्वज्ञानेन हृच्छाविवकृताविच्छासंभवेपि कृतीच्छा न प्रवर्तिका किंतु कृतिसाध्येच्छैव । घ
टं जानातीति चिकीर्षति करोतीतिज्ञानचिकीर्षाप्रवृत्तीनामेकविषयत्वानुभवात् । अथ यद्यपि कृत्या साधयि
तुमिच्छा सा । तदा चिकीर्षितस्य पाकस्यान्यतः सिद्धौ सा नापगच्छेत् । न । कृपायविशेषसाध्यत्वेनेच्छोपायात

३४ राधीनफललाभेन निवार्यते· प्रीत्या धनलाभेपि प्रतिग्रहेणातल्लिप्सायाः अनिवृत्तेरितिचेत्· न· स्वविषयसि
34 द्धत्वस्यफलेच्छाविच्छेदस्यचोपायेच्छाविरोधित्वात्। अस्ति च तत्र पाकौदनयोः सिद्धत्वम्· अन्योदनेच्छायां पा न
कचिकीर्षा भवत्येव· प्रत्युतासिद्धत्वात् कृतावेवेच्छा न विच्छिद्येत· यदि कृतिविषयसिद्धत्वफलेच्छाविच्छेदौ
न विरोधिनौ· प्रीत्या धनलाभेपि तदधिकधनेच्छा न विच्छिद्येत तस्या असिद्धत्वात्· तत्फलेच्छायाश्च सत्वात्·
धनमात्रार्थिनश्च प्रीत्या धनलाभेपि प्रतिग्रहेणातल्लिप्सा नास्त्येव· धनमात्रस्य सिद्धत्वात्· किंचिद्विशेष
सिद्धेरेव हि सामान्येच्छाविच्छेदः अन्यथा सकलस्वविषयसिद्धेरसंभवेन विच्छेदो न स्यादेवावस्तुतस्तु क्रि
यानुकूला कृतिरिष्टोपाय इति ज्ञाने क्रियायाः कृतिसाध्यत्वमिष्टोपायत्वं च भातम्। क्रियाद्वारैव कृते
रिष्टसाधनत्वादिति तद्बोधात् कृताविव कृतिसाध्यत्वेन क्रियायामपि सैवेच्छेति चिकीर्षायां कृतिसाध्यत्व
प्रकारनैयत्यम्· अतः कृतिसमानविषयचिकीर्षात्वेन चिकीर्षायाः कृतिकारणत्वं न तु कृतीच्छात्वेन भिन्न
विषयतया गौरवात्। तथापि येन रूपेणायस्येष्टसाधनत्वं तेन प्रकारेण तत्रेच्छा· यथा स्वकेदारवृष्टित्वेन एम० ३४
इष्टसाधनत्वात् तथैवेच्छा तथा कृतिसाध्यत्वेन पाकस्येष्टसाधनत्वमतः कृतिसाध्यत्वेन तत्रेच्छा भवतीति कृतौ कृ

तिविषयेवाचिकीर्षायां नइष्टाभ्यां विलक्षणसामग्र्यन्तरकल्पनमितिचेत्.न.भवेदेवं यदि कृतिसाध्यत्वेन पा
कस्योदनसाधनतास्यात्.नचैवं गौरवात्.किंतु पाकत्वेन.सतीं कृतिं विनानेत्यसंदेहात्.वह्निनासाधयामीति
वत् कृत्यासाधयामीत्यपि पाकइष्टसाधनताज्ञानादेवेतिचेत्.न.तर्हि तत्र वह्निसाध्यताज्ञानवदत्रापि कृतिसा
ध्यत्वज्ञानं कारणमावश्यकम्.अतो चानुभवसिद्धं चिकीर्षाधीनत्वं विशेषः.तेन प्राणपंचकसंचारे जीवन
योनिप्रयत्नसाध्येन प्रवृत्तिः.अन्यथा कृतिसाध्येष्टसाधनतापदेपि तत्र प्रवर्त्तेत।ननु चिकीर्षाधीनत्वं
स्योपलक्षणत्वे उपलक्ष्यमात्रगतानतिप्रसक्तधर्माभावात्.कृतिमात्रस्य चातिप्रसंगात्तत्कृतिविशेषा
उपलक्ष्याः सत्वाच्च तदननुगमात् तदन्यननुगमः विशेषणत्वे चिकीर्षायां प्रवृत्तौ च चिकीर्षाज्ञानकारणत्वे
गौरवं प्रमाणाभावश्च.किंच.चिकीर्षासाध्यावस्थायाः कृतेः सिद्धावस्य साधनत्वविरोधेन कृतिसाध्यता
पाकादौ नज्ञायेतेतिचेत्.न.अस्तिकृतिविशेषो मानसप्रत्यक्षसिद्धो जीवनयोनियत्नव्यावृत्तश्चिकीर्षोपल
क्ष्यः।यत्र हि चिकीर्षाकारणत्वग्रहः।स च न वजातिरूपो ममत्वननुगतकारणोपाधिरूपः।एवं च चिकीर्षाधी
नत्वेन कृतिविशेषाणामुपलक्ष्यमाणानामननुगतत्वमपि।यथा गोत्वेन तत्तद्व्यक्तीनोपलक्षितामहिषादिव्यावृ
नानुगते १

३५ रत्नाधानकर्मव्यक्तिविशेषाधेनुपदेनोच्यंतेन गोत्वमपि· तथाचिकीर्षात्वमपि· एवंजीवनयोनियत्नयाद्गनकृ
35 तिविशेषाणांकृतित्वेनज्ञानंकारणमितिनानगुणानुगमः नतुकृतिसाध्येकृतिर्नेविशेषणमसत्वात्· सत्वे
वाकृतौसत्यांज्ञानंज्ञानेचकृतिरित्यन्योन्याश्रयः· नोपलक्षणमव्याप्तिप्रसंगादितिचेत्· न· कृतिर्हिज्ञा
नेविषयतयाविशेषणमेव· साध्येचपरिचायकतयोपलक्षणम्· अन्यथाऽदृष्टसाधनेपिदृष्टं नविशे
षणम[redacted]सत्वात्· नोपलक्षणमतिप्रसंगात्।लिंगज्ञानादौवाक
गतिः· नचैवंश्रमेपिप्रवृत्तिस्यात्· तस्यापिचिकीर्षाधीनकृतिसाध्यत्वात्· अत्रश्रमस्तुभोजनादिक्रिया
साध्योनतत्कृतिसाध्यः· अचिकीर्षितत्वात्· कृतेःस्वध्वंसस्साक्षात्कारातिरिक्ते चिकीर्षाविषयमात्रेजन
कत्वात्· नहिभोजनचिकीर्षाधीनकृत्यागमनंसाध्यतेइतिकेचित्· तन्न· गुरुतरभारोत्तोलनेकृतिसा य
ध्येश्रमात्स्वच्छन्दतस्यनिगडनिश्चलदेहस्यवाकृतौसत्यामुत्तोलनचलनक्रियानुत्पादेपिश्रमानुभ
वात्· कृतेरेवकारणत्वात्· नतुतज्जन्यक्रियायाः· सुखेव्यभिचाराच्च· नहिसुखंकृतिकारणंचिकी एम०
र्षाविषयः· उपायचिकीर्षाजन्याहिकृतिः· नसुखचिकीर्षाजन्या। चिकीर्षाजन्यकृतिसाध्यत्वंनश्रमेढ ३५

षयोनियत्नाद्यपितदुत्पत्तेरित्यपरे· तन्नाशनानुवधस्येष्टसाधनत्वेन चिकीर्षाजन्यकृतिसाध्यत्वात्· द्वेष·
स्य यत्नाजनकत्वात्· द्वेषसिद्धिस्तु शत्रुं द्वेक्मीत्यनुभवबलात्· यत्तु श्रमः कृतित्वेन कृतिसाध्यो न चिकीर्षा
धीनकृतित्वेन यथा चिकीर्षितश्रमे चिकीर्षाधीनकृतित्वेन कारणतास्यात्तदा चिकीर्षितमेव भोजनं कृत्या
साध्यते नाचिकीर्षितं गमनादीति न स्यात्· श्रमवद्गमनेऽपि तन्न्यत्वसंगात्· भोजनादिश्च चिकीर्षाधीनकृ प्र
तिविशेषात्· सहि कृतिमात्रव्यभिचारी तिज्जीवनयोनिकृतेस्तदनुत्पादात्· यद्वा श्रमो न भोजनं न कृतिसाध्य·
किंतु तन्निस्तरेऽत्यन्नाज्जीवनयोनियत्नादेवेति· तन्न· नहि कृतित्वेन तत्र श्रमजनकत्वं· नापि कृत्यंतरादेव श्र
मोत्पत्तिः। जीवनयोनियत्नेसत्यपि भारोद्वहनादिकमकुर्वतस्तादृशश्रमाननुभवेन तस्य श्रमाजनकत्वात्·
तस्माद्भोजनादिवच्छ्रमविशेषाणामपि भोजनादिकृतिसाध्यत्वमनन्यगतिकत्वात्सुप्तस्य स्वेदाद्यनुमित
श्रमस्तज्जन्य इति चेत्· न· स्वेदादेः श्रमान्यहेतुकत्वात्। अन्यथा जागरेऽपि तदनुवृत्तौ श्रमानुवृत्तिप्रसंगा
दिति भैवम्· स्वेच्छाधीनत्वस्य कृतिविशेषणत्वात्तच्छ्रमश्च नियमतोऽन्येच्छाधीनकृतिसाध्यः श्रमे तु स्वत्वेने
च्छाविरहात्· अत एवात्रान्येच्छाजन्यकृतिसाध्यत्वेन श्रमो नान्तरीयक इत्युच्यते· स्वचिकीर्षाधीनत्वं तु न कृतौ

तत्रेष्टसाधनत्वस्येष्टाविरोधित्वात् न च तु त्वं विभक्त्यर्थो कृतिसाध्यत्वेऽपि बलवदनिष्टासाध्यत्वेन

३६ विशेषणांगौरवात्· अन्ये तु कृतिगतं धर्मान्तरमेव दृष्टत्वं तद्विशिष्टकृतिसाध्यश्च नश्रमः। अचिकीर्षितत्वात्·
36 किंतु कृतिमात्रसाध्यः। अत एव कष्टं कर्मेति अनुभवो लोकानाम्। एवं चिकीर्षायाममैकं कृतिसाध्यश्च
नश्रमः। अचिकीर्षितत्वात्· किंतु कृतिमात्रसाध्यः अत एव कष्टं कर्मेति अनुभवो लोकानाम्। एवं चिकी
र्षायाममैकं कृतिसाध्यत्वं प्रयोजकम्· तच्च तु कृतिसाध्यत्वे सतीष्टसाधनत्वं सुखत्वं दुःखाभावत्वं चेति च
तुष्टयम्· इष्टाप्रयोजकं ममसुखत्वदुःखाभावत्वं च द्वयम्। इष्टसाध्ये सुखे हीच्छा इष्टेऽपि विषयीकरोति न
त्विष्टसाधनत्वेन चिकीर्षा नामस्तीति कृतौ चिकीर्षाजन्यत्वं विशेषणमिति कश्चित्· तन्तुच्छम्। एवं द्विविष
भक्षणं कृतिसाध्यमेव न स्यात्· जीवनयोनिकृतेस्तस्यानुपपत्तेरिति व्यर्थं विशेषणम्· स्यादेतत्· इष्टसा
धनताभ्रमाद्विषभक्षणेऽचैत्यवन्दने च चिकीर्षाजन्यकृतिसाध्यत्वमस्ति ज्ञानप्रयुक्तत्वात्कार्यत्वस्य· तथा च से
जातबाधोऽपि तत्र कार्यत्वज्ञानात्प्रवर्त्तेत तथा तस्तोऽपि भोजनमिति· ननु कृतिसाध्यतानुभवो हि तथा· अन्यथे
ष्टसाधनतास्मरणेऽपि वर्त्तेत· न चेष्टसाधनताज्ञानं वेदो वानुभावकमस्तीति चेत्· न। वस्तुतस्तत्र कृतिसा एम०
ध्यत्वे सति लिंगान्तरेण तद्वाक्ये तद्वा तदनुभवसंभवात्· लिंगाभासात्तद्वाभासाद्वा अप्रवृत्तिप्रसंगाच्चाभिदा ३६

ग्रहवादिनस्तत्वतत्रतदनुभवाभावात्॥ मैवम्॥ स्वविशेषणवत्ताप्रतिसंधानजन्यं कार्यताज्ञानं प्रवर्त्तकम्॥ तथा
हि॥ काम्ये पुरुषविशेषणं कामना ततः काम्यसाधनताज्ञानेन यागपाकादौ कार्यताज्ञानं नित्ये च कालशौ
चादि स्वविशेषणं तथा चैतत्संध्यायामहं कृतिसाध्यसंध्यावंदनः संध्यासमये शौचादिमत्वात्॥ पूर्वसंध्या
यामहमिवेति कार्यताज्ञानं शौचादिस्वविशेषणज्ञानजन्यम्॥ तदुक्तम्॥ तेसकार्ये विशेषः पुरुषविशेषण
वगतः प्रवृत्तिहेतुरिति॥ संज्ञातवाधस्य च विषमत्तणो चैत्यवंदने च भ्रमदशायामिव नेष्टसाधनताज्ञानमस्ति
येन तज्जन्यकार्यताज्ञानात्प्रवर्त्तेत॥ तृप्तस्य च तत्तोकामनाविशेषणेष्टसाधनताज्ञानाभावान्नतथावोधः॥ अ
न्येत्वात्मनोजीवित्वप्रतिसंधानजन्यं श्रमे कृतिसाध्यताज्ञानं संभवतीति जीवनव्यतिरिक्तत्वस्वविशेषणे [illegible]
[illegible]विशेषणमिति॥ तन्न॥ श्रमे स्वेच्छाधीनकृतिसाध्यत्वाभावात्॥ इष्टसाधनतालिंगकार्यताज्ञानं प्रवर्त्तक
मित्यपरे॥ तन्न॥ नित्ये तदभावात्॥ ननु विषभक्षणव्यावृत्तमिष्टसाधनत्वमेव कृतिसाध्यताज्ञाने विषयतया विशे
षणमस्तु स्वविशेषणवत्ताज्ञानजन्यत्वापेक्षया लाघवात्॥ किंचोपायविषयाचिकीर्षा इष्टसाधनताज्ञानसा
ध्या॥ उपायेच्छात्वात्॥ वृष्टीच्छावत्॥ भोगचिकीर्षायां तदभावादप्रयोजकमिष्टसाधनत्वमिति चेत्॥ न॥ तत्रापि स्व

३१
37

विशेषणापीजन्यत्वाभावेन तत्र तस्याप्रयोजकत्वात्। कृतिहेतुचिकीर्षायां तत्प्रयोजकमनं च भोगचिकीर्षा तथाऽ
पायचिकीर्षा त एव कृतिसंभवादिति चेत्। तुल्यमिति। मैवम्। साध्यत्वसाधनत्वयोर्विरोधेनैकत्र ज्ञातुमशक्य
त्वात्। असिद्धावस्थायां हि साध्यत्वं सिद्धतादशायां च साधनत्वमसिद्धावस्थायां कार्यानुपपत्तेः। तथा च पाका तदन्याकारसिद्धतार प्रमाणातत्
देः सिद्धत्वसिद्धत्वज्ञाने साध्यत्वसाधनत्वग्रहः। न चैकमेकेनैकदा सिद्धमसिद्धं चेति ज्ञायते। न च स्वरूपगततौ
साध्यत्वसाधनत्वयोरतो न विरोध इति वाच्यम्। यदि हि स्वरूपनिबन्धनं तदुभयं तत्स्वरूपसद्वैवासिद्धमसिद्ध
चेति स्यात्। भिन्ननिरूपितत्वेऽपि तयोः सिद्धत्वासिद्धत्वे अनवगम्याज्ञानात्। तस्मात्समयभेदोपाधिक एव त
दुभयं तत्संबन्धः पाके। इदानीं साध्यत्वमग्रे साधनत्वं ज्ञायत इति चेत्। न। इदानीमग्रिमपदार्थयोर्नानात्वा
दननुगमेन व्याप्यग्रहात्। शब्देन तथा प्रतिपादयितुमशक्यत्वात्। गौरवाच्च। न च कृतितः सिद्धमिष्टसाध
नमिति ज्ञानाच्चिकीर्षा न हि सिद्धं कश्चिच्चिकीर्षति कृतेः पूर्वं कृतितः सिद्धमिति ज्ञानाभावाच्च। नव कृतिसाध्यत्वे
न पाकादेरिष्टसाधनत्वात्साधनत्वमपि साध्यम्। न हि कृतिसाध्यत्वेन पाकस्यौदनसाधनतेत्युक्तम्। तस्मा एम०
त्कृतक्रियमाणविलक्षणं पाकत्वं नतरभविष्यन्तानुरूपं कृतिसाध्यत्वं चिकीर्षाप्रयोजकम्। तादृशं च साधनत्व ३१

विरोध्येवा किंच · साधनत्वस्य सिद्धमात्रधर्मत्वात् साधनत्वज्ञानमिच्छाविरोधि · नहि कश्चित् सिद्धमिच्छतीत्यु
क्तम् । एतेन दृष्टाद्यविघ्नसाधनताज्ञानमुपायेच्छाकारणत्वेन निरुक्तमिति निरस्तम् · कथं तर्हि दृष्टाद्य
विघ्नतत्साध्येष्टज्ञानादिति गृहाण · अन्ये तु सुखदुःखाभावतत्साधनेष्विच्छाविरोधिप्रयोजकमनुगतमु
द्देश्यत्वमपुरुषार्थपदवेदनीयम् धर्मान्तरमस्ति · अनुगतकार्यस्यानुगतकारणनियम्यत्वात् । तदेव दुःख
तत्साधनव्यावृत्तं सुखतत्साधनादौ चिकीर्षाप्रयोजकमिति · न च दुःखविरोधित्वमेव तथास्त्विति वाच्यम् · स
हानवस्थाननियमविरोधस्यासंभवात् · वध्यघातकभावस्यैकसमये सामानाधिकरण्याभावस्य च यत्नादिसा
धारणत्वादिति · तन्नातद्ज्ञानेपि सुखत्वज्ञानादिच्छोत्पत्तेः · नहि खलु विज्ञाते धर्मान्तरज्ञानं विनेच्छा तथात्वे स्वतः
प्रयोजनत्वहान्यापत्तेः । तदेव हि स्वतः प्रयोजनं यदधिगतं सत्स्वत्वरतितयेष्यते · किंच · अनुगतधर्मकल्पनापिका
रणे · न च सुखादीच्छाकारणमनागतत्वात् । तृणारणिमणिन्यायाद्वा तथैवेच्छा जायताम् । कृतिसाध्यत्वं च कृतौ
सत्यामग्रिमक्षणे सत्त्वं न कृतिं विनात्मसाधारणं चैतत् · कृतिसाध्यत्वं किंतु तदवगमः । तर्हि सुखादिज्ञानेन तत्स्व
रूपसद्देवेच्छाप्रयोजकमस्तीति चेत् · न · यथा ह्युद्देश्यत्वं सुखत्वज्ञानादिच्छयापद्यते । अन्यतरत्वात् · ९ न कृतितः ए

३८ 38

वींननुकृतौ नष्ठायां सत्यपि धर्मी न कार्ये स्तथा च कथं कार्येऽपूर्वे कामिनोन्वयः क्षणिकत्वेन क्रियातुल्यत्वादि
ति। न। यद्धृतिकाम्यसाधनत्वं तत्र कार्यताबुद्धेः प्रयोजकत्वात् न तु कार्यताविशिष्टस्य काम्यसाधनतेति व्याप्तिः।
ननु पाकादौ कृतिसाध्यताज्ञानं न प्रत्यक्षेण कृत्यनंतरं पाके सति कृतिसाध्यताज्ञानं तस्मिन्सति कृतिरित्यन्योन्याश्र
यात्। कृतिसाध्योन्नीयौ चिकीर्षाकृत्योरसंभवाच्चेति चेत्। न। पाको मत्कृतिसाध्यः मत्कृतिं विनाऽसत्वे सति मदि
ष्टसाधनत्वात् दैवाद्याधीनत्वे सति मदिष्टसाधनत्वाद्वा मद्भोजनवदित्यनुमानात् कृतिसाध्यताज्ञानम्। य
स्य यदिष्टसाधनं यत्कृतिं विना यदा न सिध्यति तत्तदा तत्कृतिसाध्यमिति व्याप्तेः। असिद्धस्येष्टसाधनत्वाभावात्।
बलवदनिष्टाजनकत्वं च लिंगविशेषणं तेन मधुविषसंपृक्तान्नभोजनेन न व्यभिचारः। अतीतपाके कृतिसा
ध्यतोन्नीयौ च न व्यभिचारः। सामान्यतस्तस्यापि कृतिसाध्यत्वात्। अतीततादृशयांचातीतौदने च्छाविरहेणेष्ट
साधनत्वाभावात्। अत एव निदाघदूनदेहो वर्षति वारिदे तोयदान्तोयलाभसंभावनायां वा सरोवगाहनेन
प्रवर्त्तते। इष्टसंतापशान्तिसाधनस्यापि तोयसंबंधस्य स्वकृतिं विनापि सिद्धिप्रतिसंधाने लिंगाभावेन स्वकृति ण्म०
साध्यताज्ञानाभावात्। यदि च मत्कृतिं विनासंभवतीति प्रतिसंधत्ते तदा प्रवर्त्तते। यस्य संतापशांतिमात्रमिष्टं ३८

सरोवगाहनस्येष्टसाधनत्वमेव तत्प्रतिसंधत्तेः उपस्थितत्वाद्विरोपितत्वसंभवादिति केचित् तन्न तोयसंबं
धत्वेन संतापशान्त्यपशान्तिसाधनत्वं तस्य च सरोवगाहनेपि सत्वात् अन्यथा द्विष्टपि रोपितत्वसाधनत्वं न स्या
त्सरोवगाहनादेव तत्सिद्धेः। कार्यसाधनत्वं च कृतिसाध्यत्वेन लिंगम् पाकादाविव ओदनादावपि प्रवृत्तेः।
एवं कृतिसाध्यत्वज्ञाने हेत्वभावात् नन्वेवं लिंगज्ञानमेव प्रवर्त्तकमस्तु प्राथमिकत्वात् आवश्यकत्वाच्च न
च लाघवात् कृतिसाध्यत्वज्ञानं तथा कृतिसाध्यत्वानुमितौ तदा मानाभावेन युगपदुपस्थित्यसंभवात् प्रवृ
त्तिसामग्र्या अनुमितिप्रतिबंधाच्चेति चेत् न लिंगज्ञाने कृतिसाध्यत्वाप्रकाशेन तत्प्रकारकचिकीर्षायां निवेशो
तस्याहेतुत्वात्। अत एव लिंगात् ज्ञानमपि न प्रवर्त्तकम् ननु पाकादिः कृतः क्रियमाणो वा न पक्षः तस्य कृ
तिसाध्यत्वे बाधात् नाप्यनागतः भविष्यत्पाके मानाभावेनाश्रयासिद्धेः पाकत्वम् विष्यद्वृत्तिसामान्यत्वाद्रू
त्ववदिति मानमिति चेत् न मानाभावेन गोत्वेपि तस्याप्रसिद्धेः पाकमात्रं पक्षः इति चेत् न मात्रार्थो य
दि पाकत्वं तदा बाधो लिंगासिद्धिश्च सर्वपाकपरत्वे तस्य सिद्धभागे बाधः अनागतभागे वाश्रयासिद्धेः।
वर्त्तमानमानाद्युदासीनः पाकः पक्षः पाकसामान्ये च कृतिसाध्यत्वं न बाधितमित्यपि नासिद्धस्य पक्षत्वं ना

३९ 39

सिद्धे स्येत्यनुमिते, सिद्धविषयत्वे बाधात्। भिन्नविषयत्वे चासिद्धविषये च्छाप्रवर्त्याद्यनुत्पादकत्वाच्च। कृतकि
यमाणसाधारण[redacted]कृतिसाध्यत्वज्ञानादेवासिद्धविषयाचिकीर्षा कृतिश्चोत्पद्यते। अनन्यगतिक
त्वेन तथाकारणस्वभावकल्पनादिति चेत्। तर्हि यादृशं कृतिसाध्यत्वं चिकीर्षायां प्रकारस्तादृशं ज्ञानेनास्मी
त्यन्यप्रकारकज्ञानादेव चिकीर्षा स्यात्। तथा च लिंगज्ञानमेव प्रवृत्तिहेतुरस्तु प्राथमिकत्वात्। यत्तु स्मृत
पाके कृतिसाध्यत्वासंसर्गाग्रहात्प्रवृत्तिः स चासंसर्गाग्रह इष्टसाधनताज्ञानादिति। तन्न। स्मृतपाकस्य
सिद्धत्वेन तत्र कार्यत्वासंसर्गाग्रहेऽनुमानबाधात्। स्मृतपाकस्य सिद्धत्वं तदा न गृह्यत इति चेत्। तर्हि स्मृत
पाकस्य सिद्धत्वाग्रहे ओदनार्थी पाके न प्रवर्त्तेत। सिद्धौदनोपि पाके तत्तोपि भोजने प्रवर्त्तेत। तत्र पाकादौ
सिद्धत्वग्रहात्तदसंसर्गाग्रह इति चेत्। तुल्यम्। अपि च स्मृतपाके कार्यत्वासंसर्गाग्रहो विद्यमाना संसर्गा
ग्रहो द्विसंवादिनी प्रवृत्तिः स्यात्। किं च एवं सिद्धपाकज्ञानादज्ञातेऽसिद्धे पाक इच्छाप्रवृत्ती स्यातामिति। अत्र
ब्रूमः पाके कृतिसाध्यत्वं सिद्ध्यसिद्धे बाधादनागतपाकमादाय सिद्ध्यति। पक्षतावच्छेदकधर्मसामानाधि एम०
करण्यं साध्यमानस्य लिंगेन सिद्ध्यतीत्यनुमाने क्लृप्तत्वात्। यथा प्रसिद्धवह्निबाधे पि च वह्निमात्रं न बाधितमि ३९

त्यप्रसिद्धो वह्निः सिध्यति तथा प्रसिद्धपाके ऽबाधे ऽपि पाकमात्रेन बाधितमित्यसिद्धपाकमादाय सिध्यति अप्र
सिद्धयोः पूर्वसाध्ययोः सिद्धावविशेषात् तस्माद् असिद्धस्य क्वचित्सिद्धे सिद्धे सिद्धस्य च क्वचित् अप्रसिद्धस्य वा
सिद्धे सिद्धे स्तेनानुमान्त्रिधा अन्यथाकृतिसाध्येष्टसाधनतापक्षे ऽपि पाकादौ कृतिसाध्यत्वं कथमवगम्यते।
किं चातवापीष्टसाधनताज्ञानाकथं रक्षादावेषा सिद्धत्वस्येच्छाविरोधित्वात् अनागतस्य ज्ञातुमशक्य
त्वात् अत एवासिद्धासिद्धविषयत्वनिरासेन सुखादिज्ञानात्फले ऽपि नेच्छेति न रक्षादाविष्टसाधनताऽपि
न च रक्षादित्वे साध्येष्टज्ञानाद्रक्षामंशाक्यत्वात् इच्छायाः सिद्धासिद्धरक्षादिफलविषयत्वविकल्पया
सात् अथ सामान्यलक्षणप्रत्यासत्त्या रक्षादित्वेन सुखादित्वेन च सिद्धासिद्धरक्षादितत्फलविषयकं ज्ञा
नमुत्पन्नं तेन सिद्धविरोधिनं त्यक्त्वाऽसिद्धविषये इच्छोत्पद्यते यदि च सामान्यलक्षणा नास्ति तदा येन रूपेणेष्ट
साधनत्वग्रहस्तेन रूपेण ज्ञाते ऽन्वयव्यतिरेकाभ्यां तादृशज्ञानस्य तादृशेच्छाजनकत्वावधारणात् सुखेच्छा
यामप्येवमिति चेत् तर्हि ममापि पाकत्वावच्छेदेन कृतिसाध्यताज्ञानादनागते चिकीर्षा तच्च ज्ञानं सकलपा
कविषयं सन्निकृष्टपाकविषयं वेत्यन्यदेतत् बालस्य च स्तन्यपानाद्यग्रहेच्छाप्रवृत्तिर्जीवनादृष्टोद्बोधितज्ञन्मा

...सपते ५२

४० तदसंस्कारजन्यात्स्तनपानं कार्यमिति स्मरणात् तदापीष्टसाधनतास्मरणात्तत्रप्रवृत्तिरनन्यगतिकत्वात् न चज
40 न्मांतरेपि पर्य्यनुयोगः जन्मधारणाया अनादित्वात् प्रत्यक्षानुमानमूलत्वाच्च नान्धपरंपरा वस्तुतस्तु
ष्वकरणतया बालो दुग्धमनुभवन्निरोधितया सुखं स्मरति ततः सुखत्वज्ञानात्सुखवृत्तिकार्य्यत्वम् सुख
ग वृत्तितयान्तरंगत्वात् न तु स्तनपानमिष्टसाधनमिति स्मरणं सुखवृत्तित्वेन बहिरंगत्वात् । सुखकार्य्यत्वं
च स्तनपानद्वारा जन्मांतरानुभूतमिति कार्यत्वस्मरणे स्तनपानमिति विषयः तेन स्तनपाने कार्य्यत्वज्ञा
नादेव प्रवृत्तिः इष्टसाधनताज्ञानस्य तदानीं सामग्र्यभावात् एवं चाद्यप्रवृत्तौ कार्यत्वज्ञानं प्रयोजकं क्लृ
प्तमित्यग्रेपि तदेव प्रवर्त्तकं क्लृप्तत्वात् । नवीनास्तु ममेदं कृतिसाध्यमिति ज्ञानं न प्रवर्त्तकम् अनागतवि
षये प्रत्यक्षानुमानयोरसंभवात् किंतु यादृशस्य पुरुषस्य कृतिसाध्यं यदिष्टं तादृशत्वमात्मनः प्रतिसंधा
य तत्र प्रवर्त्तते यथा ह्योदनकामस्य तत्साधनताज्ञानवतस्तण्डुलाद्युपकरणवतः पाकः कृतिसाध्योहम
पि तादृश इति ज्ञानात्प्रवर्त्तते पाके एवं चान्यकृतपाके कृतिसाध्यत्वज्ञानमात्मनः प्राक्कृतिसाध्यत्वप्रयो एम०
जकविशेषणवत्त्वज्ञानं च प्रवर्त्तकम् अन्यत्रापि प्रवृत्तिरेवमेवेत्यनादिनैव अत एव संजातबाधश्चेत्यवद ४०

नेविषभक्षणेचनंप्रवर्त्तते·इष्टसाधनताज्ञानवतोहितत्कृतिसाध्यम्·नचसंज्ञातबाधस्तत्रेष्टसा
धनताज्ञानवान्·एवंतृप्तीच्छावतोभोजनंकृतिसाध्यम्·तृप्तश्चनतृप्तीच्छावृत्त्वमात्मन्यवैतीतिनभोजनेप्र
वर्त्तते।अतिनवीनास्तुयादृशस्येत्यादावविगीतत्वंकृतौविशेषणमाहुः·संज्ञातबाधस्तुविषभक्षणंचैत्य
वंदनंविगीतकृतिसाध्यत्वेनैवजानातीत्यत्रनप्रवर्त्तते प्रवृत्तिविषयश्चसामान्यतः·कालासंभिन्नः·पा
कादिर्ज्ञायते·प्रवृत्तिमहिम्नाचानागतपाकसिद्धिः।चिकीर्षाचकालासंभिन्नविषयानतुभाविनंकृत्या
साधयामीत्याकारेति·अत्रोच्यते।विषभक्षणादिव्यावर्त्तकंकृतिसाध्यत्वज्ञानेइष्टसाधनत्वंविषयतया
अवच्छेदकंलाघवात्·नतुस्वविशेषणवत्ताप्रतिसंधानजन्यत्वंगौरवात्।नचसिद्धासिद्धावस्थयोःसा
ध्यत्वसाधनत्वयोर्विरोधः·निर्विशेषितयोस्तयोरविरोधात्·पाकोसिद्धः·साध्यः·सिद्धःसाधनंचेत्यनु
भवात्·तदासाध्यत्वंहितदासाधनत्वविरोधि·नियमतस्तेनैवतस्यप्रतिक्षेपेणसहानवस्थाननियमात्·
नतुसाधनत्वस्यान्यदासाधनत्वस्यवा·तयोरप्रतिक्षेपात्·अन्यदासाध्यत्वेपिसाधनत्वमस्त्येवासामान्या
भावेविशेषाभावप्रसंगात्·एवंतदाअसिद्धत्वस्यतदासिद्धत्वविरोधिनियमतस्तस्यैवप्रतिक्षेपात्·नतु [illegible]

४१ सिद्धत्वमात्रं· अन्यदापि तत्र सिद्धत्वाभावप्रसंगात्· निर्विशेषितयोर्विरोधे च सिद्धत्वासिद्धत्वयोरन्यतर
41 देवपाकादौ स्यान्न तु समयभेदे। उभयमान च तदा कृतिसाध्यत्वे सति तद्दृष्टसाधनत्वज्ञानं प्रवर्तकम्
। अत एव वाजपेये न यजेतेत्यत्र यागस्य करणावस्थायां सिद्धत्वेन न वाजपेयस्य साध्यता· एकदा तयोर
विरोधादिति कर्मनामधेयत्वं· न तु करणस्य सिद्धत्वेन साध्यत्वविरोधः· यागत्वरूपेतयोस्सत्त्वात्· अ
थाविरुद्धयोरवच्छेदभेदमादायैकत्र प्रतीतिस्स्यात्· न च कृतिसाध्यत्वेष्टसाधनत्वयोः समयभेदमादाय
प्रतीतिरस्ति· तथा लिंगाभावादिति चेत्· न· साध्यत्वसाधनत्वयोरविशेषस्योक्तत्वात्· एवं सिद्धत्वासि
द्धत्वयोर्भावाभावरूपत्वेपि न विरोधः। एकधर्मिगतत्वेन मानसिद्धत्वात्· तस्मात्संयोगतदभावयोरिव
येन प्रकारेण ययोर्विरोधस्तेन तयोरेकधर्मिगतत्वं न प्रतीयते न तु रूपान्तरेणापीति· अपि च· यदि सा
साध ध्यत्वं नत्वयोर्विरोधस्तदा तत्वापीष्टसाधनत्वेन कार्यसाधनत्वेन वा कार्यत्वं नानुमीमेत हेतुसाध्य
योर्विरोधे न सामानाधिकरण्याभावेन व्याप्त्यसिद्धेः· पक्षे साध्यसाधनयोरन्यतरसत्त्वे बाधासिद्ध्योर एम०
न्यतरप्रसंगाच्च· न च वाच्यमिदानीमकृतिसाध्यत्वं साध्यम्· अग्रे मदिष्टसाधनत्वं हेतुः देवाघ ४१

नष्टीनत्वे सति यद्यमदिष्टसाधनं तदिदानीमत्कृतिसाध्यमिति व्याप्तेः तथा च समयभेदमादाय साध्यत्व
साधनत्वयोरविरोध इति इदानीमग्रिमपदार्थयोर्नानात्वादननुगतरूपाभावेन व्याप्तेरग्रहात् पाकत्वायेना
न्यत्रापि तत्तत्समयातभावेन साध्यत्वसाधनत्वयोरप्रतीतेः प्रतीतौ वा ममापीदानीं कृतिसाध्यत्वे सत्यग्रे इ
ष्टसाधनमिति ज्ञानं प्रवर्त्तकमस्तु न च पाके साध्येष्टकत्वेन कृतिसाध्यत्वमनुमेयम् असिद्धावस्थावतो हि
पाकादिष्टानुत्पत्तेः पाकस्य सिद्धत्वमवगम्य तत्साध्यत्वमिष्टस्यावगन्तव्यम् असिद्धत्वमवगम्य कृतिसाध्यत्व
मिति सिद्धत्वासिद्धत्वयोर्विरोधोऽत्रापि द्वयोः अपि च स्वविष्टे बलाधीनत्वकार्यताज्ञानाभावात् सुखेक
र्ष चिकीर्षा न हि कृतिसाध्यताज्ञानमात्रात्सा सञ्जातबाधस्य विषभक्षणादौ चिकीर्षाप्रसंगात् अथोपा
यचिकीर्षायां तत्कारणम् इच्छाकारणं सुखत्वज्ञाने कृतिसाध्यत्वं यदा विषयस्तदा सुखे चिकीर्षा नो चे
दिच्छामात्रमिति द्वयमेव चिकीर्षाहेतुरिति चेत्तात तर्हीच्छाहेतुज्ञाने यदा कृतिसाध्यत्वं भासते तदा चिकीर्षा नो
वेदिच्छामात्रमित्येव सुखे तदुपाये चिकीर्षाकारणमस्तु लाघवात् सुखत्वज्ञानवदिष्टसाधनताज्ञानस्या
पीच्छाकारणत्वात् अत एव पाकस्येष्टसाधनताज्ञाने कृतिसाध्यत्वं विषय इति चिकीर्षाकारणमस्तु

४१ यत्वात्ः सुखत्वज्ञानवदिष्टसाधनताज्ञानस्यापीच्छाकारणत्वात्॥ अत एव पाकस्येष्टसाधनताज्ञाने कृतिसाध्य
त्वं विषय इति चिकीर्षा न तु इच्छादिज्ञाने तद्विषयत्वमितीच्छामात्रम्ः सुखचिकीर्षायामिच्छायाः कारणज्ञाने
कृतिसाध्यताविषयके चिकीर्षाजनकत्वावधारणात्ः अन्यथा तत्र चिकीर्षानुत्पत्तेः। वस्तुतस्तु उपायचिकी
र्षाऽभीष्टसाधनताज्ञानसाध्या उपायेच्छात्वात्ः तृप्तीच्छावत्ः न च भोगचिकीर्षावत्तेन विनापि स्यादित्यप्रयो
जकत्वम्ः उपायेच्छायास्तदन्वयव्यतिरेकानुविधानात्ः इष्टेः स्वतोऽसुखत्वेनेच्छानुत्पत्तेः अनुगतोपा
येच्छायामनुगतस्य प्रयोजकत्वे संभवति बाधकं विना त्यागायोगाच्च। न च चिकीर्षान्यत्वे सत्युपायेच्छात्वमि
च्छात्वं वा तज्जन्यत्वे प्रयोजकं गौरवात्। सुखेच्छायां तदभावाच्च। एवं चोपायचिकीर्षायामिष्टसाधनत्वज्ञा
ने ध्रुवे अतिप्रसंगवारणार्थं कृतिसाध्यत्वप्रकारकत्वनिर्वाहार्थं च कृतिसाध्यत्वमपि विषयतावच्छेदक
मस्तु। न तु तद्विहाय तन्मात्रं लघुकारणं विना कार्यानुत्पत्तेः। अत एव स्तनपानप्रवृत्तावप्युपायेच्छाकारण
त्वेन गृहीतस्येष्टसाधनत्वज्ञानस्यापि कल्पनम्ः दृष्टानुरोधित्वात् कल्पनायाः ननु साधनत्वमिच्छाविरो ग्र०
धितस्य सिद्धधर्मत्वात् इच्छाद्येतत्साध्येष्टज्ञानादिष्वेति चेत्ः न। निर्विशेषितयोः सिद्धत्वासिद्धत्वयोरविरो ४१

धेनेष्टसाधनत्वयोरविरोधात् तदासिद्धत्वं तदासिद्धत्वं चनेष्टसाधनत्वयोः प्रयोजकमिति तथा नत्वायतए
व। यत्तु तत्साध्येष्टज्ञानादृष्टादादिष्टेति तन्नुच्छम्। असिद्धावस्थादृष्टादेरिष्टानुत्पत्तेस्तस्यावश्यं सिद्धत्व
२७ मवगंतव्यमिष्टानुरोधित्वाच्चासिद्धत्वमिति तत्रापि विरोध एव। इष्टोसत्यामिष्टंतयाविनेत्यन्वयव्यतिरेकय
हस्यरष्टिसिद्धत्वमादायरष्टिनिरूपितेष्टसाध्यकत्वग्राहकत्वात्। किंच चिकीर्षाजन्यकृतिसाध्यं मण्डली
कारणमित्यर्थप्रतिपादकं मण्डलीकुर्यादिति वाक्यप्रमाण्यस्याद्विषयाबाधात्। एतेन नवीनमतमपास्तम्।
परस्य हि कृतिसाध्यत्वौदनकामनावत्वेष्टसाधनताज्ञानानां ज्ञानं तथा मनओदनकाममावत्वेष्टसाध
नत नताज्ञानस्य ज्ञानं न प्रवृत्तिकारणं गौरवात्। किंतु मत्कृतिसाध्यैसत्वे समैति मदिष्टसाधनताज्ञानमेव ल
लाघवात्। यथाश्च साध्यत्वसाधनत्वयोर्न विरोधो नागतस्य पाकादेः कृतिसाध्यताज्ञानं च तथोपपादि
तमेव। किंच परकृतिसाध्यत्वमज्ञात्वापि स्वकृतिसाध्येष्टसाधनज्ञानात्स्वकल्पितलिप्यादौ यौवने कामो
द्रेकात्संभोगादौ प्रवृत्तेश्च तदेव प्रवर्तकम्। वस्तुतस्तु सिद्धविषयककृतिसाध्यताज्ञानात्कथं पाकं कृत्वा सा
धयामीतीच्छा। सिद्धेरिच्छाविरहात्। असिद्धस्याज्ञानात्। अपसिद्धविषयादेव कृतिसाध्यताज्ञानादसिद्धवि

४३ यथाकृतिसाध्यत्वेनेच्छा जायते इच्छाया असिद्धविषयस्वभावत्वात् एकप्रकारकत्वेन ज्ञानचिकीर्षयोः कार्य
43 कारणभावो न त्वेकविषयत्वे सति गौरवात् इच्छाया अनागतविषयत्वात्तस्य चाज्ञानात्तथाकल्पनात् सुखा
दीच्छायामप्येवमिति चेत् न असिद्धविषयेच्छानुरोधेनानागतज्ञानोपायस्य दर्शितत्वात् अस्तु वेवं तथा
पि कृतिसाध्यताज्ञाने इष्टसाधनत्वमेव प्रावर्तकमस्तु स्वपरकीयेष्टसाधनताज्ञानस्य फलकामनाज्ञाना
पेक्षया लघुत्वात् ज्ञानज्ञानस्य फलकामनाज्ञानस्य च हेतुत्वे मानाभावाद्वा नन्वास्तु स्वकृतिसाध्यताज्ञान
मेव प्रवर्तकम् तेन स्वकृत्यसाध्ये वृष्ट्यादौ कार्य्यांच कृषीवलस्य न प्रवृत्तिः नच संजातवादस्य विषभक्ष
प्र णे प्रवृत्तिप्रसंगः स्वकृतिसाध्यत्वज्ञानविषये इष्टत्वस्य स्वरूपसतः प्रवृत्तौ सहकारित्वात् नच संजात
बाधस्य विषभक्षणादाविच्छास्ति इष्टसाधनत्वेनाज्ञानात् अतीतभोजनेऽप्यत एव न प्रवर्तते तृप्तेः
सिद्धतयेच्छाविरहेण भोजने तदुपाधिकेष्टत्वाभावात् अतीततृप्ताविच्छा नास्तीति तत्साधनेपीष्टत्वाभावा
देव न प्रवृत्तिः नचैवं पाके न प्रवर्तेत तस्य स्वारसत इष्टत्वाभावादिति वाच्यम् इष्टसाधनत्वज्ञानेन तस्या राम०
पीष्टत्वात् हन्तैवं प्राथमिकत्वादिष्टत्वार्थमवश्यापेक्षणीयायाः कृतिसाध्यत्वे सतीष्टसाधनताज्ञानमेव चिकी ४३

र्षाकारणमस्त्विति चेत् न इष्टसाधनत्वाभावेपि भोगे चिकीर्षासत्त्वात्तस्यां स्वकृतिसाध्यत्वज्ञाने सतीष्टत्वमेव
कारणं न त्विष्टसाधनत्वं व्यभिचारात् पाकादौ तदन्वयव्यतिरेकावपीष्टत्वोपक्षीणौ एवं भोगेपि प्रवर्त्तेतेति चे
त् न इष्टसाधनतापन्नेपि मुक्तिरूपेष्टसाधने सुखे प्रवर्त्तेतेति तुल्यम् सुखे चिकीर्षा भवत्येव कृतिस्तु न भ
वति कृतेः सिद्धवत्त्वासिद्धक्रियाविषयत्वनियमादिति चेत् तुल्यम् तस्मात्स्वकृतिसाध्यत्वं विधिरिष्टत्वं सहका
रीति मैवम् इष्टसाधनताज्ञानस्योपायेच्छायां हेतुत्वावधारणात् तत्स्यात्तज्ज्ञान्यत्वनियमात् । इच्छायाः स्ववि
षयेच्छानुत्पादकत्वनियमाच्च ननु सिद्धौदनः कुतः पाकेन प्रवर्त्तते ओदनमात्रस्य सिद्धत्वेनेष्टत्वाभावात्
अत एवातीतभोजनादौ न प्रवर्त्तते । अतीतत्वस्याद्वाविच्छाविरहात् ननु सामुद्रिकविदाख्याते भाविनि यौव
राज्ये भोगसाधने स्वकृतिसाध्यत्वे सतीष्टसाधनत्वज्ञानात् कुतो न प्रवर्त्तते भाविराज्यस्यासिद्धत्वात्प्रवृत्तेः
सिद्धविषयत्वनियमात् राज्योपायापरिज्ञानाच्च तत्परिचयेपि प्रवर्त्तेत एव देवताराधनादाविति चेत् न । सिद्धे
चिकीर्षाविरहेण यज्ञादावप्यप्रवृत्तिप्रसंगात् देवताराधनादेरप्यसिद्धत्वेन तत्राप्रवृत्तिप्रसंगाच्च किं च रा
ज्योपायापरिचये तत्रमाप्रवर्त्तिष्टः स्वकृतिसाध्येष्टसाधनत्वेन ज्ञाते राज्ये प्रवृत्तिप्रसंगे किमायातं नहि कृति

साध्येष्टसाधनत्वेन ज्ञातेपि तदुपायज्ञानं तत्र प्रवर्त्तकं गौरवाद्भिन्नविषयत्वाद्वेति चेत् मैवम् यौवने हितावस्थ
वर्त्तत एव राज्ये बाल्ये तु राज्योपायमकृत्वा मत्कृत्येदानीं राज्यं न सिध्यतीति स्वकृत्यसाध्यताज्ञानादेव न प्रवर्त्तते य
थातंडुलं विना पाके स्वकृत्यसाध्यताज्ञानात् राज्योपाये तु स्वकृतिसाध्येष्टसाधनत्वेन ज्ञाते देवताराधनादौ प्र
वर्त्तत एव अत एव व्रीहिवघातमकृत्वा मत्कृत्या पुरोडाशस्तमकृत्वा यागस्तमकृत्वा एवं साधयितुं न शक्य
त इति क्रमशोवघातादौ प्रवर्त्तते न तु युगपत् असिद्धस्य सिद्धक्रियाविषयस्वभावत्वात्प्रवृत्तेः यागानं
तरं चैतान् एवं प्रवर्त्तते कृत्यंतरं विनैव यागकृतितस्तत्संभवात् इष्टसाधने चेष्टोत्पत्तिनांतरीयकदुःखा
धिकदुःखाजनकत्वविशेषणम् न तु तज्ज्ञानाभावः कारणं किंतु तदेव विषयतया कारणतावच्छेदकं ला
घवादिति तेन मधुविषसंपृक्तान्नभोजने न प्रवृत्तिः परेणापि प्रवृत्ति एवं लिंगविशेषणत्वेनान्यथा वात
ज्ञानविनियोगस्वीकारात् एवं चाल्पायाससाध्यादिष्टोत्पत्तिसंभवे बहुआयाससाध्ये न प्रवृत्तिः अत एव
कृतस्वर्गफलत्वेपि बहुवित्तव्ययायाससाध्ये ज्योतिष्टोमादौ फलभूमा कल्प्यते अन्यथा अल्पायाससाध्य एम०
देवस्वर्गसिद्धिसंभवे तत्राप्रवृत्तावननुष्ठानलक्षणमप्रामाण्यं तद्विधेः स्यात् बलवदनिष्टाननुबंधित्वं च ४४

नविशेषणम्· बहुवित्तव्ययायाससाध्ये बहुतरदुःखस्याप्यबलवत्त्वं क्वचिदल्पदुःखस्यापि बलवत्त्वमित्य
नुगतस्य तस्याभावात्· न चेच्छापेक्षया निकृष्टस्याधिकत्वं बलवत्त्वं तस्याप्युक्तातिरिक्तस्याननुगमात्। आस्ति
कस्य निषिद्धत्वेन ज्ञातेऽपि प्रवृत्तौ रागद्वेषयोरुत्कटत्वेन नरकसाधनत्वज्ञानानिरोधात्· ननु न कलञ्जं
भक्षयेदित्यत्र विध्यर्थनिषेधानुपपत्तिः। तद्भक्षणस्य तृप्तिरूपेष्टसाधनत्वात्· न चास्य रागविषयत्वेऽप्युदास न
लक्षणया विरोध्यनिष्टसाधनत्वबोधनम्। नञोऽसमस्तत्वात्· क्रियासंगतत्वेन प्रतिषेधवाचकत्वुत्य
तेश्चेति चेत्· नाविशेष्यवति विशिष्टनिषेधस्य सविशेषणे हीति न्यायेन विशेषणनिषेधपर्यवसायि
उ तया कलञ्जभक्षणमिष्टोत्पत्तिनान्तरीयकदुःखातिरिक्तदुःखसाधनमिति न कलञ्जं भक्षयेदित्यनेन बोध
न नात्· इष्टसाधनतावाचकस्य विधेः सामान्येन निषेद्धानुपपत्तेर्बलवदनिष्टाननुबन्धीष्टविशेषे तात्पर्य न्तिबेधे
म्· तथा चाशक्यविशेषेणनिषेधपरत्वं नञ इति कश्चित्· तन्न· यथा ह्ययोग्यतया छिद्रं विहाय घटत्वेन तदि
तरस्याप्यन्वयो न तु छिद्रेतरत्वेन· युगपद्वृत्तिद्वयविरोधात्· तथात्रापि बलवदनिष्टाननुबन्धित्वेन नोपस्थिति
रिति कथं तन्निषेधः। श्येनेनाभिचरन्यजेतेत्यत्र कथं विधिप्रवृत्तिः हिंसाया बलवदनिष्टसाधनत्वादिति चेत्। त

त्वकृतिसाध्यत्वे सतीष्टसाधनत्वमेव योग्यतया चेति । ननु बलवदनिष्टाननुबन्धित्वमपि प्रयोग्यत्वात् । निंदार्थवा
देन प्रायश्चित्तोपदेशेन च हिंसायां बलवदनिष्टसाधनत्वावगमात् । अत एव विहितेपि श्येने विगानान्नास्तिक
प्रवृत्तिः । रागद्वेषयोरुत्कटत्वेनानिष्टाननुबन्धित्वाप्रतिसन्धानात्तु कस्यचित्प्रवृत्तिरित्येके । अन्ये तु अभिचारस्य
वैरिवधफलत्वेन श्रुतत्वाद्वधसाधनत्वेन श्येनो विधीयते न तु वधसाध्यनरकसाधनत्वेनाश्रुते । न च जन
कजनकस्य जनकत्वनियमः कुंभकारपरंपरापि कुंभजनकत्वापत्तेः । विधिनैव श्येनस्य बलवदनिष्टा
ननुबन्धित्वबोधनाच्च । न च श्येनस्य नरकाहेतुत्वेऽपि हिंसात्वे वैरिवधहेतुत्वे च विगानेन प्रवृत्तिः स्यादिति वा
च्यम् । श्येनाद्वधो वधाच्च पापं नरकमिति प्रतिसंधानेन विगानात् । ननु श्येनो मरणफलकव्यापारत्वेन हिंसा
सा च नरकजनिकेति चेत् । न । न हि साक्षात्परंपरासाधारणमरणफलकव्यापारो हिंसा । कूपादिनिष्ठे गवि
तत्कर्तुर्गोवधकर्तृत्वप्रसंगात् । वध्यस्यापि हन्तृमन्यूत्पादनद्वारेण स्वहन्तृत्वप्रसंगाच्च । न ह्यनुत्पादितमन्युः क
श्चित्कमपि व्यापादयति । किं त्वनुनिष्पादिमरणफलको व्यापारो हिंसा । यदनन्तरं मरणं भवत्येव । न च श्येनस्तथा । गम०
किंतु खड्गहननादिकमेव । अथ मरणानुकूलो व्यापारो मरणोद्देशेनानुष्ठीयमानो हिंसा । श्येनश्च तथा । इ ४५

पादौ न च मरणोद्देशेनानुष्ठीयमानत्वमिति चेत्। न। एवं सति गौरवात्। मरणानुद्देशेन क्षिप्तनाराचाद्ब्राह्म
णे च हिंसा न स्यात्। किं च। हिनस्ति धात्वर्थे विच्छेदकं फलमव्यवहितमेव मरणम्। अव्यवहितफलकव्या
सर्वत्र पारस्यैव धातुवाच्यत्वात्। अन्यथा परम्पराया विक्लित्तिफलकान्नकामेष्टतण्डुलक्रयादावपि पचतीति प्रसं
गात्। एवं खड्गघातानन्तरं यत्र विलम्बेन मरणं व्रणपाकपरंपराजावान्नविषप्रयोगेण वा तत्रैव हन्तृत्वं प्रायश्चि
त्तादि च न स्यादिति चेत्। न। प्रायश्चित्ततुल्यार्थे हि तत्र हन्तृत्वव्यपदेशो गौणः। विनिगमकं च लाघवमेवाव
स्तुतस्तु। मरणोद्देशेन कृतोऽदृष्टाद्वारकस्तदनुकूलो व्यापारो हिंसा। श्येनस्यादृष्टद्वारा मरणसाधनमतो
न हिंसा। यद्विचारे दृष्टद्वारापि मरणसाधनं हिंसा स्यात्। तदा सत्रमितैलाभ्यंगस्यादृष्टद्वारेण भार्याविनाश
हेतुत्वादभ्यंगकर्तुर्हिंसकत्वापत्तिः। अत एव कूपादौ गोमरणेन गोवधकर्तृत्वं तत्कर्तुर्गललग्नान्नमरणे २
न भोक्तुर्नेवापरिवेषयितुरात्महन्तृत्वं ब्रह्महन्तृत्वं वा। व्रणपाकपारम्पर्याद्विलम्बेन विषप्रयोगेन च हन्तृ
त्वमुख्यमेव। न त्वनुनिष्पादिमरणे भोक्तुर्नेवापरिवेषयितुरात्महन्तृत्वं ब्रह्महन्तृत्वं फलकं व्यापारं कल्प
म्। गललग्नान्नमरणे स्वहन्तृत्वापत्तेः। अन्योद्देशेन क्षिप्तनाराचेन हतब्राह्मणे ब्रह्महन्तृत्वं न स्यादिति

५६ चेत्‌·न·इष्टापत्तेः·व्यपदेशस्तु गौणः। प्रयोगो लक्षणः। प्रयोगो लक्षणयापि समर्थयितुं शक्यते त्वयत्नेति प्रसं
गो वारयितुं न शक्यत इतीदमेव विनिगमकं· अत एवातदुद्देशेन कृतेपि निषिद्धे प्रायश्चित्तार्द्धमुक्तम्· अ
परे त्वनभिसंहितनरांतरव्यापारमद्वारीकृत्य मरणसाधारणं हिंसा· खड्गकारस्यानभिसंहितनरांतरव्यापार
द्वारा मरणसाधनत्वं· तस्य हि नरांतरव्यापारेणाभिसंहितः किंतु धनलाभ इति खड्गकारेण घातकः· विषस्या
न्नप्रवृत्ते येन रांतरव्यापारो भोजनमेवाभिसंहितः· अनेनेदं भोक्तव्यमित्यभिसंधाय परिवेषकविषप्रयोगा
दिति हिंसैव विषप्रयोग इति तन्न· गलत्पत्यान्नकवलाद्यन्नमरणं तत्र परिवेषयितुर्घातकत्वापातात्· अ
नेनेदं भोक्तमित्यभिसंधाय परिवेषणात्। भोक्तुरात्महंतृत्वापत्तेश्च· अनभिसंहितनरांतरव्यापारमद्वारी
कृत्य मरणानुकूलान्नभक्षणानुष्ठानात्। अत एवाव्यवहितप्राणवियोगफलको व्यापारो हिंसा। व्रण
पाकपरंपरामृते हंतृत्वं व्यापारोव्यवधायकत्वादिति निरस्तम्· स्यादेतत्· नेष्टसाधनता विधिः· नित्ये संध्यो
पासनादौ फलाभावात्· अथ नास्त्येव तन्नित्यं यत्रार्थवादिकं विधिवाक्ये वा न फलं श्रुतमस्ति· संध्यामुपास रामः
ते ये तु सततं संशितव्रताः। विधूतपापास्ते यांति ब्रह्मलोकं सनातनमित्यर्थवादात्। दद्यादहरहः श्राद्धमित्य ५६

स्यः प्रीतिमावहन्नित्यादिविधिवाक्यश्रवणाद्वा कृत्वा चिंतयात्यते· यत्र न फलश्रुतिस्तत्र विश्वजिन्न्या
यात्स्वर्गः फलमितिचेत्· न· कामनोपाधिकार्यत्वेन यागवन्नित्यताभंगप्रसंगात्· अहरहः श्रुत्या हित
त्वाल्लजीविमात्रकृतिसाध्यसंध्यावंदनमवगतं· कामनोपाधिकार्यत्वे च यामेवन्नित्यताभंगप्रसंगात् त
दाफलकामनानास्तितदा तत्समय एव तत्कर्तव्यता न स्यात्· न हि नित्काले फलकामनावश्यंभावः प्रमा
णाभावात्· किंचाप्रथमप्रवृत्तेतरनिरपेक्षाहरहः श्रुत्या जीविमात्राधिकारोवगतः· तथा च तत्सापेक्ष
चरमप्रवृत्तार्थवादोपनीतफलकामस्य न तत्राधिकारः· प्रथमप्रवृत्ताहरहः श्रुत्या जीविमात्रेति वि
रोधात्। नित्ये फलश्रुतेरर्थवादस्य च स्तुतौ तात्पर्यम्· अत एव प्रत्यवायपरीहारोपि न फलम्· तत्का
३२ मनोपाधिकार्यत्वे नित्यता हते· किं च· नित्ये कर्तव्यताबोधनात् प्राक् प्रत्यवाये प्रमाणमस्ति। विधेः कर्त
व्यत्वमवगम्य कर्तव्याकरणे प्रत्यवायकल्पनं विधिश्च फलाभावेन प्रथमं मूक एव· एवं च प्रत्यवायमितो
विधिप्रवृत्तिस्तत्प्रवृत्तौ च कर्तव्याकरणे प्रत्यवायकल्पनमित्यन्योन्याश्रयः· अपरे तु न विधेः कर्तव्यत्वम
वगम्य कर्तव्याकरणे प्रत्यवायकल्पनं येनान्योन्याश्रयः· किंतु निन्दार्थवादेन प्रायश्चित्तोपदेशेन चोपास

शु॰मू॰ ५८ नस्यप्रकृत्यर्थस्यतावद्व्यापाररूपस्याभावः प्रत्यवायहेतुरेवगतस्तथाचसंध्योपासनाभावः प्रत्यवायद्वारादुः
खसाधनं तदभावः संध्योपासनंदुःखसाधनत्वाभावत्वेनफलम् प्रायश्चित्तैपापध्वंसवदितितत्साधन
त्वेनकृतिर्वोध्यते विधिनानचैवंप्रत्यवायपरिहारएवफलमस्त्वितिवाच्यम् परिहारस्यप्रागभावरूपत्वे
नानादित्वयाऽसाध्यत्वात् नचोपासनाकरणंप्रत्यवायहेतुर्नोपासनाभावः तथाचदुःखसाधनाभा
वत्वेनकृतिरिष्टा नतूपासनमितिवाच्यम् निंदार्थवादस्योभयत्रसत्वेनोभयस्यापितथात्वादिति त
न्न एवमपिकाम्यत्वेनित्यताहतिप्रसंगात् किंच अकुर्वन्विहितंकर्मेत्यादिनानोपास्तेयश्चपश्चि
मामित्यादिनाचकरणाभावस्यैवहेतुत्वंवोध्यते नतुतद्विषयाभावस्य अन्यथाकर्तुः प्रत्यवायोनान्य
स्येतिकथंस्यात् विषयाभावस्यसाधारणत्वात् वस्तुतस्तुकृतिसाध्यत्वेसतीष्टसाधनताज्ञानंप्रवर्त्तक
त्वेननिर्दिष्टम् नचकृतौकृतिसाध्यत्वमस्ति अतोनकिंचिदेतत् नवीनास्तुनित्याएवप्रागभावोदु
रितद्वारादुःखसाधनंतदभावोपूर्वंदुःखसाधनताभावत्वेनेष्टंतत्साधनत्वेनकृतिसाध्यत्वेनचसंध्योपा राम॰
सनंविधीयतइति तन्न निंदार्थवादादिनासंध्योपासनाभावस्तत्करणंवाप्रत्यवायेहेतुरेवगतोनत्व ५८

एवंभावः प्रथमं प्रमाणाभावेन तदनुपस्थितेः। विधेरिष्टसाधनत्वबोधकत्वात् परिशेषेण एवं भिष्टं कल्प्यत
इति चेत्। न हि विश्वजिन्न्यायेन स्वर्ग एव फलं कल्प्यताम्। काम्यं तु अस्य त्वयापि स्वीकारात्। किंच। विधिप्रव
त्तावेव एवं ज्ञानम् अपूर्वज्ञाने विधिप्रवृत्तिरित्यन्योन्याश्रयः। यावन्नित्यनैमित्तिकनिर्वाहस्यात्तदाश्रमविहित
कर्मणां सम्यक्परिपालनस्य च ब्रह्मलोकावाप्तिः फलं श्रूयते। तथा च नित्यस्य सफलत्वमिति केचित्। तन्न। त
स्य विधेर्नित्यविधिमुपजीव्य प्रवृत्तेः। तस्य च फलाभावेन प्रथमं मूकत्वात्। अन्यथा परस्परापेक्षत्वेनान्योन्या
श्रयः। तस्मात्कार्य एव विधिः। ननु नित्ये वेदात्कार्यताज्ञानेपि प्रयोजनज्ञानं विना कथं प्रवृत्तिः। न हि प्रयोज
नमनुद्दिश्य मन्दोपि प्रवर्तत इति चेत्। न। नित्ये फलबाधेन प्रवृत्तिमात्रे प्रयोजनज्ञानस्याप्रयोजकत्वात्। का
म्येपि प्रयोजनज्ञानं न साक्षात्प्रवर्तकमदृष्टापाया विषयत्वात्। प्रयोजने ऽप्रवृत्तेश्च। किं त्विष्टसाधनताज्ञान
द्वारा कार्यताज्ञानोपक्षीणमेव। कथमयं निश्चयः। निष्फले इष्टसाधनताज्ञानाभावात्। कार्यताज्ञानस्य वे
दादपि संभवात्। ननु निष्फले दुःखैकफले वा प्रेक्षावतां कथं प्रवृत्तिः। वेदाधीनब्रह्मकार्यताज्ञानसत्वात्। स
फलप्रवृत्तावपि तस्यैव तंत्रत्वात्। यत्तु लौकिके दुःखैकफले न प्रवर्तते तत् दृष्टसाधनतालिंगकस्य कार्य

श्रा·सू·
४८
W96

तात्कालनस्यवेदाधीनस्यवाऽभावात्·नचद्वारैकफलत्वज्ञानंप्रतिबंधकं·सतिकार्येतात्कालिनेतस्यप्रतिबंधकत्वा
दर्शनात्।अथवाकाम्येष्वितिहेतुःएवंवाचकत्वान्नित्येपीतिहोपासनादिविषयकमपूर्वंनिःफलमपिस्व गोध्यातेनत्र
स्ववत्त्वातएवप्रयोजनंनित्यमभ्युत्थ्यमानंचेति·उच्यते·सर्वत्रनित्येफलश्रवणात्तीविफलकामस्यसम्ब
त्विताधिकारः·यथोप्रायपाठगोनैमित्तिकंस्नानंश्राद्धादिफलश्रुतेःकाम्यं·अकरणेप्रायश्चित्तादिश्रुतेश्च
नियातकर्तव्यताकंयथावामोदरश्राद्धेप्रेतत्वविमुक्तिकामनाश्रुतेप्रेतत्वविमुक्तिहेतुर्मोदरश्राद्धंसंक
ल्पंविधायमहाजनानामाचारात्काम्यत्वंनिंदार्थवादेनाकरणेप्रत्यवायश्रुतेरवश्यकर्तव्यत्वं·तथासंध्यो
पासनमपिफलश्रुतेःकाम्यं·अकरणेनरकश्रुतेःप्रायश्चित्तोपदेशाच्चनियतकर्तव्यताकं·यत्तुयागे
त्वे काम्येऽपिननियतकर्तव्यताकत्वं·तदकरणेप्रायश्चित्तानुपदेशात्·नचनित्येफलेकामनाया असंभवः
त्रिकालकाम्यस्तवपाठवन्नित्यफलेकामनासंभवात्·यत्तुप्रथमप्रवृत्ताहारेहःश्रुत्यात्कालत्रीविमात्र
तत्र स्याधिकारबोधनान्नफलकामस्याधिकारइति·अहारेहःश्रुत्यर्थवादयोःप्रथमगृहीतैकवाक्यतावले रा·म०
नतत्कालत्रीविफलकामस्योफलान्वयविनैकवाक्यताभंगात्।नचार्थवादस्यस्तुतिपरत्वान्नैकवाक्यता· ४८
१ संवलिताधिकारः कार्यबाद्येपस्थित

वाधकं विना स्वार्थापरित्यागात् । विधिवाक्योपस्थिते फले विधिवाक्यस्य फलमादायैवाहरहः ॥ अत्याकार्यतावो
धनात् । न चैवं तत्कालजीविकामिनोऽधिकारे यदा फलकामनाविरहस्तदा अश्रद्धेरिवाधिकाराभावान्नियतक
र्त्तव्यता न स्यात् । अधिकृताकरणे हि प्रत्यवायो न त्वकरणमात्रम् इति चेत् । न । नैमित्तिके पितृकालेकस्यचि
त्कामनाविरहिणोऽनियतकर्त्तव्यतापत्तेः ॥ अथापवादाभावे नौत्सर्गिकी फलकामनास्त्येव । फलज्ञानस्य
स्वविषये इच्छाजनकस्वभावात् । यस्य तु मुमुक्षापवादेन फलान्तरे कामना नास्ति तस्याकरणे न प्रत्यवाय इति
न तन्नियतकर्त्तव्यताकल्पनं नैमित्तिके । तथा नित्येऽपि मुमुक्षया फलकामनाबाधे तदकरणेऽपि न प्रत्यवा
य इति तुल्यम् । किंचार्थवादोपस्थितफलोपाधिकर्त्तव्यत्वेऽवगते ऽकुर्वन्विहितं कर्मेत्यादिवाक्याच्छो
चे सति सन्ध्यावंदनाकरणे निंदार्थवादेन नरकश्रुतेः प्रायश्चित्तोपदेशाच्च प्रत्यवायकल्पने तत्फलकाम
नाविरहेऽपि प्रत्यवायपरीहारार्थं नियमतः प्रवर्त्तते । विधिप्रवृत्त्यनंतरं प्रत्यवायस्य प्रामाणिकत्वात् । अ
करणे मुख्यस्य कारणे न प्रत्यवायप्रागभावस्य साध्यत्वात् । नैमित्तिके फलोपाधिकर्त्तव्यत्वे कामनाविरहेऽपि
नियतकर्त्तव्यतावत् । यत्तु निष्फलेऽपि नित्ये वेदाधीनकर्त्तव्यताज्ञानात्प्रवर्त्तत इति । तन्न । दुःखैकफलत्वेन

शा.स.
४९
49

ज्ञायमाने प्रेक्षावतां कृतेरनुत्पादे नियमात् प्रयोज्यतया नित्ये कृतिसाध्यत्वस्य बोधयितुमशक्यत्वात्। अत एव
संध्योपासनमफलमपि क्रियते वेदबोधितकर्त्तव्यताकत्वादित्याशंक्य गुरुमतमेतन्न तु गुरोर्मतमित्यभिप्राये
णोपेक्षितवानाचार्यः। यत्तु परोक्षापूर्वं स्वत एव प्रयोजनमित्युक्तम्। तदपि न। एवं तदापि काम्यत्वे नित्यत्वहा
न्यापत्तेः। किंच सुखं दुःखाभावश्च मुख्यं प्रयोजनं। तत्साधनं च गौणम्। नित्यापूर्वं तु तेषु नैकमपि। यएदत्वा-
त्। काम्यापूर्वं च सुखहेतुर्गौणं प्रयोजनम्। प्रवर्त्तकविध्यनुरोधेन तदपि प्रवर्त्तकं कल्प्यत इति चेत्। न। प्र
वर्त्तनीयेन लोकेन तस्य प्रयोजनत्वेनाज्ञानात्। गुरुं नित्यापूर्वं प्रयोजनमित्युच्यमानेपि नादरः। प्रेक्षावतां ए
मुक्तिस्वर्गौ चाऽलौकिकावपि सुखदुःखाभावज्ञानीयतया प्रयोजने तस्मादेवं वदन् गुरुरपि लघुरेव। तद
र्थं संक्षेपो नित्येषु दुःखैकफलत्वेन प्रवृत्त्यनुपपत्तेः फलोपाधिकर्त्तव्यता तत्र फलं दुःखसाधनाभावः पापदा
पूर्वं वेति तदिच्छाप्रवृत्त्यर्थं प्रत्यहमपेक्ष्या। तां विना प्रवृत्त्यनुपपत्तेः। तथा चार्थवादिकं विधिवाक्यश्च तच्च
फलमस्तु कृतमन्येन। न च कामनाविरहे नियतकर्त्तव्यता न स्यात्। अपूर्वीयेच्छाविरहेपि तुल्यत्वात्। प्रत्य एम०
वायपरिहारार्थं नियमतः प्रवृत्तिस्तुल्यैव। यत्र वचनफलश्रुतिस्तत्र विश्वजिन्न्याय इति। नन्विदमिष्टसाधन ४९

१ मिति ज्ञानादेतत्साध्यमिष्टमिति ज्ञानाच्च प्रवृत्तिदर्शनात्प्रथमस्यैव प्रवर्त्तकत्वे किं विनिगमकम्। उच्यते। फलेच्छायां
स्वविषयविशेष्यकज्ञानस्य हेतुत्वेन क्लृप्तत्वादुपायचिकीर्षापि बाधकं विना न तथा। वस्तुतस्तु कृतिसाध्ययागस्य
साध्य इष्ट इति ज्ञानस्य प्रवर्त्तकत्वे यजेतेति पदात्प्रथमं कृतिसाध्यो याग इति ज्ञानं ततः कृतिसाध्ययागस्य साध्य
याग इष्ट इति ज्ञानं। विशेषणज्ञानसाध्यत्वाद्विशिष्टज्ञानस्येति ज्ञानद्वयं तव। मम यागः कृतिसाध्य इष्टसाधनमि
त्येकमेव ज्ञानं। न च कृतिसाध्यत्वं यागे बोधयित्वा कृतिसाध्ययागस्य साध्यं इष्ट इति लिङा बोधयितुं शक्यमपि। ए
कस्यार्थान्वयमपरपदार्थे बोधयित्वा तदन्विता परस्वार्थान्वयबोधकत्वस्य पदे व्युत्पत्तेः। यत्रिपदे च कृत्या सह या
गान्वयं बोधयित्वा पर्यवसिते पुनः स्वार्थान्वयबोधकत्वे आवृत्तिप्रसंगः। अथ साध्यमिष्टं यस्येति साध्येष्टकत्वं
शक्यम्। तथा च बह्वीह्यर्थापेक्षया इष्टस्य साधनमिति षष्ठ्यर्थस्य लघुत्वात्तदेव शक्यम्। किंच। तत्साध्यत्वं न नि
हए यमतस्तदुत्तरासत्वाद् यदसाध्ये घटे व्यभिचारात्। नापि तद्ध्वंसिन्नत्क्षणोत्तरक्षिणेन्नेत्क्षण एव सत्त्वम्। एवकारस्य व
च्छेद्यतदनुत्तरासमयस्याकाशे प्रसिद्धेः। प्रागभावस्य तत्साध्यत्वापत्तेः। अत एव न तदभावव्यापकाभावप्रतियोगित्वं
रूपे रससाध्यकत्वापत्तेश्च। नापि तद्ध्वंसिकोत्तरत्वव्याप्यसमयसंबंधः उत्तरत्वव्याप्यत्वं क्षणत्वानवच्छिन्नकाला नर

५० रन्निर्वर्त्तत्वाकांक्षाऽप्रसिद्धम्· गुरुमतं त्वेवं· तस्मात्तत्साधनकत्वमेव तत्साध्यत्वम्· एवं च तत्ताद्यवान्तत्साधनत्वज्ञानमेव
50
प्रवर्त्तकम्· न तु तत्साधनकत्वज्ञानमिति· स्यादेतत्· इष्टत्वज्ञानस्य प्रवर्त्तकत्वे तृप्तोऽपि भोजने प्रवर्त्तेत· मम न स्यात् प्रे
रिष्टत्वज्ञानात्· अथ सुखरूपस्य त्वपि फलेऽकारणं साध्यसिद्धतयात् पो नास्तीति चेत्· हन्तैवमावश्यकत्वात् फलेऽपि
कारणं· न तु तत्साधनगौरवात्· किंचेष्टज्ञानस्य कारणत्वे इच्छाकारणं न स्यात्· स्वज्ञानेऽन्तःतन्नाशात्· इच्छा तज्ज्ञान
धाराकल्पनेऽनवस्था· अपि चेष्टविषयः सुखमिति ज्ञानं न मानसं· सुखस्यासिद्धतयात द्विशेष्यकसाक्षा
त्कारस्य तत्सन्निकर्षं विनाऽभावात् ।। ॐ इन्द्रियेणापीष्टत्वज्ञानं न संभवति· मनसो बहिरस्वातंत्र्यात्· नापि चक्षुरादि
नाज्ञातः कुतः इति वदिष्टज्ञानं तत्र विशिष्यासन्निकर्षात्· वस्तुतस्तु इष्टस्य विशिष्टसुखत्वादिनाऽज्ञाने या
गपाकादाविष्टसाधनताज्ञानेऽप्यप्रवृत्तिप्रसंगः· इष्टस्यात्याधिकभावेन नानाप्रकारकत्वेन च विशिष्यान्यध्य
वसायात्· न चेष्टविषयत्वावच्छेदकसुखत्वादेरुपलक्षणमिष्टत्वम्· सुखदुःखाभावतत्साधने ष्वनुगतस्योप
लक्षणस्याभावेनाननुगमादिति· उच्यते। यत्रेष्टतत्साधनताज्ञानमेव प्रवर्त्तकं लोकवेदसाधारणं· तेषां सुख एम०
दुःखाभावतत्साधनत्वेनेष्टविषयाणामननुगतानामपि· वस्तुतदिष्टविषयत्वमेवानुगमकम्· एवं यदा सुखा ५०

दाविच्छा भवति स्वकृतिसाध्यत्वे सति सुखादिसाधनमिति ज्ञानं तदा यागादौ प्रवर्त्तते । नन्वेवं प्रवर्त्तकज्ञानवि
षयस्य नानात्वेन तच्छक्तस्य विधिप्रत्ययस्य नानार्थत्वप्रसंग इति चेत् । न । सुखत्वादिना ननुगतमिष्टत्वेनानु
गतं फलं प्रति साधनत्वस्य यागादेर्लिङादिना बोधनात् । तथा च फलानामननुगमार्थं फलेच्छाघटक्या । नवि
च्छाज्ञानकारणत्वेन । अथैवं सुखादिसाधनत्वज्ञानं प्रवर्त्तकं तच्च शक्यमननुगमात् । यत्तु शक्यमिष्टसाध
नत्वं तज्ज्ञानं न प्रवर्त्तकमिति विधेः प्रवर्त्तकता न स्यादिति चेत् । न । साक्षादेवमेव । किंतु इष्टसाधनं यागादी
ति लिङा बोधिते इच्छाकांक्षायां काम्यत्वेन श्रुतः स्वर्ग एवेष्टत्वेनाधिगम्यते । तथा च स्वर्गकामपदसंकोमथ्यं
दैसमभिव्याहारात् स्वर्गसाधनं याग इति ज्ञानं प्रवर्त्तकमुपपद्यते । एवं च विधिजन्यज्ञानजन्यज्ञानप्रवर्त्तकम् ।
यत्तु सर्वे धर्मिव विधेर्न साक्षात् प्रवर्त्तकम् । विधिबोधकत्वं कृतिसाध्यतादेरनवगमात् । स्वेष्टसाधनत्वं चाहमि गक्कार
ष्टसाधनं यागः स्वर्गकामत्वात् दृष्टान्तवाक्यावगतस्वर्गकामवदित्यनंतरमर्थात् प्रतीयते । तन्न । किंतु यत्रेच्छात
साधनमिति ज्ञानं दृढज्ञानादेव प्रवर्त्तयन्ते स्त्रस्त्रीतीति निष्कृता । अन्ये तु साधनत्वमात्रं विध्यर्थः स्वर्गादिसाधन
तालाभस्तु समभिव्याहारात् । इष्टसाधनतापदेऽपि तस्योपजीव्यत्वात् । तथा हि यजेतेत्यनेन यागः कृतिसाध्यः सा

शा॰ म॰ ५१

घनं चेति बोधिते साधनस्य साध्याकांक्षायां कामनाविषयत्वेनाकृतो सिद्धः स्वर्ग एव साधनाकांक्षी साध्यत्वेनाधिग
म्यते ऽनुपस्थितत्वात् न च यागस्य साधनाकांक्षा कृतिसाध्यत्वेनैवोपस्थिते: अत एव विश्वजिदादौ स्वर्ग ए
व साध्यत्वेन कल्प्यत इति। इष्टसाधनताविधिपक्षे तरति मृत्युं तरति ब्रह्महत्यां योऽश्वमेधेन यजत इत्याद्य
र्थवादे विधिबोध्येष्टसाधनत्वस्यार्थवादादेवावगमात् कुतो विधिकल्पनमिति चेत् न अविनाभावात्
तथाहि इष्टसाधनत्वस्य विधेयत्वव्याप्यत्वात् व्यापकानुपलम्भबाधोद्धारार्थं वा प्रयोजनाभावान्न तत्र तत्क
ल्पनमित्याहुः यत्तु इष्टसाधनत्वाभिधाने कारणे लिङोऽनुशासनात् दर्शपूर्णमासाभ्यामित्यनभि
हितार्थं तृतीयानुपपत्तेरिति तन्न उपायतामात्राभिधानेऽपि तद्विशेषकारणत्वानभिधानात् वस्तुतस्त्व
भिहितान्वयलभ्यं यागेष्टसाधनत्वं इष्टसाधनतामात्रस्य लिङर्थत्वात् न चास्तु चिकीर्षाद्वारा ज्ञान
स्य कृतौ हेतुता चिकीर्षा च कृताविच्छा सनः प्रकृत्यर्थगोचरेच्छावाचित्वात् जिघत्सादिवत् ननु कृति
विषयपाकादिविषयकृतिसाध्यत्वप्रकारिकेच्छाविधायकत्वं पाकादेः प्रकृत्यनभिधेयत्वात् न हि प्रम॰
कृतिवाचकस्य तद्विषयवाचकत्वं कर्मण्युक्तितद्विषये संज्ञायात् एवं च यत्रं कृतविशिष्टेष्टसाधनताज्ञा ५१

नात्. तत्साध्येष्टज्ञानात् वा. इच्छादौ तथा कल्पनात्. यदा च कृताविच्छा तदा सैव चिकीर्षा. अन्यत्रेच्छामा
त्रम्. न तु कृतिसाध्यताज्ञानात्. कृतौ कृतिसाध्यत्वाभावात्. अथ पाकं कृत्या साधयामीतीच्छाऽनुभवसिद्धा
। अनुभवापलापेऽपेक्षणीयत्वापत्तेः. सा च कृतिसाध्यताज्ञानात्. सा च चिकीर्षापदप्रतिपाद्यापि कृतिहेतुः
समानविषयत्वात्. न तु कृतीच्छा कृतिहेतुः. कृतिविषयाविषयत्वादिति चेत्. न. अस्ति तावत् पाककृताविच्छा
इष्टीच्छावत्. अस्ति च कृतिसाध्यत्वप्रकारिकेच्छा पाके. तथापि कृतीच्छैव कृतिकारणं. लाघवात्. न तु कृतिसा
ध्यत्वप्रकारिकेच्छा गौरवात्. धात्वर्थानुपाके कृतिस्वरूपे इतीच्छैव नोदेतीति चेत्. न पाकादिकृतीष्टसाधन
ताज्ञानात्. पाककृताविच्छा ततः कृतिरित्यभ्युपगमात्. न चावगतिप्रसक्त्योः समानविषयत्वसम्भवे सिद्धे त
स्यैव क्रियार्थत्वात्. कथं तर्हि पाकं कृत्या साधयामीतीच्छा. यथा वह्निसाध्यत्वेनेष्टसाधनत्वावगमात् वह्निना
पाकं साधयामीतीच्छा. तथा कृतिसाध्यत्वेनेष्टसाधनत्वावगमात्. पाकस्य पाकं कृत्या साधयामीतीच्छा. अ
न्यथा तत्तदुपायसाध्यत्वेनेच्छापाकादौ तत्तदुपायसाध्यत्वप्रकारकज्ञानात् स्यादित्यनन्तकारणकल्पनापत्ता
त्. पाकस्य पाकं कृत्या साधयामीतीच्छा. अन्यथा तत्तदुपायसाध्यत्वेनेच्छाऽमृतपानेच्छाया मिष्टसाध

श०म०
५२
52

नत्वज्ञानमेवहेतुः। क्रियाह्यपि कृतेरिष्टसाधनत्वज्ञाने क्रियाया अपीष्टसाधनत्वं विषयत्वं विषय इति कृतीच्छा
भवंती क्रियाविषयापि भवतीति ज्ञानेच्छाप्रयत्नानां समानविषयतापि। अतएव पाकं चिकीर्षतीति चिकीर्षाविषय
तया पाकः प्रतीयते। यद्वा इच्छाविषयतया पाकः प्रतीयत इति तस्य कर्मता। ग्रामं जिगमिषति शत्रुं जिघांसतीत्य
त्र ग्रामादेरपि। न हि ग्रामादाविच्छासिद्धत्वात्। एवं च स्। अतएव भोगे सुखे वा चिकीर्षा तदनुकूलकृतेरिष्टहेतु
त्वात्। अन्यथा कृतिसाध्येष्टसाधनताविधिपत्तेस्तच्चिकीर्षायां सामग्र्यन्तर्गतत्वं कल्प्यता एवं च संध्यावंदनं दुःखसा
धनं वंदनाभावरूपत्वेनेष्टतत्साधनं कृतिरिति लिङः प्रेः। अन्यथा कृतिनैः कृतिसाध्यासंध्यावंदनेनेष्टसाधनमि
ति कस्य कृतिसाध्यत्वे सतीष्टसाधनत्वं विध्यर्थः स्यात्। अतएव एकप्रथमतया अभिधेयत्वप्रत्यासत्तेरंतरंगतया वि
धिप्रत्ययाभिधेयेष्टसाधनत्वस्य कृतावेवान्वयो न प्रकृत्यर्थे। तथैव चिकीर्षाकारणज्ञानजनकत्वात्। प्रकृत्य
र्थस्य च कृतौ विषयत्वेनान्वय इति। उच्यते। वह्निसाध्यत्वेन कृतिसाध्यत्वेन वा नं पाकस्यौदनसाधनता इत्यु
पृ.ला क्तम्। कथं तर्हि वह्निना पाकं साधयामीतीच्छेति चेन्न। इष्टसाधनत्वेन ज्ञाते यत्र यत्साध्यत्वं ज्ञायते तत्र तत्सा श०म०
ध्यत्वेन ज्ञानं पाकेच्छा भवति। यथेष्टसाधनत्वेन ज्ञाते पाके वह्निसाध्यत्वज्ञानाद्वह्निना साधयामीतीच्छा। ए ५२

वं कृतिसाध्यत्वेनावगते इष्टसाधनताज्ञानात्कृत्या साधनैयामीतीष्या तथा च इष्टसाधनत्वेन कृतिसाध्यत्वेन
च कृतिसाध्यत्वप्रकारिकेच्छा नतु इष्टसाधनताज्ञानमात्रादिति आचार्यास्तु प्रवर्तकमिष्टसाधनताज्ञानमे
व लिङर्थस्तु आप्ताभिप्रायः लाघवात् पाकं कुर्याः कुर्यामित्यत्र विधिलिङः सम्बोध्यस्वकर्तृकक्रियेच्छा
भिधायकत्वेनाज्ञाप्रार्थनासंप्रश्नादिलिङें च क्रादीच्छाभिधायकत्वेन लिङ्मात्रस्येच्छावाचकत्वकल्पनात् ३८
एवं च स्वर्गकामो यजेतेत्यस्य स्वर्गकामस्य कृतिसाध्यत्वपायागो यागयत्नो वा आप्तेष्ट इत्यर्थः ततो यो व्यापारो
यस्य कृतिसाध्यतया यद्व्यापारविषयः प्रयत्नो वा यस्याप्तेनेष्यते स तस्य बलवदनिष्टाननुबंधीष्टसाधनमि
तिव्याप्तिग्रहात् यागस्येष्टसाधनत्वमनुमिनोति तथा हि यागो मदिष्टसाधनं मत्प्रयत्नविषयतयाप्ता
यत प्तेनेष्यमाणत्वात् यथा मम पित्रा प्रयत्नविषयतयेष्यमाणं मद्भोजनं मदिष्टसाधनं तथा चेदं तस्मात्तथा एवं न
कलञ्जं भक्षयेदित्यस्य मम कलञ्जभक्षणं प्रयत्नो नाप्तेच्छाविषय इत्यर्थः ततः कलञ्जभक्षणं मम बलवद
निष्टसाधनं मदिष्टसाधनत्वे सत्याप्तेन मत्प्रयत्नविषयतयानिष्यमाणत्वात् [illegible] वि
षयतयानिष्यमाणं मम बलवदनिष्टसाधनं मदिष्टसाधनत्वे सत्याप्तेन मत्प्रयत्नविषयतयानिष्यमा
[illegible]

श॰ म॰ ५३ 53 स्त्वात्· यथा मत्पित्रा मत्सुयत्नविषयतया निष्प्रमाणमधुविषसंपृक्तान्नभोजनमबलवदनिष्टसाधनं·
तथाचेदं तस्मान्नथा· सचाप्तो वेदवक्ता भगवानीश्वर एव· यत्तु वेदे पौरुषेयत्वं नोपैति तं प्रति विधिरेव तावद्ध
र्म इव श्रुतिकुमार्याः पुंयोगे प्रमाणम्· न तर्हि लाघवं तात्पर्यग्राहकत्वादीश्वरं घटनं तकल्पनादिति चेत्· इष्टि
कामः न· लाघवादिनेष्टवाचकत्वेन लोके लिङः· प्रमाणसिद्धत्वेन फलमुखगौरवस्यादोषत्वात्· नच क
र्तुरस्मरणं वाधकं· प्रागेव निराकृतत्वात् तृप्तिकामनया विषभक्षणप्रवृत्तस्य विषभक्षणं तत्कृतिसाध्यतयानेर
श्वरेणाप्यते· ततो विषभक्षणस्येश्वरेच्छाविषयत्वेपि न तेन व्यभिचारः· यत्कामनाकृतिसाध्यत्वेन योव्याप य॰
रुक्तास्तेनेष्यते· स तस्येष्टसाधनम्· विषभक्षणं च तृप्तिकामकृतिसाध्यत्वेन नेश्वरेच्छाविषयः· मानाभावा
त्· अतएव न कलंजं भक्षयेदित्यत्र कलंजभक्षणं तृप्तिकामनया भक्षणप्रवृत्तस्य कृतिसाध्यत्वेनाप्ते
च्छाविषयो नेति तस्येश्वरेच्छाविषयत्वेपि विशिष्टनिषेध उपपद्यते· अभिप्रायविधिपक्षे बलवदनिष्टा
ननुबंधित्वमानुमानिकं· इष्टसाधनतापक्षे तु तदपि शाब्दमिति गौरवमपि· अथ स्वर्गकामो यजेतेत्यादा श्म॰
विष्टसाधनत्वं कार्यत्वं कार्यत्वं वा यद्विधिः स समभिव्याहृतक्रियान्वयी तदन्यान्वयी वा· तत्र गुरवः नाहृत्यक्रि ५३

याकार्यतयालिङ्गबोधयितुं शक्तो स्वर्गकामनियोज्यान्वययोग्यतान्वययोग्यतांत्वानविरहात् । कामनाविशिष्ट
स्य हि ममेदं कार्य्यमिति बोद्धुं नियोज्यत्वं कामनायास्तद्बोधोपयोगे सति भवति । स च कामनांतरं काम्यसाधनता
चे बोधात् कार्यताबोधे सति स्यात् । एवं स्वर्गसाधनताबोधे सति स्वर्गकामनियोज्यान्वययोग्यता । न च कालांतरभा
वि स्वर्गे क्रियासान्नात्यं परया वा साधनमिति शब्दो बोधयितुमर्हति । तस्याशुविनाशित्वात् । परम्पराघटका
नुपस्थितेश्च । तृतीयप्रकाराभावाच्च । अन्यथा तमादाय साधनत्वसंभवात् कल्प्यमप्यपूर्वं न स्यात् । इष्टसा
उ धनताविधिपक्षे स्फुटैवानुपपत्तिः । कार्यताविधिपक्षे अन्वयप्रकारतया साधनत्वं शब्दमिति फलतो न
विशेषः । अतः क्रियातोऽन्यत्स्वर्गसाधनतार्हं कार्य्यं क्रियाकार्य्यतानिर्वाहकं लिङ्गाद्यर्थः । ननु सजातीये
त्वप दर्शनं योग्यता । दृष्टं च घृतपानस्याशुविनाशिनः पुष्टिहेतुत्वमिति चेत् । न । एवं कथं चित्साजात्यस्या
योग्येपि सत्वेन योग्यतायाश्च व्यावर्त्तकत्वापत्तेः । पदार्थतावच्छेदकेन साजात्यस्य अपेक्षातः । पयः पिबतीत्या
दौ प्रकृते चासंभवात् । तस्मादन्वयप्रयोजकरूपवत्त्वं साजात्यं । अत एव द्रवद्रव्यत्वं सेककारणत्वे प्रयोजक
मित्ययोग्यो वह्निः । तदिहाशुविनाशिनः कालान्तरभाविफलजनकत्वे फलसमयपर्य्यन्तस्थायि व्यापार

श्री·मू·
५४
54

जनकत्वंप्रयोजकमतोऽएवंम्विनाससजात्यमेवनगृह्यते· घृतपानस्यतुवैद्यकोपस्थितत्वात् सामान्यमादायप्र
ष्टिसाधनत्वयोग्यताज्ञानविज्ञस्य· अथवाधकप्रमाणाभावोयोग्यता· नचसाधनत्वमात्रेवाधकम्· साक्षा
त्तद्बाधेपिपरम्परासाधनत्वमादायतद्विश्रान्तिसंभवात्· नचयोग्यानुपलब्ध्याद्वारस्यवाधात्परम्परासाध
नत्वमपिवाधितं· संस्कारस्यैवतत्रसंभवात्· अन्यथावस्त्यप्यएवंक्रियाकामिकार्यानस्यात्· काम्यासा
धनत्वात्· नहियदेवायोग्यंतत्पश्चाद्योग्यं· अयोग्यत्वेच्चनिःफलःप्रयासः· नचकामिकार्यमपूर्वंतद
र्थिंकार्यांचक्रियेतिवाच्यम्· यागेरागादित्यनेनविरोधात्· तथापिद्वारानुपस्थित्यापरम्परासाधनमि
तिज्ञानंनभवेदितिचेत्· सत्यम्· किंतुस्वर्गसाधनमितिज्ञानंसाक्षात्वंपरंपरोदासीनंवस्तुगत्यापरम्परासाध
नविषयमुत्पद्यमानंनायोग्यतयापरिभवितुंशक्यम्· यद्दिवसाक्षात्वंपरंपराविशेषद्वयव्यतिरिक्तंसामान्यंना
स्त्येवतदानुगमः· किंवाविशेषयसिसाक्षात्वंपरंपरांयावेति· नचयावद्विशेषवाधेतद्बाधितम्· परम्परासाध
नत्वेअवाधादिति· मैवम्· योग्यताहिस्ववाधकप्रमाविरहोवासकलवाधकप्रमाविरहोवा· आद्येवह्निनासिं राम०
चतीत्यादौस्ववाधकप्रमातद्विरहोसमयभेदेनसत्त्वइतितदेवयोग्यमयोग्यंचेतिप्राप्तम्· द्वितीयेतुयोग्यानुपल ५४

ध्यातन्निश्चयोऽशक्यः परप्रमायाश्चायोग्यत्वात्. नच वाच्यं सकलबाधकप्रमाविरहः स्वरूपसन्नेव प्रयोज
क इति. अयोग्येयोग्यताभ्रमादन्वयबोधाप्रसंगात्. अन्यस्य तत्र बाधकप्रमासत्वात्. नच वाच्यं सकल
बाध अन्वयप्रयोजकरूपवत्वेन बाधकप्रमाविरहो निश्चीयत इति चेत्. तर्हि प्राथमिकत्वात्सैव योग्य
ता. नच सा प्रकृते संभवतीत्युक्तम्. किंचैकविशेषबाधे शाब्दसामान्यज्ञानं तदितरविशेषप्रकारकतानि
यतमतः. क्वचिद्बाधे क्वचिदितरघटज्ञानवत्. नच द्वारानुपस्थित्या प्रकृते तथा घटते. एतेन यदुक्तं प्रभास्व
रूपवान्मैत्र इत्यत्र गौरश्यामविशेषानवगमेपि साधनत्वमात्रमिति तत्रत्युक्तम्. तत्रैकविशेषबाधाभावे.
ग नौदासीन्यसंभवात्. एतेन स्वर्गकामान्वयबला क्रियायाः फलसाधनत्वं तद्बलाच्चपटोः संस्कारस्यैव स्थायित्वं
कल्प्यतां किमपूर्वेण. संकल्पविशेषस्य यागस्याग्रे प्रत्यक्षानुपलब्धिसत्वात्तद्विशेषगुणानां प्रथमक्षण एव
स्वविषयकप्रत्यक्षजननस्वभावादस्तु. नचैवं क्रियांतरमपि तथा प्रमाणाभावात्. एवं लोकसिद्धक्रियाका
र्यताव्युत्पत्तिरपि भ्रमज्ञानं भवतीति परास्तम्. स्वर्गसाधनतायोग्यतया स्वर्गकामान्वयस्तदन्वयेव स्थापित्वमि
त्यन्योन्याश्रयात्. लोके धर्मिग्राहकमानेन क्रियायाः द्वारकत्वनिश्चयाच्च. ~~ननु देव एतावोयमि~~: स्ता
ऽ५२त मात्रमवगम्यते न दृष्टे [illegible] बा न र गर्भे ८

श्री·मू·
५५
55

चासम्बनागोरवितप्रीतिहेतुः क्रियातोदेवताप्रीतिद्वारायागस्यस्वर्गसाधनत्वं प्रीतेः क्षणिकत्वेपि प्रीत्यनुभ
वजनितसंस्काराद्वारातत्संभवात्· अतएवाग्नेयादौ प्रीतिहेतुः क्रियातोदेवताप्रीतिद्वारायागस्यस्वर्गसाधनत्वं
प्रीतेः क्षणिकत्वेपि प्रयाव· ननु देवपूजार्थो यजिः पूजाचाराधनागोरवितप्रीतिहेतुः क्रियातोदेवता
प्रीतिद्वारायागस्यस्वर्गसाधनत्वं प्रीतेः क्षणिकत्वेपि प्रीत्यनुभवजनितसंस्कारद्वारातत्संभवात्· अतए
वाग्नेयादौ प्रीतिभागितयाग्यादेरुद्देश्यत्वमिति· न· यजदेवपूजायामिति शाब्दिकस्मृतिः स्मृतिश्चादेवन
स्पृदेवता
स्वतः प्रमाणं नच यागस्यदेवताप्रीतिहेतुत्वे स्वर्गप्रीतिसाधनत्वे वामानान्तरमस्तिवस्तुतस्तुचेतनेदेवेमान
मेवनास्ति· यत्रवविष्णुर्देवेनस्वतः प्रमाणं नच यागस्यदेवताप्रीतिहेतुत्वे स्वर्गप्रीतिसाधनत्वेवामानान्त
रमस्तिवस्तुतस्तुचेतनेदेवमानमेवनास्ति· यत्र प्रीतिकामादिवाक्योस्ति· तत्र विष्णोरेव प्रीतिः· ननु विष्णोः प
क्षार्थेलक्षणादोषात्· विष्णुशब्दस्य प्रीतिविशेषवाचकत्वं वेद एव कल्प्यते· न च देवपूजार्थान्वयवलात्तथा
न्योन्याश्रयात्· नन्वेवमाग्नेयादीनां पक्षे क्षणिकत्वाद्धेत्वपूर्वानवगतौ परमापूर्वकारणत्वानवगमे कथमपू एम०
र्वकल्पनमितिचेत्· न· काम्येऽपूर्वं वाच्यत्वस्थितावाग्नेयादौ तद्वारासाधनत्वस्ययोग्यतासंभवात्· ननु प्रथम ५५

७ मः॰ ननु ब्राह्मणायावगुरेत्तं शतेन यातयादित्यत्र ब्राह्मणावघोद्यतस्य शतयातनाहेतुत्वावगमे यथावगुरिता पूर्व
कल्पनं तथेहापीति चेन्न॰ अवगुरेत यातयादित्यत्र हेतुहेतुमतोर्लिङ् दित्यनुशासनात्॰ लिङावगुरणशतया
तनयोर्नियतपौर्वापर्यं बोध्यते॰ प्रत्यक्षेणानुभवस्मरणयोरिव॰ तत्र साधनत्वे साधनसाधनत्वे वोभयमपि मध्य
वर्त्तिघटितमितिदुरितकल्पनं संस्कारवत्॰ इह तु विध्यनुशिष्टो लिङ् कार्यतामाह॰ किंच कामी काम्यादन्यथां
कृत्य का म्याव्यवहितसाधनतया ज्ञातमेव कर्त्तव्यतया वेत्तीति नियमान्न क्रियायां कामिनोऽन्वयो योग्यः॰ न च तृ
प्तिकामस्य पाके प्रवृत्तेर्व्यभिचारः॰ ओदनकामस्य तत्र प्रवृत्तेस्तृप्तिकामना तु तत्कामनोपयोगिनी न तु साक्षा
त्॰ अन्यथा साधनसाधने प्रवृत्तिर्न स्यात्॰ विशेषणे काम्यसाधनत्वं प्रवर्त्तकं लाघवादिति चेत्॰ न॰ भोजनका
मस्य सिद्धौदनस्य पाके प्रवृत्तिप्रसंगात्॰ तस्यौदनद्वारा भोजनसाधनत्वाविशेषात्॰ विशेषणे तु यत्राव्यवहित न
साधनं पाकस्तत्कामस्य यत्कामस्य तत्र नाव्यवहितसाधनं पाक इति न प्रवृत्तिः॰ ननु पाकस्य सिद्धौदनद्वारा भोज
नसाधनत्वं न संभवति॰ द्वारस्य साध्यत्वात्॰ ओदनान्तरद्वारा च तथा प्रतिसंधानेऽव्यवहितविशेषणेऽपि कुतो
न पाके प्रवर्त्तते॰ ओदनान्तरेद्वारे साक्षात्साधनत्वादिति चेत्॰ न॰ पाकस्य भोजनसाधनत्वे विशेषणस्याप्रयो

शा॰ स॰ ५६
56

जकतयोदनमात्रस्य द्वारत्वात्‌· तस्य च साध्यत्वाविवादात्‌· ऽदनविशेषे च सिद्धे ऽदनकामनाविरहान्न तुल्यत्व
म्‌· न च्चोदने सिद्धत्वाद्यथा न कामना तत एव द्वारतापि न· अथौदनान्तरमसिद्धमादाय द्वारता· तर्हि कामना
पि स्यात्‌· तस्यासिद्धत्वादिति चेत्‌ न· पाकस्यैकविशेषद्वारतावाधो न विशेषांतरद्वारताविरोधी· सकलवि
शेषस्यैकत्र द्वारत्वासंभवात्‌· एकविशेषसिद्धौ तु तन्मात्रकामना विच्छिद्यते· न हि सकलविशेषसिद्धे
त्वेन सामान्यकामना विच्छेदः। सकलविशेषसिद्धेरसंभवेन तदनुच्छेदप्रसंगात्‌· अथवा काम्यादन्यस्मा
त्साद्‌ साधनत्वेन ज्ञायमानं यत्कर्तव्यतया कामी बुध्यते· तत्काम्याव्यवहितसाधनमंतरा एकत्वेव· यद्वा·
काम्यादन्यत्कामी प्रथमे काम्याव्यवहितसाधनं कर्तव्यतौ वेति· पश्चात्तद्वाराव्यवहितसाधनमिति प्रथमं यो
गे कामिकार्यतावोधो ऽयोग्यतापराहत एव द्वितीये त्वस्तु विवादविषयो लिङ्‌· समभिव्याहृतक्रियान्वितका
र्यत्ववोधिका· प्रमाणलिङ्‌त्वात्‌· लौकिकलिङ्वत्‌· लिङ्‌ पदस्याप्यकार्यत्वं समभिव्याहृतक्रियान्वितं·
लिङ्‌पदस्याप्यकार्यत्वात्‌· पचेतेति कार्यत्ववत्‌· यागो वा कार्यत्वान्वितः। लिङ्गवलेधात्वप्रतिपाद्यत्वात्‌· स्म॰
पाकादिवदित्यनुमानात्‌ क्रियाकार्यत्वावगमेनापूर्वं कल्प्यमिति· तत्र प्रथमे यागान्वितकार्यत्ववोधकत्वं ५६
त

लिङो बोध्यते । न तु क्रियते । न च योग्यताज्ञानं विना तत्संभवतीत्युक्तमेव । नहि योग्यतादिकं विनैव तदनुमा
नप्रामाण्यप्रयोजनमात्रादन्वितमभिधीयते शब्देन । नांशो कुर्यादित्यत्र व्यभिचारात् । वेदस्यानुवादकता
पाताच्च । तन्न अपूर्वे व्युत्पत्तिविरहः । तथाहि तत्र प्रसिद्धार्थे स्वर्गकामपदसमभिव्याहारान्यथानुपपत्त्योप
स्थिते शक्तिर्गृहीतव्या । न च शब्दान्तरानुभवात्पूर्वमपूर्वोपस्थितिः मानाभावात् । अपूर्वत्वव्याघातात् । अवाच्य
तापाताच्च । न च लिङादिना तदुपस्थितिः व्युत्पत्त्यनन्तरं तत्प्रवृत्तावन्योन्याश्रयात् । न च कार्यत्वेनोपलक्षि
ते तत्र शक्तिग्रहः उपलक्षणं हि स्मारणमनुमापनं वा अगृहीते संबंधाग्रहादशक्यमिति । मैवम् । कार्ये
धर्मिणि कार्यत्वेन शक्तिग्रहात् । कार्यत्वविशिष्टं चोपस्थितमेव । ततोन्विताभिधाने यागो यागविषयकं
कार्यमित्यनुभवः स्वर्गकामान्वययोग्यत्वाद्घटादिकं तिरस्कृत्य क्रियाभिन्नयोग्यतावशाद्यागविषयका
पूर्वे पर्यवस्यति । न त्वपूर्वत्वेन शक्तिग्रहो न वापूर्वं कार्यमित्यनुभवः । भवति च सामान्यतः संबंधबुद्धिः
सहकारिवशाद्विशेषबुद्ध्युपायः । यथा तथैव कर्तृमात्रे संबंधग्रहात्कर्तृविशेषसिद्धिः । ननु कार्यत्वेना
पि किं घटादौ शक्तिग्रहः उतापूर्वे । उभयत्र वा नाद्यः । अन्यत्र प्रतिपन्नावच्छेदे शक्तिग्रहानुपयोगात् । ना

श॰म॰
५७
57

न्यौ॰ प्रागनुपस्थितेरिति चेत् न॰ येन हि रूपेण शब्देनानुभवो जन्यते॰ तेन रूपेण शक्तिग्रहः। पदार्थस्मरणं च
शाब्दानुभवहेतुः। न हि प्रमेयत्वेन शक्तिग्रहः पदार्थस्मरणं च घटत्वेन शाब्दानुभवः। एवं च घटादावेव का हेतुः
र्ये शक्ता लिङ्॰ इति शक्तिग्रहः। ततः कार्यमिति स्मरणम्॰ ततो योग्यतादिवशात्स्वर्गद्रव्ययागानां कर्मणां कार्यो
णा विहाय यागविषयकं कार्यमित्यनुभवो भवन्न एवं मालम्बते॰ योग्यत्वाच्चत एव स्थापि लब्धलाभः। अत एव वा
क्यार्थानुभवमात्रविषयत्वात्तदप्येवम्॰ न च स्मृतीनामाकांक्षादिवशादन्वयबोधः पदेन क्रियते॰ न चाप्येवं
स्मृतिगोचर इति वाच्यम्॰ शक्तिग्रहपदार्थस्मृतिशाब्दानुभवानां समानप्रकारतामात्रेण हेतुहेतुमद्भावाव्या
रणात्॰ लाघवादावश्यकत्वाच्च॰ ननु क्वचित्सहचारमात्रेणान्वयप्रतियोगिन एवोपस्थितिर्गौरवात्॰ गोपदा
दप्येवं गवानुभवप्रसङ्गाच्च॰ विशिष्टवैशिष्ट्यबोधे सर्वत्र तथैव॰ अन्यथा पर्वतीयवह्निर्व्यापकतयानाव
गत इति कथं तदन्वयोऽनुमितौ। ननु सामान्यलक्षणया प्रत्यासत्त्या सर्वा एव व्यक्तयो व्याप्तिग्रहे शक्तिग्रहे च वि
षयीभवन्ति॰ कथमन्यथा पर्वतीयधूमव्याप्यग्रहे तस्मादनुमितिरिति चेत्॰ न॰ येन रूपेण व्याप्तिग्रहस्तेन श॰म॰
रूपेण व्याप्यत्वेन पक्षधर्मग्रहोऽनुमितौ कारणमस्तु किं तया॰ अपि च॰ सा यद्यस्ति ममापि॰ किं च॰ तवदृष्टेने ५७
नास्ति चेन्न ममापि

सास्तीतिचेत्सुतराम‌पूर्ववाच्यता· कार्यत्वेन हि रूपेणापूर्वस्यापि शक्तिग्रहविषयत्वम्· पदार्थस्मृति
विषयत्वंच· नचैवमपूर्वत्वस्मृतिः।पागविषयत्वादेर्विशेषस्यकार्येलिङ्‌विनानुपस्थितेः।यथापर्वतीयत्व
ज्ञानंवह्नेरनानुमितिं विना· ननु यदिकार्येक्रियासाधारणोलिङ्‌शक्तिक्रियात्वायोग्येतियोग्यापूर्वत्वलाभः
।तदानित्यनिषेधापूर्वयोरलाभः।नहितत्रयोग्यतया क्रियात्वंकुंशक्यते· फलाश्रवणात्·कल्पनायांवी ४८
जाभावात्·नचएकत्रनिर्णीतःशास्त्रार्थोन्यत्रापितथैवेतिन्यायात्तत्रापिअपूर्वमेवलिङर्थ इति पूर्वक्रमः· नह्यपू
र्वत्वेनशक्तिग्रहः· किंतुकार्यत्वविशिष्टेधर्मिणि· क्रियाचतथाभवत्येव·नचकार्येणसमंक्रियायाअन्वया
नुपपत्त्यापूर्वेपर्यवसानम्· नह्यपूर्वत्वेनशक्तिग्रहः· किंतुकार्यत्वविशिष्टेधर्मिणि· क्रियाचतथाभवत्येव·
नचकार्येणसमंक्रियायाअन्वयानुपपत्त्यापूर्वेपर्यवसानम्· अभेदस्याप्यन्वयादितिमैवम्· नहिलोके स्मा
पचेतेत्यादौकार्येधर्मिणिशक्तिः कल्पिता· किंत्वनन्यलभ्यैरूपेकार्यत्वमात्रेधर्मिणः पाकादेर्धातोरे स्मृति
वोपस्थितिसंभवात्·क्रियाकार्यत्वस्यान्विताभिधानलभ्यत्वात्·तथाचधर्मिणिशक्तिर्वेदेकल्पनीयाः
साचक्रियानिरासेनैव·नहिक्रियायाःकार्यत्वान्वययोग्यत्वेधर्मिणिशक्तिःकल्पयितुंशक्यते·तस्मा

शा॰ मू॰ ५८ 58

दयोग्यतयाक्रियानिरासानन्तरंतद्व्यतिरिक्तएवशक्तिःकल्पनीया।नचक्रियातिरिक्तकार्यात्कार्यमात्रंलघु
ततःक्रियापिशक्यैवेतिवाच्यम्।यतोनसूक्ष्मःक्रियातिरिक्तकार्यत्वेनशक्तिः।किंत्वयोग्यतयाक्रियाया
निरस्तायांधर्मिशक्तिकल्पनसमयेयत्क्रियातिरिक्तंतत्रशक्तिः।नतुशक्तिग्रहेक्रियाप्रवेशः।नहियत्र
युक्तानुपपत्त्यायत्कल्पनंतदेवतस्यविषयः।एवंचकार्यत्वेनापितद्व्यतिरिक्तकार्यएवशक्तिकल्पनंनि
त्यनिषेध्ययोरपितद्देवोपासनाद्यन्वययोग्यलिङ्गाभिधीयते।नतुकार्यत्वमात्रम्।धर्मिबाधकाभाव
त्।लक्षणाप्रसंगाच्च।घटादिकंलिङादिशक्तिग्रहेणातिरिक्तंक्रियते।नपुंस्क्रियते।उभयथापिगौरवा २
त्।अन्विताभिधानदशायांत्वयोग्यतयातस्याप्रवेशः।विधिप्रत्ययस्यचतत्राप्रयोगः।केवलस्यतस्या
साधुत्वात्।धातुसमभिव्याहारेचतदर्थेनान्वयेबाधजननियमेनघटाद्यप्रतिपादकत्वात्।अतए
वाप्रयोगादेवाप्रयोगोपूर्वत्वंवाप्रयोगोपाधिरितिवदन्ति।अथाप्रतिपाद्यघटादिवृत्तितयायानकार्यत्वप्र
न वृत्तिनिमित्तमप्रतिपाद्यमात्रवृत्तेरेवतथात्वात्।अथाप्रमेयत्वमेवतथास्त्वितिचेत्।न।यत्रकारिकाहिप्रति राम०
पत्तिःपदजन्यातदेवतत्रप्रवृत्तिनिमित्तंफलकल्प्यत्वादुक्तेः।नतुप्रतिपाद्यमात्रवृत्ति।साक्षात्देवव्यभिचारा ५८

त्‌ नच प्रमेयत्वं तथा तद्बोधस्याप्रवर्त्तकत्वात्‌ अत एव लोके लिङ्गलक्षणिकी क्रियाभिन्ने धर्मिणि वेदे
शक्तिकल्पनात्‌ नच लौकिकानामपूर्वे तात्पर्यं संभवति पूर्वं प्रमाणांतरेण प्रतीतेः। क्रियासाधारणश
क्तावपि लोके लक्षणैव पचेतेत्यत्र पाककार्यतावगम्यते तत्र कार्यत्वे लिङः तात्पर्यं लाघवात्‌ न धर्मि
णि क्रियायां धातुलभ्यत्वात्‌ तदाहुस्तात्पर्याद्विवृत्तिर्नेतुं चेन्नेस्तात्पर्यमिति तृतीयायाः करणत्वैकत्व
वत्कार्यं कार्यत्वं च नलत्वं तत्र शक्यम्‌ किंतु विशिष्टं विशिष्टत्वाद्विशेषणमन्यदेवेति कार्यत्वे लक्षणा न
च कार्यत्वविशिष्टधर्म्युपस्थितावपि धर्म्यंशमपहाय क्रियैव पाकार्यत्वान्वयोऽस्तु किं लक्षणयेति वा
च्यम्‌ नहीतरधर्मिगतत्वेनोपस्थितस्य धर्म्यन्तराकांक्षास्ति। तः स्वतंत्रकार्यत्वोपस्थितये लक्षणा यथा पु
रोडाशकपालेन तुषानुपवपतीत्यत्र पुरोडाशार्थतया तदन्वितत्वेनोपस्थितस्य कपालस्यानुपवापाकांक्षेति स्व
तंत्रकपालोपस्थितयेऽधिष्ठानलक्षणा नच व्युत्पत्तिविरोधः। नहि लोके क्रियाकार्यत्वे शक्तिरवधारिता
येन विरोधो भवेत्‌ किंतु कार्यत्वमात्रे क्रियायां धातुलभ्यत्वात्‌ नच धर्म्यंशे शक्तावपि तद्गः। तस्मात्स्वका
र्यान्वितस्यार्थबोधकत्वं प्रत्ययानां गृहीतं प्रत्ययार्थेऽप्येवमपीति न विरोधः। अस्तु वा लोके लिङः क्रि

श॰सू॰ दे याकार्यत्वे सक्तिस्तथापि तद्रूगं विनैव नानार्थन्यायेन वेदे धर्म्यते शक्तिः तां विना स्वर्गकामान्वयासंभवात् अ
५८ न्येतु पचेत्वे ... साद्दौ धातु नैव कार्यः पाकोभिधीयते लिङ् तु तत्र तात्पर्यग्राहिका न शक्ता नियमतः ताद
59 थ्र्येव तत्प्रयोगात् सामान्यशब्दस्य विशेषपरत्वं च न शक्तं चेत् अनिर्वाह्यम् अत एव वर्त्तमानत्वादौ न लडा
दिशक्तिरिति लोके शक्तग्रहान्नव्युत्पत्तिविरोध इति तदसत् लिङः कार्यत्वे शक्तौ पचिपदात्कार्यत्वज्ञा
नानुपपत्तेः युगपद्वृत्तिद्वयविरोधात् न चाजहत्स्वार्थाद्वुभयसाधारण्यस्यानुपस्थितेरिति दिक् यद्वा
ज्ञाने पदानां शक्तिः शक्यत्वात् एवं च लिङ् पदमेकत्रोच्चारणे स्थायित्व स्वर्गजनकत्वकार्यत्वानां ज्ञाने शक्त मि
ति व्युत्पत्तिः ~~[illegible] स्थितमेव ततो लिङ् पदेनैकत्रोच्चारणे योग्यतादिवशाद्यागविषयक [illegible]~~
~~[illegible] जनकत्वकार्यत्वानां ज्ञाने शक्तमिति व्युत्पत्तिः~~ स्थायि ज्ञानादिकं चोपस्थितमेव ततो लिङ्पदेनैक
त्रोच्चारणे योग्यतादिवशाद्यागविषयकं स्थायि स्वर्गजनकं कार्यमित्येकं ज्ञानमनुभवरूपं द्रव्यगुणाकर्म ऽं॰१
विलक्षणविषयकं क्रियते न चैवं नानार्थवदेकैकज्ञाने शक्तिग्रहादेकैकविषयोनुभवो भवेन्न तु समुदि राम॰
तविषय इति वाच्यम् शक्तिग्रहकाल एवैकत्रोच्चारण इति विशेषणमहिम्नात् तत्संभवात् नानार्थे तु प्रमाणा ५८

भावेन गोत्वेन च शक्तिग्रहे तस्य प्रवेशात् । तथाप्यमीषां समूहालंबनं स्यान्न तु परस्परं वैशिष्ट्यज्ञानमिति चेत् । न ।
साकांक्षधर्मधर्मिणोर्गोत्वघटयोरेकज्ञानस्यैव विशिष्टज्ञानत्वात् । न च समूहालंबनाभेदः । तस्य निराकांक्षविषयत्वा
त् । अस्तु वोपस्थितेष्वगृहीतासंसर्गेषु स्यापि स्वर्गजनकत्वकार्यत्वेषु शक्तिग्रहः । अगृहीतासंसर्गस्यापि
विशिष्टज्ञानसमानशीलत्वात् । अत उक्तन्यायेन तावद्विषयकमेकज्ञानं लिङ्पदेन जन्यते । एवमेवालौकिकार्थेषु
स्वर्गादिपदेषु शक्तिग्रहः । ननु भवदुक्तप्रकारेण शक्तिग्रहः । तथापि लिङ्पदाद्यागविषयककार्यानुभवे सत्य
भाता पूर्वत्वाभावात्स्वर्गकामान्वयः संभवतीत्युपपादकप्रतिसंधाने प्रसिद्धार्थे स्वर्गकामपदसमभिव्याहारोऽन्यथानुपपत्त्याऽलि
ङः कार्ये शक्तिकल्पनम् । न हि प्रथममुपपादकप्रतिसंधानं विनाऽर्थापत्तिः संभवति । न च शक्तिकल्पनात्पूर्वमुपपा
दकशरीरनिविष्टं पूर्वं ज्ञातमिति चेत् । तत्किं यएव विशेषणमुपपादकः पक्षधर्मता वा नास्ति सिध्यति । तत्प्रतिसंधा
नमर्थापत्तौ कारणम् । तथात्वे पूर्वगृहीतमात्रस्य कल्प्यत्वे कल्पनामात्रोच्छेदापत्तेः [illegible] समभि[illegible]त्तिः । तस्माद्यथा
सामान्यतो भोजनस्य पीनत्वसंबंधावगमादुपपादकत्वे सति कल्पनातो विशेषावगमः । यथा वा सामान्य
शक्तव्यक्तिवाचकपदेन समभिव्याहारवशाद्विशेषाभिधानमेव न त्रापि कार्यमात्रवाचकत्वे कार्यविशे

शा·सू· षः संभवतीति तत्तद्धितोपपादकप्रतिसंधानादृष्टत्वस्यार्थापत्त्या शक्तिकल्पनं । यागविषयकं च कार्य्यं न घटादिः तस्य स
६० यथ विकल्पकत्वाभावात् । विषयत्वं च ज्ञानघटयोरिव स्वभावसंबंधो वा तन्निरूपणाधीननिरूपणं वा तत्समानस ल
60 म्वित्संवेद्यत्वमन्यद्वा । व्यावृत्तसाधनत्वमन्यद्वा । अस्ति हि यागदानहोमजन्यापूर्वाणामनुत्पन्नरूपसाधनान्तरव्यवच्छेदेन
प्रत्येकमात्रजन्यत्वात् तदुक्तं । विशिष्टो हि विशेषणार्थैः सिनोति विधिरुच्यते । विशेषणेन सिनोतीति विषयोऽतो निया हि
मक इति । ननु येन रूपेण शक्तिग्रहः तेन कार्य्यत्वशक्ता लिङ्पदाल्लक्षणया कार्य्योपस्थितौ योग्यत्वादिवशाद
पूर्वत्वलाभोऽस्तु । कार्य्यस्मरणं ह्यन्विताभिधानोपयोगि न त्वपूर्वस्मरणं । तत्र पदेन पदार्थेन वेति न कश्चिद्विशेषः
। कार्य्यं च शाक्यकार्य्यत्वसंबंधितयावगतमेवेति चेत् न । लिङो लाक्षणिकत्वेनापूर्वाननुभावकत्वात् । नन्वेत
दन्वितार्थे शक्तस्य यज्यादिपदस्येतरदपूर्वमादायानुभावकत्वमिति वाच्यम् । इतरोपलक्षितस्वार्थान्वयमात्रे हि
पदानां शक्तिर्न त्वितरत्र गौरवात् । पदान्तरलभ्यत्वाच्च । लक्षणायां चेतरोपलक्षितान्वयशालिस्वार्थानुभावकत्व
मितरपदस्य । इतरस्य तु संस्कारादुपस्थितिः सन्निहितेनान्विताभिधानाभावात् । न चापूर्वसंस्कारविषयः । किं एम०
च यजिपदेन स्वर्गकामिकार्य्यविषयो यागः इत्यनुभवो भवेत् । लक्षणयामितरपदस्य लक्षणीयविशेषणकस्वा ६०

र्यविशेषकानुभवजनकत्वात्। न चैतादृशो बोधः आकांक्षितः। न च यागादिविशेषितकार्यमात्रे स्वर्गकामान्व
यः प्रतीयते। किंतु यागविषयककार्यविशेषे। तथा च तथाविधबोधार्थं लिङः कार्ये शक्तिरेवेति। अत्रोच्यते।
अन्वयप्रयोजकरूपवत्त्वं योग्यता। अनाहार्यपयसा सिंचतीत्यत्र सत्यप्यन्वयप्रयोजके द्रवद्रव्यत्वे बाधकप्र
मायामन्वयाबोधात्। अथ योग्यत्वेपि स्वबाधकप्रमाविरहः कारणम्। तर्हि सोप्यवश्यापेक्षणीय इति लाघवात्सैव
योग्यता। एवं तदेव योग्यमयोग्यं च स्यादिति चेत्। सत्यम्। यथा दशाविशेषात् तदेव साकांक्षमनाकांक्षमासन्नम
नासन्नं च। तथा स्वबाधकप्रमाविरहदशायां योग्यतादिसत्वेपि तद्विरहदशायां तदेवान्वयबोधे योग्यमयो
ग्यं चाभिधीयते। स्वबाधकप्रमातद्विरहे चावगम्य योग्यायोग्यताव्यवहारदर्शनात्। स्वबाधकप्रमाविरहदशा
यां योग्यतादिसत्वेपि वह्निना सिंचतीत्यत्रान्वयबोधो प्रमा। दोषवत्पुरुषप्रणीतत्वात्। सामान्यभानस्य किंचि
द्विशेषभाननियतत्वाद्विशेषाभाने कथं तद्भासत इति चेत्। वस्तुगत्या परंपरासाधनं विशेषो भासत एव। पर
म्परासाधनत्वं तु प्रकारेण न भासते। तत्प्रकारकभाने परम्पराघटकज्ञानस्य हेतुत्वात्। यथा घटेनञ्जलमाहरेत्य
त्र योग्यतया छिद्रेतरघटो घटत्वेन भासते। न तु छिद्रेतरत्वेन। तथा सति लक्षणाया युगपद्वृत्तिद्वयविरोधेन घटा

शा॰म॰ ६१ न्वयप्रसंगात् उभयसाधारणरूपेणानुपस्थितेश्च नात्र वृत्त्यार्थः अथ संस्कारेण तदुपस्थितिः । न च सुब्विभक्ती
नां प्रकृत्यर्थान्वितस्वार्थान्वयबोधकत्वव्युत्पत्तेस्तत्र विभक्त्यर्थानाचीयेतेति वाच्यम् । प्रकृत्यर्थो हि प्रकृतिप्र
तिपाद्यर्थो लक्षणीयान्वयानुरोधात् स च संस्कारसहकारेणस्मृतेऽपि न च तस्या नियतोद्बोधकत्वान्न नियता
तदुपस्थितिः । फलबलेन तथा कल्पनादिति न शक्त्योपस्थापिते नैव शाब्दस्यान्वयबोधकत्वात् न चैवमाकाशा
दिपदाच्छाक्यस्य संस्कारोपस्थितस्य शब्दाश्रयत्वस्य कथं शाब्दानुभवविषयत्वमिति वाच्यम् । नियमतो यद्धर्म
अत वत्वेनोपस्थिते यत्र शक्तिग्रहस्तत्स्मरणजनकसंस्कारस्य तद्धर्मे विषयतानियमेन तदुद्बोधकादेव तद्धर्मोप्यु
द्बोधनियमेनाकाशपदाच्छाक्यस्यापि तस्य भानात् अस्तु वा तदपि शक्यं यदि नियमेन तदुपस्थितिः । स
हप्रयोगस्य वाच्यादिपदत्वेनाप्युपपत्तेः । वस्तुतस्तु नियतोपस्थितिरेव नास्ति अस्तु वा पदादपि निर्विकल्प
ध कम् तथेन्वयबोधे शाब्दत्वाभिवान्वयानुपपन्नाभावाद्व्येपि कल्प्यनानवस्थादिति चेत् तर्हि तवापि कार्यत्वबो
धनानं तस्मोपादानिकसाधनताबोधो न स्यात् औपादानिकबोधेनुपपत्तिबोधस्य हेतुत्वात् कल्पना राम॰
मात्रोपस्थे दृश्येवं स्यात् प्रतीतानुपपत्तिमूलकत्वात्कल्पनायाः । वस्तुतस्तु बाधकप्रमाविरहस्य योग्यतात्वे सं राम॰

शयसाधारणं ज्ञानमात्रमेव तस्याः प्रयोजकं तेन यत्र बाधकप्रमानिश्चयस्तत्रैवान्वयबोधाभावोऽन्यत्र तु तद्धी
मात्राद्बोध इति यागेऽपि योग्यतासंशयेनान्वयबोधाप्रतिबंधः। बाधसंशयस्याप्रतिबंधकत्वात्. अन्यथा
नुमानाद्युच्छेदप्रसंगः। अपूर्ववाच्यत्वेप्यपूर्वस्य स्वर्गसाधनतासंशयाद्योग्यतासंशय एव. प्रथममपूर्वस्य न
स्वर्गसाधनत्वानिश्चयाद्रूपादानस्यान्विताभिधानोत्तरकालीनत्वात्. साधकबाधकप्रमाणाभावेन तद्द्वारसं
भावनया साधनत्वसंभावनात्. स्वर्गकामस्वर्गकामान्वयइति तुल्यम्. अपि च. यथा क्रियानस्थिरेत्यये ग्या
तया कार्यमपूर्वमपि विशिष्टं न स्थिरं. क्रतेर्विनष्टत्वात्. न चाधिष्ठानेऽपूर्वमात्रे साधनत्वं. तस्य पदार्थैक
देशत्वेनान्वयात्तस्थिरेत्यये प्रतियोगित्वात्. अन्येत्वन्वयविरोधिरूपविरहो योग्यता. अत एव वह्निनासिं
चतीत्यत्र तद्भ्रमेऽन्वयभ्रमः यागे चान्वयविरोधिरूपविरहो योग्यानुपलब्ध्यासिद्ध एव. न च यागे आशुविना
शित्वं कालांतरभाविफलजनकत्वविरोधीति वाच्यं. अनुभवैकार्थपाने वाऽऽशुविनाशिनि कालांतरभाविफ भा
लजनकत्वात्. यागेऽप्यततस्तत्त्वात्. अन्यथापूर्वं वैफल्यात्. अस्मादन्वयप्रयोजकरूपवत्त्वतद्धीति चेत्.
यच्चिचितेन न. तत्सत्त्वेप्यनाप्तोक्तौ व्यभिचारात्. अन्वयविरोधित्वेन यत्किंचित्स्मृतिसंधानं च तत्रास्त्येव. अतो बाधकप्र

नन्वप्यल

शा॰मू॰ ६१ मा विषयत्वस्यैव विशेषिणो ज्ञानादिति· काम्यसाधनत्वज्ञानमेव प्रवर्त्तकं· लाघवात्· सिद्धौदनस्तृप्तिकामो ल
घूपाये भोजने प्रवर्त्तते· न पाके गुरूपायत्वात्· अलाघवीव सन्निहिते। अत एव ज्योतिष्टोमादेरकृतस्यापि फ
68 लत्वेपि गुरूपायत्वेनाननुष्ठानलक्षणाप्रामाण्यापत्त्या फलभूमा कल्प्यते· इष्टोत्पत्तिर्नान्तरीयकश्रमजनक
त्वं वा प्रतिबन्धकत्वं· अपि च· काम्यसाधनतावोधकडुपादानस्यान्विताभिप्याव्यवहितसाधनतया ज्ञातमे
व यदि कामी कर्त्तव्यतया वेत्तीति नियमः। तदा पूर्व्वमपि पूर्व्वकार्य्यतया नावगम्येत· अन्विताभिधानात्पूर्व्व
काम्यसाधनत्वस्यैव हेतुत्वात्· न तावोधकडुपादानस्यान्विताभिधानोत्तरकालीनत्वात्· अत एव काम्या
दन्यदित्यपि प्रकारद्वयं निरस्तं· कर्त्तव्यताबुद्धौ प्रवृत्तौ वा काम्यसाधनत्वस्यैव हेतुत्वात्· न च कार्य्ये घटादौ
लिङः शक्तिग्रहः। यथा हि लिङः शक्तिग्रहकाले स्वर्गकामान्वयायोग्यत्वात् क्रियानिरासस्तथा यागान्वया
नुपपत्त्या घटादिनिरासोपि स्यात्· न हि यागविषयको घटादिः संभवति· अन्यथान्विताभिधानदशायाम
पि तन्निरासो न स्यात्। स्यादेतत्· स्वर्गकामान्वयानुपपत्त्या तदन्वययोग्ये लिङः शक्तिग्रहः स्थायिकार्य्य राम॰
त्वतया· अतः शक्तिग्रहकाले क्रियानिरासो युज्यते· न घटादेः यत्रिपदमत[illegible]व्यस्वर्गकामपदलिङ्पदा ६१

म्यामन्विताभिधानदृष्ट्यां घटादिनिरासो यागान्वयायोग्यत्वादिति · तत्किं शक्तिग्रहकाले यागान्वया
नुपपत्तिर्हेतुरपि हिताये न घटादिनिरासिका प्रतिसन्धीयते · प्रत्युत प्रत्ययस्यान्तरङ्गप्रकृत्यर्थान्वयं
बोधयत्त एवेतरान्वयबोधकत्वमिति तदन्वयानुपपत्तिप्रतिसंधानमेव प्राथमिकं · पुरुषदोषाद्य
तिसंधाने शक्तिग्रहो भ्रम एव · घटादेरशक्यत्वात् · पुरुषविशेषप्रत्ययस्यैव वाच्यतापत्तेश्च · घटादी
नामनन्तत्वेन च यदि तन्निरासो न शक्यः · तदान्विताभिधानदृष्ट्यामपि न स्यात् · पाकादीनां क्रियात्वेने
व पृथिवीत्वादिना निरासस्सम्भवाच्च · एवं प्रचुरतरद्रव्यगुणकर्मसु निरस्तेषु कार्य्ये धर्म्मिणि शक्तिग्रहः ।
न च विशेषे निरस्तेऽपि कार्य्यसामान्यं निरस्तेऽपि सामान्यं न निरस्तमिति वाच्यं · न हि विशेषाविषयं सामान्य
ज्ञानं सम्भवति · यतेनापूर्वं साधारणकार्य्यत्वेन घटादौ शक्तिग्रह इति परास्तं · अगृहीतासंसर्गेषु स्था
यित्वकार्य्यत्वस्वर्गजनकत्वेषु तत्तज्ज्ञानेषु वा शक्तिग्रह इति परास्तं · स्थायिनां घटादीनां निरासात् · धर्म्मि
मात्रे च शक्तिग्रहस्याप्रकृतेऽनुपयोगात् · किञ्च · तेषु शक्तिग्रहः समुदितेषु प्रत्येकं वा नाद्यः । प्रथमं समु
दायस्यैकज्ञानाविषयत्वात् · विषयत्वे वाऽपूर्व्वमेव विशिष्टस्यापत्वेऽपूर्व्वत्वव्याघात · एकज्ञानविष

शा० मू०
६२
63

२ स्मरणं लिङ्पदादिति युक्तं ... सुखसाधनस्य पूर्वमननुभवात् स्मरणं यदि साकांक्षधर्मिविषयकमेकं ज्ञानं

यत्साकांक्षधर्म्मधर्म्मिणोर्वैविशिष्टत्वात्। न द्वितीयः। एवं हि लिङ्पदात्स्मारणमेवं प्रतिपत्तव्यम् यागस्मारण-
न च चतुर्ष्वेतेषां यौगपद्यमस्ति। न च प्रत्येकं शक्तिग्रहेऽपि समुदितविषयमेकं तदा पूर्वत्वस्मृतिः। ए-
कज्ञानानन्तरयोः साकांक्षधर्म्मधर्म्मिणोर्वैविशिष्टत्वान्नियतत्वाद्वा। एतेन स्वर्गादिपदेष्वगृही-
तसंसर्गो धर्म्मधर्म्मिषु शक्तिग्रह इति व्युदस्तं। प्रत्येकसमुदायविषयकस्मरणविकल्पग्रासात्। अस्तु
वा लिङः कार्य्यं लक्षणा। यथा हि मञ्चाः क्रोशन्तीत्यत्र पुरुषविशेषः प्रागननुभूतोऽप्यनुभूयते। इतरप-
ऋ दाक्षाक्षणिकस्यानुभवत्वाद्वा तथा। पूर्वमपि। अस्तु वा स्वर्गकामकार्य्यविषयो याग इत्यनुभवे स्व-
र्गकामयागयोरन्वयमप्रकारतया। एवं लाभः। यद्वा। कार्य्यविषयो याग इति शाब्दानुभवानन्तरमर्था-
द्यागविषयकं कार्य्यमिति ज्ञानमनुपपत्तिप्रभवम्। अत एव शाब्दबोधानन्तरमौपादानिकबोधास्य
वृत्तिः। किञ्च। एवं वाच्यत्वेऽपि न कलञ्जं भक्षयेदित्यादितः कलञ्जभक्षणाभावविषयकमपूर्वमवगम्यापि
न प्रवर्त्तेत तदभावे। तथा हि कलञ्जभक्षणोऽनागतस्य कर्त्तव्यताबुद्धिर्जाता शाब्दं च भक्षणाभावे। निःफलत्वा- म०
१ यात्सफलं गृह्णीयात् इति न्यायेन सुखहेतौ भक्षण एव प्रवर्त्तेत। न तदभावे। निषेधापूर्वमेव फलमिति चेत्। न। त ६२

॰नाभावे समिल्लिडे वापूर्वं स्वतः प्रयोजनत्वेन बोधयन्तीति तेन विना प्रवृत्तिपरत्वान्निवार्हिदितिरेत्नं निःकृष्य धीक्ष्याविषयत्वं हि प्रयोजन

स्य सुखदुःखाभावान्यतयापण्डत्वेन तज्जनकतया गौणमुख्यप्रयोजनाभावात् सुखवदपूर्वमपि प्रयोज ला
नमितिचेत् न लोके तथानवगमात् अलौकिकयोः स्वर्गापवर्गयोर्लौकावगतप्रयोजनसुखदुःखाभावजा
तीयतया प्रयोजनत्वं वेदेऽपि काम्यस्थले काम्यसाधनस्यैवापूर्वस्य गौणप्रयोजनस्य लिङाभिधानं काम्यसा
धनताज्ञानं विना कामिकार्यत्वस्य बोधयितुमशक्यत्वात् न तु स्वतः प्रयोजनत्वेन तत्रासामर्थ्यादनुपयोगाच्च
प्रवृत्तेर्भोजनादाविव लोकक्लृप्तकाम्यसाधनताज्ञानात् कार्यताज्ञानाद्वा गौणप्रयोजनत्वेनैवोपपत्तेः । नापि
नित्यनिषेधयोरपूर्वं स्वतः प्रयोजनं लिङाभिधीयते काम्यस्थले हि धर्मिग्राहकलिङादिना प्रवर्तककार्य
त्वेनापूर्वमभिहितमतो नित्यादावपि कार्यत्वेनापूर्वं बोधनम् न तु स्वतः प्रयोजनत्वेन ननु नित्ये लोकवे
दावगतगौणमुख्यप्रयोजनत्वमपूर्वस्य सिद्धत्वं लिङा बोधनीयम् न च तादृशेच्छाविषयोऽपूर्वे क्वचित् सिद्धं
न च लिंगे वापूर्वे इच्छां जनयितुं तां बोधयति तस्याः तत्रासामर्थ्यात् इच्छायाः सामग्र्यन्तरजन्यत्वाच्च अ
तोऽपि काम्ये नित्ये वेच्छाविषयत्वं प्रयोजनत्वमपूर्वस्य लिङादिना न बोध्यते अपूर्वे इच्छायाः शाब्दज्ञानात् पूर्वमस
त्त्वात् किंतु शाब्दकार्यताज्ञानानन्तरमिति । अथ नित्ये काम्यत्वेनैवापूर्वस्याभिधानम् न तु स्वतः प्रयोजनत्वेन

श्रा॰ सू॰ किंतु लिङः पूर्वे बोधितेतस्य स्वतः प्रयोजनत्वमिच्छाविषयत्वं भवति सुखज्ञानवदपूर्वज्ञानस्य स्वत एवेच्छाजन
६४ कत्वात् अतः काम्यापूर्वसाधनताज्ञानान्नित्ये कार्यताबोधांशे प्रवृत्तिरिति चेत् न अपूर्वज्ञानस्येच्छाहेतुत्वे न
64 नाक्लृप्तत्वात् काम्यापूर्वे हि लोके इष्टसाधनताज्ञानादेवेच्छा न त्वपूर्वत्वज्ञानात् शास्त्रस्थस्य शास्त्रजक
र्त्तव्यताज्ञानं बलवदिति चेत् सफलं विषयं तथा इदं च निष्फलविषयं अथ प्रवृत्तिमतो निवृत्तिनियोगेऽभि
कारऽत्तिमदाभक्षणप्रवृत्तस्तदा तन्निषेधे शास्त्रे कार्यताधीरिति तया विपरीतप्रयत्नेजनिते रागान्न क्रियो
त्पत्तिस्तेनैव प्रतिबन्धात् रागकारितप्रवृत्तिमुपजीव्य हि तन्निवृत्तिकार्यता शास्त्रेण बोधिता अतस्तेन नवो
धेन स्वफलं विपरीतकृतिरवश्यमुत्पाद्येति शास्त्रस्य बलवत्त्वमिति चेत् न निवृत्तिकार्यताबोधेपि निवृत्तौ प्र
यत्न एव नोत्पद्येत यस्य प्रतिबन्धकता स्यात् स्याच्च निवृत्तिकार्यताबोधकमप्रमाणम् निष्फलत्वेन क
तेऽभानात् अथ कलञ्जभक्षणस्य निषेधार्थवादेन बलवदनिष्टसाधनत्वावगमात् तद्भक्षणे न प्रवर्त्तत इति चे
त् एवमपि कलञ्जभक्षणे निवर्त्ततां तदभावे निःप्रयोजनतमा प्रवृत्तौ किमायातमिति एतेन नित्यापूर्वसाध एम॰
ने संध्यावन्दनादावपि प्रवृत्तिरपास्ता क्रियायाः कष्टत्वात् तदपूर्वस्य परत्वात् स्वतो प्रयोजनत्वाच्च तस्मान्नो ६४

केपचतेत्येवमादौ कार्यत्वेष्टसाधनत्वरूपधर्म्मशक्तत्वेन ज्ञाताल्लिङः स्वर्गकामो यजेतेत्यादौ तदन्वययोग्यता
दिवशाद्बोधयतीति न वेदे धर्म्मिणि शक्तिकल्पना। प्रतीतायां स्वर्गसाधनसाक्षात्साधनस्य यागस्य व्यापारमन्त
रेणानुपपद्यमाना स्वर्गनिर्वाहकं व्यापारमपूर्वं कल्पयति। ननु निरुपधिपूर्ववर्त्तिता कारणता सा व्यापारेण
निर्व्वाह्यत इति कोऽर्थः किं क्रियतेऽतः प्राप्यते। नाद्यः ऽनन्तवर्त्तित्वेन व्यापारस्य तत्रासामर्थ्यात्। नेतरः। लिङै
वतद्बोधनात्। चिरध्वस्तकारणं व्यापारेणाप्तमिति चेत्। न। विपक्षबाधकाभावेनाप्रयोजकत्वात्। अन्य
था ऐन्द्रियकं कारणमतीन्द्रियव्यापारकमिति यागानुभवयोर्दर्शनान्न भाक्कल्पेत। प्रायश्चित्तादीनां च फ
लप्रतिबन्धकत्वमेव। प्रायश्चित्तस्य तस्मादेनसः पूर्वं तो भवतीति यत्फलं श्रुतमस्ति तस्य निषिद्धक्रियातः फ
लमाद्भवतीत्यर्थः। धर्मः क्षरति कीर्त्तनादिति हितक्रिया क्षरति फलं न जनयतीत्यर्थः। क्षरतीत्यत्र बाधकं वि
नानलक्षणेति चेत्। न। ऽपस्थितत्वेन विहितक्रियायामेव धर्मपदशक्तिग्रहस्य बाधकत्वात्। न चैतस्य मुख्य
त्वार्थपदार्थान्तरे शक्तिः। लक्षणोच्छेदापत्तेः। विहितक्रियाकर्तृत्वज्ञाने धार्म्मिकपदप्रयोगाच्च। एतेन देव न
दत्तशरीरं देवदत्तविशेषणगुणप्रेरितभूतपूर्वकम्। जन्यत्वे सति तद्भोगसाधनत्वात्। तन्निर्मितस्रग्वदित्य

श्रा॰ मू॰ ६५ नुमानाददृष्टसिद्धिरिति परास्तम् । जन्मान्तरीयज्ञानादिभिरेव तज्जनकत्वाभिमते सिद्धसाधनादिति । मैवम् । चि
रध्वस्तस्य व्यापारसत्त्वे कारणत्वमिति निरूपकान्वयव्यतिरेकाभ्यां व्याप्त्यवधारणाद्यागस्य चिरध्वस्तकारणत्वेन व्यापा
65 रकल्पनात् । कार्ये व्यापारस्य पृथगन्वयव्यतिरेकग्रहस्तद्व्यापारकत्वउपाधिरिति चेत् न । संस्कारे तदभावेप्यनुभ
वस्य तद्व्यापारकत्वात् । न चाप्रयोजकत्वं यागो यदि चिरध्वस्तत्वे सति सव्यापारो न स्यात् स्वर्गसाधनं न स्यात् । घ
टवदिति विपक्षबाधकात् । न चात्र कारणताग्राहकाभावउपाधिः । तेनापि समव्याप्त्यवधारणेन तस्याप्युपा
दानात् । न चेंद्रियकस्यातींद्रियव्यापारकत्वनियमः । सव्यापारत्वे कार्याव्यवहितपूर्वसमयेऽसत्त्वस्योपाधि
त्वेनाप्रयोजकत्वात् । नन्वेवं संध्यावंदनाकरणस्यादृष्टसाधनत्वश्रुतेस्तत्कारणप्रागभावोऽदृष्टहेतुः । तथा च तस्य
स्थिरत्वेनादृष्टजननं न संभवान्न पापे प्रमाणम् । न च प्रायश्चित्तवैफल्यम् । प्रायश्चित्ताभावसहकृतस्यैव त
स्य तज्जनकत्वात् । यत्तु प्रागभावनाश एव तेन क्रियत इति तन्न । ध्वंसप्रागभावानवच्छिन्नकालस्य प्रतियो
गिकालत्वेन तदाकरणापत्तेरिति चेत् । न । संध्याकालीनाकरणस्यादृष्टसाधनत्वाद्विशिष्टस्य संध्याकाला एम॰
पगमेऽपगमात् । न च संध्याकालीनाकरणे विशेषणं किंतु प्रतियोगिनि करणे । तथा च विशिष्टाभावः ६५

स्थिर एवेतिवाच्यम्· संख्यायाद्यकरणोन्वयस्तस्यपदार्थत्वात्· नतुकरणे· तस्यपदार्थैकदेशत्वेनाप्र
धानत्वात्· तथापि ध्वंस एवव्यापारोस्तु· तवसहभावं निरूपकस्यापिकारणत्वात्· तस्यानन्तत्वेपिस्वभा
मं· मंगे वात्सावधिफलजनकत्वं· यत्रयद्ध्वंसोहेतुस्तत्रतत्प्रागभावोपीतिचेत्· न· दुग्धध्वंसजन्यदधिमिथ्याधी
ध्वंससाध्यमुक्तौचव्यभिचारात्· प्रतिबंधकाभावत्वेनहेतुत्वेतथाभावाद्ध्वंसेनानुपपत्तिः कथंतेनैवस
माधातव्येतिचेत्· न· ध्वंसस्तितद्व्यापारत्वज्ञानंविनानुपपत्तेः। तद्व्यापारत्वकल्पनयाशंते इतिमैवम्·
न प्रतियोगिध्वंसयोरेकत्राजनकत्वात्· नहिनियमतोयद्ध्वंसेयद्भवतितत्तत्रकारणम्· नचसंसर्गाभावत्वे
नहेतुत्वेतथेतिवाच्यम्· व्यभिचाराभावेनतस्यापिप्रयोजकत्वात्· अपूर्वाद्यागकरणताव्यापारंविना
तदनुपपत्तेस्तज्जन्यध्वंसस्यव्यापारकत्वकल्पनमिति उभयमपिजनकम्· अन्यत्रमानाभावान्नतथेतिवा
च्यम्· तन्न· यागध्वंसस्ययागजन्यस्वर्गाप्रतिजनकत्वस्यप्रमाणान्तरविरोधेनार्थापत्त्याप्यकल्पनात्॥ अ
ना स्तुदेवप्रीतिरेवव्यापार इतिचेत्· न· यागस्यदेवताप्रीतिहेतुत्वेमानाभावात्· गंगास्नानादौदेवताविरहेणात
दसंभवात्· नचतत्रापितत्प्रीतिः। तस्यतत्प्रीतिहेतुत्वेमानाभावात्· लाघवेनकर्तृभोक्तृगतव्यापारकल्पना

श्रा·सू·
६६
66

च्चेति। ननु नायं नियमः पुत्रकृतगयाश्राद्धादिना पितरि पितृकृतजातेष्ट्या पुत्रे चादृष्टोत्पत्तेः। अथ तत्रापि
कर्त्रैवादृष्टम्। विहितक्रियायाः यागस्येव कर्तृगतादृष्टजनकत्वात्। न च मुक्ते पुत्रे तददृष्टनाशात्
पितरि न स्वर्गः स्यादिति वाच्यम्। अदृष्टस्य फलनाश्यत्वेन पितृस्वर्गाभावेनादृष्टनाशात्। स्वरति
भोगजनकादृष्टस्य मुक्तिविरोधित्वात्। ननु पितृगतमदृष्टं जन्यते। मुक्ते पितरि दोषाभावेन योगिना
मिव विहितक्रियायाः पित्रदृष्टाजनकत्वात्। तथात्वे च सांगमपि श्राद्धादिकं निःफलं स्यादिति तद्वि
धेरप्रामाण्यापत्तिः। पुत्रगतादृष्टेन मुक्ते पितरि सुखोत्पत्तौ न विरोधः। योगिनामिव सुखोत्पत्तौ दो
षस्याहेतुत्वात्। अथ पितृसुखं पितृपुण्यजन्यमिति पितरि पुण्यं तेन विना तदभावात्। न पुत्रे। तत्रै २
फलप्रसंगात्। पितृस्वर्गकामनाजन्यक्रिया पितृपुण्ये हेतुरिति पुत्रक्रिया पितृजनिकेति चेत्। ए
स्वर्गकामनाज न्य वं पितृक्रिया पितृपुण्यजन्यजनिकेति न तां विना पितरि पुण्यम्। पुत्रक्रिया पुत्रपुण्यजनिकेति पुत्रे पु
ण्यं। पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्गहेतुरस्तु। तत्पुण्यं पितृवृत्ति। तत्सुखहेतुपुण्यत्वात्। न एम०
च पुत्रवृत्ति। तत्सुखहेतुपुण्यत्वादिति चेत्। न। तत्पुण्यं न पितृवृत्ति। तत्कृत्यजन्यपुण्यत्वात्। पुत्रवृत्ति ६६

वा॰ तत्कृतपुण्यत्वात्॰ तस्मात्पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्गहेतुत्वे तिपुत्र एव तत्पुण्यमिति॰ मै
वम्ः स्वर्गोपपादकं तस्य पूर्वं स्वर्गाश्रयो कल्प्यते प्रथमोपस्थितत्वात्॰। लाघवात्॰ कल्पनायाः साक्षादुप
पादकत्वविषयत्वाच्च॰ नस्वर्गहेतुकामनाश्रयो स्वर्गी कामनाजन्यक्रियाकर्त्तैरेवाः विलम्बितप्रतिपत्ति कोपस्थितिकल्पना
कत्वात्॰ गौरवात्॰ परंपरया स्वर्गोपपादकत्वाच्चायदि च पुत्रकृतपुण्येन मुक्तस्य शरीराद्युत्पत्तिः सुखं च
स्यात्तदा सा हि विधयांस्तत्वाभिधानादि पुत्रक्रियाजन्यपापेन सविष्ठायां कृमिर्भूत्वा पितृभिः सह य
च्यत इत्यादिवाधितनरकभागितापि मुक्तस्य पितुः स्यात्॰ तथा च पुत्रकृतः तथाविधशंकया न कश्चि
न्मोक्षार्थी ब्रह्मचर्यादिदुःखेनात्मानमवसादयेत्॰ दुःखेनात्यंतविमुक्तश्चरति न सपुनरावर्त्तत इति श्रु
तिविरोधश्च॰ तथा च मुक्तस्य सुखदुःखे शरीरादिकं च भवतीत्यपदर्शनमः मुक्ते पितरि श्राद्धादिना
दोषाभावादेवनादृष्टमुत्पाद्यते॰ नचैवं सांगश्राद्धस्यापि निःफलत्वमः अदृष्टोत्पत्तौ स्वरूपसतो दोष
स्याङ्गस्यैव गुणत्वात्॰ यथा विघ्नहेतुदुरितशून्येन कृतं मंगलं नपापध्वंसं जनयति॰ स्वरूपसतः पापस्या
ङ्गस्याभावादिति॰ एवं च यपास्यापि व्यधिकरणव्यापारो भविष्यतीति॰ उच्यते॰ विहितक्रियया कर्त्तृगतव्या

श्रा॰सू॰
६१
67

पारद्वारकालांतरफलंजन्यतइत्युत्सर्गः।सच्चबलवत्ताबाधकेनापोद्यते।प्रकृतेचबाधकंनास्ति·यथाशास्त्रेदर्शितंप
त्वमनुष्ठातरीत्युत्सर्गः·पुत्रकृतगयाश्राद्धस्यपितृस्वर्गंप्रतिपितृकृतजातेष्टेः·पुत्रपूतत्वादिकंप्रतिहेतुत्व
स्यशास्त्रेणबोधनात्·॥नन्वयंनियमएवपितृयज्ञजातेष्ट्यादौपरंपरासंबंधेनकर्तृगतमेवफलंनहियस्य
कस्यापिपितर्यपिपुत्रेवाफलं।किंतुस्वपितृपुत्रयोः।तथाचस्वपितृगतत्वंस्वर्गभागिपितृकत्वंवापरंपरा
संबंधःफलेनपुत्रस्य।एवंपुत्रपूतत्वादिकमपिपितृगतमेव·नचफलस्यापिकर्तृगतत्वसामान्यात्संबंधेनैवे
तिवाच्यं·ग्रामपशुपुत्रहिरण्यादीनांपरंपरापिकर्तृगतत्वमितिव्यभिचारात्·नहिग्रामादयःकर्त्तरिसाक्षा
त्संबद्धाः।एवंफलस्यसाक्षात्कर्तृगामिताबोधनेशास्त्रस्योत्सर्गोनतुफलस्यकर्तृगामिताबोधने·य
त्तुस्वर्गभागिपितृकत्वंनफलं।तत्कामनायाअधिकारिविशेषणत्वाभावात्·पितृस्वर्गकामइत्यादिश्रुतेः·स
त्त्वेतथाकामनयाप्रवृत्तौश्रुतकामनाविरहेणप्रयोगेंगवैगुण्यात्फलाभावप्रसंगः।किंचस्वर्गभागिपितृ
कत्वंविशिष्टंतत्रविशेष्यंतपितृकत्वंनकाम्यं।नवाफलं।सिद्धत्वात्तदसाध्यत्वाच्च·किंतुविशेषणंपितृगत श्रा॰म॰
स्वर्गइतिसएवफलमिति।तन्न।नहिस्वर्गभागिपितृकत्वंफलं।अपितुस्वर्गेणसमंपुत्रस्यपरंपरासंबंधइ ६१

१॰

पंतदुक्तमिति। उच्यते। परंपरासंबंधेन यदि पुत्रगतत्वं पितृस्वर्गस्य तदा संयुक्तसंयुक्तसमवायेन पुत्रेतरस्यापि फलं
स्यात्‥ स संबंधो न शास्त्रेणबोधित इति चेत्तर्हि स्वर्गभागिपितृकत्वमपि न तथा। शास्त्रेणाबोधितत्वात्‥ आमय
शुहिरण्यादीनां च सिद्धत्वेन न काम्यत्वं किंतु तद्विषयकं स्वत्वं काम्यं। फलमपि तदेव। तच्च स्वत्वादेव कर्तृगतमिति
कर्तृगतत्वेन फलसाक्षात्संबंधो नियत एव‥ तस्माद्यद्गतत्वेन फलकामना तद्गतमेव शास्त्रदेशितं फलं‥ अत
एव कामनाविषयः स्वगत एव स्वर्गः फलं यागादेः। स्वर्गपूतत्वादेश्च पितृपुत्रगतत्वेन काम्यत्वमिति श्राद्धजाते
१गा ष्ट्यादेः पितृपुत्रगतमेव फलं। एवं च मातापित्रादिगतस्वर्गकामनया पुत्रादिना कृतपुष्करिणीमहादानादि
कं पित्रादिस्वर्गजनकमेव। कामनाविषयतत्स्वर्गादिसाधनत्वेन तेषां श्रुतत्वात्‥ न हि स्वगतस्वर्गकामस्य क
र्तव्यतां पुष्करिण्यादेर्विधिर्बोधयति तथाऽश्रुतेः किंतु स्वर्गकामस्य। स्वर्गश्च स्वगतः परगतो वेति स्वर्गकाम
त्वमविशिष्टं‥ यज्ञेनेत्यात्मनेपदमपि कर्त्रभिप्रेतक्रियाफलमात्रजनकत्वे। स्वर्गश्च स्वगत‥ कामो दध्यादिन्या
दौ स्वगतकामनाया श्रुतं रागत्वादौत्सर्गिकत्वाच्च स्वर्गकामत्वेन स्वगतस्वर्गकाम एवोच्यते‥ सामान्यबाधकं वि
नाविशेषपरत्वमानाभावात्‥ केचित्तु सम्यग्गृहस्थाश्रमकर्मपरिपालनस्य ब्रह्मलोकावाप्तिः फलं श्रूयते

श्रा॰सू॰
६८
68

इति जाते ष्टिपितृयज्ञयोरपि गृहस्थकर्मत्वेन तद्देवफलमिति फलस्य कर्तृगामित्वे नियम एव प्रातिस्विकफला
भिप्रायेणोत्सर्ग इत्याहुः॥ ननु यावज्जीवित्वर्थं परिपालनस्य तत्फलं न तु काम्यश्राद्धादेः। काम्यांतर्भावे मानाभावा
त् यावत्काम्यानुष्ठानाशक्तेश्च यावच्छक्यानुष्ठाने नस्यापि नांतर्भावः कामनाविरहादिनाप्यकारणात् याव
ज्जीवित्यानुष्ठाने तत्फलाभावप्रसंगात् नित्यस्यैवावश्यकत्वेनोपस्थित्यात् न्यायाच्च अपि च तैः कर्मभिः प्रत्येकं इ
ष्यत एवं जन्यते तेऽपरमापूर्वं जन्यत इति न गौरवान्मानाभावाच्च किं त्विति मक्रियपापपरिपालनरूपेणाक्रि
कर्म पांतरेणावेति न सर्वं खल्लोकावाप्तिफलकमिति॥ मैवं भगवदुद्देशेन कृतस्य काम्यस्य नित्यस्यैवस्य कस्यापि व
पारि कर्मणः पालनाद्धस्तलोकावाप्तिः फलं स्यादत इति जाते ष्टिपितृयज्ञयोस्तथाकृतयोस्तद्देवफलं तथा च श्रीभग
कर्म वद्गीता यज्ञायाचरतः कर्म समग्रं प्रविलीयते यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबंधन इति तच्च कर्म यज्ञार्थं
तया प्रत्येकमेव तत्फलसमर्थं सवलनं तु मंगलवद्रूपमुच्यते अन्यथैकप्रयोगस्य व्यवधानादसंभवः परि
पालनं तु कर्तव्यमित्येव कारणं तदुक्तं ददामि देयमित्येव यजे पक्षव्यमित्यहमिति यत्तु निषिद्धासंबंधए एम॰
व सम्यक्त्वं न तु विहितमात्रानुष्ठानमिति तन्न यत्किंचिन्निषिद्धासंबंधस्याभावात् सर्वे निषिद्धासंबंध ६८

स्य सर्वत्र सुलभत्वादिति संप्रदायः ॥ ॥ तत्र ब्रूमः भगवदुद्देशेन कर्तव्यत्किंचिदेव कर्म सर्वं वा काम्यं
वा सर्वं नित्यं वा सर्वमिति। नाद्यः एकेनैव काम्येन नित्येन वा स्नानेन तथाभूतेन तत्फलसिद्धौ बहुवि
तव्यया ससाध्ये श्राद्धादावप्रवृत्त्यापत्तेः नापरौ अशक्यत्वात् न तुर्यः। स्नाते श्राद्धादेर्नित्यत्वाभावात् तस्मा
त्सम्यग्गार्हस्थ्याश्रमपरिपालनस्य तत्फलं सम्यक्त्वं तु सामस्त्यमेव। अतो न श्राद्धादेर्ब्रह्मलोकावाप्तिरि
ति साध्यत्वं शास्त्रे देशितं फलमनुष्ठातरि तत्फलसर्ग इति। तच्च फलं क्वचिद्वाक्यश्रुतं क्वचिच्चार्थवादिकमिति
॥ ॥ ॥ ४ ॥ ॥ नन्वर्थवादानां सिद्धार्थतया न प्रामाण्यं। कार्यान्वित एव पदानां शक्त्यवधारणात् व्यवहारा
देव सर्वेषामाद्यव्युत्पत्तिः ऽपापांतरस्य शब्दव्युत्पत्त्यधीनत्वात् तथा हि प्रयोजकवाक्योच्चारणानंतरं प्रयो
ज्यप्रवृत्तिमुपलभमानो बालः प्रेक्षावद्वाक्योच्चारणस्य प्रयोजनजिज्ञासायां तदन्वयव्यतिरेकानुविधायित्वादुप
स्थितत्वाच्च प्रयोज्यप्रवृत्तिमेव प्रयोजनमवधारयति न चाकिंचित्कुर्वतस्तादर्थ्यं संभवतीति तज्जन्यप्रवृत्त्यनु
कूलं कार्यताज्ञानमेव कल्पयति स्वप्रवृत्तौ तेन कार्यताज्ञानस्यैव हेतुत्वावधारणात् नान्यत्। प्रवृत्तेः कार्य
ताज्ञानावरुद्धत्वात् नन्वेवं शब्दस्य ज्ञानद्वारा प्रवृत्तिहेतुत्वं। स्वप्रवृत्तौ बालेन प्राग्गृहीत विशेषणस्य कार्य

श·म्स ताज्ञानस्यहेतुत्वेनानवधारणात्· ज्ञानेचप्रत्यक्षत्वादिनानोपायकत्वदर्शनाच्चबुद्धेरपिकार्यान्वितज्ञानहेतुरित्यव
६८ पृ धार्यतेतत्रैवशक्तिंकल्पयति उपस्थितत्वात्· पश्चाद्द्वावापोद्वारेणक्रियाकारकपदानांकार्यान्विततत्तदर्थेषुशक्तिं
69 गृह्णाति· प्रथमगृहीतसामान्यशक्त्यनुरोधात्॥ ॥स्यादेतत् यद्यपिवृद्धव्यवहारादादौकार्यान्वितधीरनुमि अथ
तातथाप्यन्वितमात्रशक्त्यैवकार्यतावाचकपदसमभिव्याहारादाकांक्षाज्ञादिमहिम्नाकार्यान्वितधीसंभ
वात्तत्कार्यांशेपिशक्तिः॥ परंपरमपिशब्दस्यकार्यान्वितज्ञानानुकूलत्वादर्थापत्तावन्यथोपपत्तिरपि॥ अ
वश्यंचाकांक्षादेः कारणत्वंकार्यांशशक्तावपितद्व्यतिरेकादन्विताभिधानव्यतिरेकनियमात्· सतिचाकां
क्षादौकार्यव्यतिरेकदर्शनादन्विताभिधानव्यतिरेकोनक्वाप्यस्ति· अन्यथागवादिपदानांव्यक्तावपिशक्तिः
स्यात्· संस्कारादेवव्यक्तिलाभदर्शनान्नतथेतियदितदाकार्यवाचकपदादेवकार्यान्वितलाभइतिकिंशक्त्या·
वृद्धव्यवहारेनियमतः कार्यान्वितज्ञानंदृष्टमितितत्रशक्तिकल्पनेवृद्धव्यवहारेशब्दोपस्थापितेनैवान्वयबो
धदर्शनाच्छब्दसंनिधेरप्यन्वयबोधहेतुत्वकल्पनेद्वारमित्यादौशब्दैरेवाध्याह्रियेत· क्वचिदसमर्पणेवाक्येवृद्ध एम०
व्यवहारादाद्यव्युत्पत्तिः शब्दसंनिधिर्व्यभिचरतीतिचेत्तर्हिसिद्धार्थेप्यन्वयप्रतीतिदर्शनात्कार्यत्वमपिव्यभि ६८

चारि॰ न च तत्र लक्षणाबाधकाभावात्॰ शक्तिकल्पनापि यात्वन्यत्र लक्षणानुमता। इदं तु लघीयस्त्वादुभयसाधारण
पदार्थमात्रशक्त्यामुपस्थितस्यैवोचितत्वात्॰ किंच कार्यवाचिलिङादीनामाकांक्षाद्युपेतपदार्थान्वितस्वार्थबोध
कत्वमेव शक्यं वाच्यं। अतोऽविशेषात्पदान्तराणामपि तथात्वमस्तु लाघवादिति॥ ॥नैवं॰ व्यवहारहेतुतयाऽनुमि
ते हि कार्यान्वितज्ञाने अन्वयव्यतिरेकाभ्यां शब्दस्य साक्षात्कारणत्वमवधारयति। न यं परमोपा॰ साक्षात्त्वस्यौत्सर्गिकत्वे
न तत्संभवे परंपरया अन्याय्यत्वादिति तत्रैव शक्तिं कल्पयति। नान्वितज्ञाने पदार्थज्ञाने वा। अप्रवर्तकतया प्रत्यक्ष
कारणत्वेन तयोरनुपस्थापनात्। न चान्वितज्ञाने शक्तावपि परंपरया कार्यत्वधीः संभवतीत्यर्थापत्त्यैव कल्प्यतां ला
[कार्यतो शे] घवात्॰ ननु विशिष्टज्ञाने शक्तिरन्यलभ्यत्वादिति वाच्यम्॰ अर्थापत्तेः साक्षादुपपादकमात्रविषयत्वेन न्यूनाधिक
र्थाग्राहकत्वात्॰ साक्षादुपपादककार्यान्वितज्ञाने शक्तिः कल्प्यते। लिङादीनां शक्तेरकल्पनादन्यलभ्यत्वतर्कस्या
प्यभावात्॰ आद्यक्षत्पत्तेर्विचार्यत्वात्। किंच प्रवृत्तिकारणतयोपस्थितं कार्यत्वान्वितज्ञानमपहायानुपस्थितान्व
यज्ञानमात्रे शक्तिकल्पनमयुक्तं हेत्वभावात्। उपस्थित्यंतरेण गौरवात्॰ अथ कार्यान्वितज्ञानोपस्थितावन्वितज्ञा [प्प]
नमप्युपस्थितमिति लाघवात् कार्यांशमपहायान्विते शक्तिर्गृह्यतामिति चेत्॰ न॰ ज्ञाने हि पदानां शक्तिः शक्यत्वात्॰
नार्थे॰ अन्यच्च कार्यान्वितज्ञानमन्यदन्वितज्ञानं। विषयभेदेन ज्ञानभेदात्। तदुक्तमभाववादे अन्यद्भूततज्ज्ञानमन्यद्भूद्व

शा· सू· ७० द्भूतलज्ञानमिति । अन्वितज्ञानमुपस्थाप्यत इति शक्तिग्रह इति गौरवमिव लघुनिशाक्येसलवत्यन्यलभ्यं गुरुत्तनतथेति
चेत् न । युगपदुपस्थितौ तथात्वात् । न च तस्यानुपस्थितिः पुरुषविशेषदोषात् सर्वैरेवाद्यक्लृप्तत्वात् तथा नवगमात् ।
तथापि न कार्यान्विते शक्तिः कार्यवाचि लिङादीनां व्यभिचारादिति चेत् न । सर्वपदानां कार्यत्वविशिष्टबोधजनक
त्वात् । तच्च कार्यान्वितस्वार्थप्रतिपादकत्वेन तदन्वितस्वार्थकार्यप्रतिपादकतया वेति । एवं कार्यान्वितक्लृप्त्यन्तौ सत्या
मनाकांक्षादेर्व्यभिचारादाकांक्षादेरुपाधित्वं । तथा चोपजीव्यप्रथमभाविकार्यान्वितव्युत्पत्त्यनुरोधेन विध्यश्रु
तावपि कार्याध्याहारः । क्वचित् लक्षणा । क्वचिदसंसर्गाग्रह इति ॥ सिद्धार्थेऽन्वयप्रतीतिदर्शनादुत्तरकालमन्वि
तमात्रशक्तिरेव कल्प्यतां । प्राचीनकार्यान्वितज्ञानं बाध्यतामित्यपास्त एव निरस्ते । पूर्वकल्पनातः कल्पनान्तरे प्रसंगा
त् । उत्तरकालभाविसिद्धार्थप्रयोगस्य लक्षणादिभिरुपपत्तेः । अनन्यथासिद्धत्वाभावेन प्राचीनज्ञानाबाधकत्वात् ।
उपजीव्यव्याघाताच्च । अथ सिद्धार्थेपि व्युत्पत्तिः संभवति । तथा हि उपलब्धचैत्रपुत्रजन्मा बालस्तादृशेनैव वार्त्ताहा
रेण चैत्रसमीपं गतश्चैत्रपुत्रस्ते जात इति वार्त्ताहारवाक्यश्रवणानन्तरं चैत्रस्य मुखप्रसादं पश्यन् पश्चात्तद्धर्षमनुमि
नोति । हर्षोत्पत्तौ च तत्कारणं पुत्रजन्मज्ञानं कल्पयति उपस्थितत्वादुपपादकत्वादन्योपस्थितौ गौरवाच्च तत्र वाक्यस्य का रण० ७०
रणतां कल्पयति लाघवादिति चेत् न । हर्षहेतूनां बहूनां संभवात् हर्षेण लिंगेन पुत्रजन्मज्ञानस्यैवानेनानुमातुमशक्य

त्वात् । पिपासितत्वज्ञानस्य परिशेषयितुमशक्यत्वाच्च । अथ पुत्रजन्मज्ञानाव्यभिचारिहर्षश्राद्धादिक्रियाविशेषद
र्शनात्पुत्रजन्मज्ञानानुमानमिति चेत् । तर्हि पुत्रस्ते जात इति वाक्यं तत्क्रियाकर्तव्यतापरमेवेति कार्यत्वान्वितज्ञान
जनकत्वमेव तस्य प्रथमतो गृह्यते ऽनन्तरकालं पुत्रजन्मज्ञानानुमानमिति तत्व्युत्पत्तिः कार्यपरा हि । यत्रापीह सह
कारतरौ मधुरं पिको रौतीति प्रसिद्धार्थपदसामानाधिकरण्यादिभिर्व्युत्पत्तिस्तत्रापि व्यवहाराधीनव्युत्पत्तिपू
र्विका कार्यान्वित एव युक्ता पिकपदशक्तिः पूर्वेणावधृतेति चेत् । तत्रापि पिकमानयेत्यादौ कस्यचित्कार्यान्वितव्यु
त्पत्तेरुपजीव्यत्वादीयत्तया तस्याबलवत्त्वं किं चेदमपि पदं कार्यान्वितज्ञानशक्तं पदत्वादिति सामान्यतोऽवगतेः । स्वार्थ
विशेषपर्यन्ता त्ववगतिः । सङ्केतानीकरूढ्युपदेशादिभिरवगम्यते । अतः सिद्धं प्रवृत्तिपराणां शब्दानां प्रवर्तकज्ञा
नजनकत्वात्तच्च क्वचित्साक्षात्क्वचित्परंपरया कार्यान्वयात् । अत एव विधिशेषीभूतार्थवादानां स्वर्गादिपद
शक्तिग्राहकाणां च प्रवृत्तिपरत्वेन परम्परया कार्यान्वयात्कार्यान्वितस्वार्थबोधकत्वमिति । यत्र पुराणभारता
दिपाठे फलश्रुतिरस्ति तत्रार्थवादकल्पितविधिशेषीभूतत्वेन प्रवृत्तिपरत्वमेव तेषामिति परंपरया कार्यान्व
यात्कार्यान्वितस्वार्थबोधकत्वं स्वरूपाख्यानपराणां तु काव्यनाटकादीनां पदार्थसंसर्गाग्रहेण संसर्गग्रह

॥ हेतुविशेषयोः स्यात् ... हेतुरिति चेन्न । विशेषयोरन्वयव्यतिरेकाभ्यामेव तद्ग्रहात् । न तु यथा धर्म... विशेषयोः कार्यकारणभाव ॥

शा॰ वृ॰ ७१ इति ॥ ७४ ॥ ७४ ॥ ॥ अत्रोच्यते । घटमानयेति वाक्यश्रवणानन्तरं प्रयोज्यस्य घटानयनगोचरप्रवृत्त्या घटानयन

कार्यताज्ञानमनुमितं बालेन । न तु कार्यान्वितज्ञानं प्रवृत्तिविशेषे तस्याहेतुत्वात् । घटादिपदशक्तिग्रहे ५

नुपयोगाच्च । तत्र च ज्ञानविशेषे घटमानयेति वाक्यविशेषस्यानाकलितपदविभागस्य हेतुत्वमवधार्य घटपद

द्वितीयाधात्वादिप्रत्ययानां प्रत्येकावापोद्धारेण घटकर्मत्वानयनकार्यत्वज्ञानेषु प्रत्येकं कारणत्वमवगम्य

शक्तिं कल्पयति । पश्चात्प्रवृत्तिसामान्येनानुमितकार्यत्वान्वितज्ञाने वाक्यमात्रस्यान्वयलभ्यत्वेन कार्यांशम

पहायान्वितज्ञानमात्रे कल्पयति । न तु प्रथमवाक्यमात्रस्य कार्यत्वान्वितज्ञानमात्रे हेतुत्वकल्पनं । अथ घ

टानयनक्रियायाः प्रथमं क्रियात्वज्ञानात् प्रवृत्तिमात्रानुमानं तेन च कार्यान्वितज्ञानमनुमाय तत्र वाक्य

मात्रस्य हेतुत्वं कल्पयित्वा शक्तिं कल्पयति । तदुक्तं विशेषयोः कार्यकारणभावधीरिति चेत् न । प्रथमप्र

वृत्तिमात्रकार्यान्वितज्ञानमात्रयोरनुमानं बालस्य क्रमशो भवतीत्यत्र मानाभावात् । घटादिपदशक्तिग्र

हस्य तेन विनापि संभवात् । न च तदनुमानसामग्री तदा वृत्तेति वाच्यं । तदा व्याप्त्यादिस्मृतौ मानाभावात् । राम॰

सामान्ययोः कार्यकारणभावग्रहे तत्सामान्ययोरपि हेतुमद्भावो भासते । अन्यथा नसकृद्दर्शनगम्यव्या

त्तिः स्यात् तथाऽत्रापि विशेषयोः कार्यकारणभावविनिवेश एव सामान्ययोस्तथाभाव इति चेत् न प्रत्यक्षेणार
विशेषग्रहेऽयोग्यत्वात् सामान्यमपि भासते प्रकृते च कार्यविशेषेण कारणविशेषोऽनुमितो न सामान्यमिति
न युगपदुपस्थितिः । अथ विशेषयोः कार्यकारणभावात् सामान्ययोरपि तथात्वमनुमापयतीति चेत् तर्हि विशेष
योः कार्यकारणभावावगमः प्राथमिक इति तन्मूलकः प्रथमं पदविशेषशक्तिग्रह एव स्यात्तिः प्रयोजन
कत्वेनातएवानुमितौ मानाभावात् पश्चोक्तं प्रवृत्तिकारणतयोपस्थितं कार्यान्वितज्ञानमपहायान्वितज्ञाने कल्प
पित्वात् तत्र शक्तिकल्पनमयुक्तं महत्त्वं यथा गौरवादिति । तन्न कार्यान्वितज्ञानेऽन्वितज्ञानमपहायान्वितज्ञानं
कल्पयित्वा तत्र लघुसत्वात् तद्विशेषत्वान्नस्य । अतस्तत्रैव शक्तिग्रहो न कार्यत्वांशेऽपि अत एव घटवद्भूतलज्ञा
ने भूतलज्ञानत्वमपीति तद्भिन्नं तज्ज्ञानमभावव्यवहारकं त्वयापि स्वीकृतं । अस्त्वेवं किं तु तदुपस्थितावप्यन्वि
तज्ञानत्वेन विषय इति तस्योपस्थित्यंतरं कल्प्यमिति चेत् न कार्यान्वितज्ञानेऽन्वितज्ञानं विशिष्यमिति तदुप
स्थितौ तस्यापि विषयत्वात् विशिष्टज्ञानसामग्रीतो विशिष्यभानात् तद्रूपाभावात् । अन्यथान्यजातिज्ञानं
अन्यच्च जातिविशिष्टज्ञानमिति व्यक्तिज्ञानमपहाय जातिज्ञानं कापि नोपस्थितमिति न तव जातिरेव पदा

शा॰मू॰ १२

प्रवर्त्तकं कर्त्तव्यतारूपेष्टकपानेकविशेषणस्यस्वगतस्मृतिसंधानं सहकारि तेनातिप्रसंगः । न च सहकारित्वेन

र्थः स्यात् । जाते ॥ केवलोपस्थितौ च न व्यक्तिसमानसंवित्संवेद्यत्वं अथ जातिविशिष्टज्ञानोपस्थिते व्यक्तिज्ञा

नविषयत्वे पि गौरवात् व्यक्तिरन्यलभ्यत्वाच्च जातिविशिष्टज्ञानत्वं न शक्यतावच्छेदकं किंतु जातिज्ञानत्वं ला

घवादिति मतं । तर्हि तुल्यं । न च युगपदुपस्थितौ लाघवात् तयोर्न चात्र युगपदुपस्थितिरिति वाच्यं । विशिष्टज्ञा

नस्य विशेष्यविषयत्वनियमात् । किंच ममेदं कार्यमिति ज्ञानं साक्षादुपपादकं प्रवृत्तौ स्वकारणत्वेनानुमित

मतस्तत्र शक्तिं गृह्णाति पा साक्षादुपपादकविषयत्वात् कल्पना पाः । न त्विदं कार्यमिति ज्ञाने । तस्य साक्षादुप

पादकोपपादकत्वात् । अथेदं कार्यमिति ज्ञानं शक्तेयेवकार्यवाचकपदसमभिव्याहारे लौकिकार्यान्वितज्ञानस

भवात् अन्यलभ्यत्वेन न तत्र शक्तिकल्पनमिति तुल्यं । न चेदं कार्यमिति ज्ञानं साक्षादेव कार्यानुत्पादेसा

ज्ञातसाधनत्वं निवर्त्ततइति चेत् न । लाघवेन ममेदं कार्यमिति ज्ञानादेव प्रवृत्तेः । यथाच भविष्यद्विषया कार्य

तानुमितिस्तथोक्तमधस्तात् । अपि च । मादृशस्य पुरुषस्याविगीतकृतिसाध्यमिदं तादृशोहमिति धीर्न प्रवृत्ति

हेतुः । कृतक्रियमाणविषयककृतिसाध्यताज्ञानस्य सिद्धविषयस्यासिद्धविषयेच्छानुत्पादकत्वात् । इच्छायाः एम॰

स्वप्रकारकधीसाध्यत्वेन कृत्यासाधयामीतीच्छायाः स्वकृत्यनतरभविष्यत्तारूपकृतिसाध्यताधीजन्यत्वाच्च । १२

अपि चास्य प्रथमं कार्यान्वितज्ञाने वाक्यस्य सात्पर्यकारणताबोधात् तत्र शक्तिग्रहस्तथाप्यावापोद्वारेण पद
विशेषस्येतरान्वितस्वार्थज्ञाने शक्तिं कल्पयति। लाघवात्। न तु कार्यत्वांशेपि गौरवात्। अन्यलभ्यत्वाच्च।
न चैवं प्रथमप्रवृत्तसात्पर्यकारणताबोधस्य तन्मूलककार्यान्वितशक्तिग्रहस्य च बाधः स्यादिति वाच्यं। दृष्ट
त्वात्। अन्यथासिद्धिमपश्यतो बालस्य समुत्पन्नस्येति तस्याबलवत्वाच्च। गौरवान्यलभ्यत्वतर्कसहकृतप्रमाण
जन्यत्वेनोत्तरस्य बलवत्वात्। न चोपजीव्यबाधान्नतथात्वमिति वाच्यं। उपजीव्यत्वे मानाभावात्। देवादि
प्रथमं तद्वृत्तं। न तु पदविशेषशक्तिग्रहे तस्य हेतुत्वं। तेन विनापि तत्संभवात्। न च प्राथमिकत्वेन बलवत्वं। व्य
भिचारात्। नापि सर्वैः प्रथमं प्रतीयमानत्वेन बलवत्वं। सर्वैर्गौरशरीरेहंप्रत्यये च वटतारकापरिमाणस्य सर्वैः स्वल्प
त्वग्रहे च व्यभिचारात्। अत एव पूर्वकल्पनातः कल्पनीत्तरप्रसंगादिति निरस्तं। यत्रानन्यथासिद्धत्वोपजी
व्यतया बलवत्वं पूर्वकल्पनायाः तत्र तथात्वात्। किंच प्रथमं कार्यान्वितज्ञाने वाक्यस्य तात्पर्यं परोदासी
नं कारणत्वमात्रं गृह्यते न तु विशेषोपि। उपायस्यान्वयव्यतिरेकादेरुभयविशेषसाधारणत्वेन तत्संशापि
कत्वात्। उत्सर्गोपि बाधकाभावनिश्चय[illegible]सहकृतो निश्चायकः। न चान्यलभ्यत्वस्य बाधकस्याभावमा

श·प्र·
७२
73

पाततः स्ततोऽदर्शनमात्रेणबालोनिश्चेतुमर्हति· अत एवप्रामाण्यस्यौत्सर्गिकत्वेपिबाधकाभावनिश्चयादे
वनिश्चयादेवनिश्चयः· अन्यथाप्रमाऽप्रमासाधारणज्ञानत्वावच्छिन्नंप्रतिप्रमासाधनंनवेतिसंशयःक्वापिनस्यात्·प
च्छहर्षहेतूनांबहूनांसंभवादित्यादि· तन्न। स्वतोगृहीतहर्षहेतुस्तनपानादेर्बाधावतारेऽपितदन्यस्यहर्ष
हेतोरग्रहादुपस्थितत्वादुपपादकत्वाच्चपुत्रजन्यज्ञानस्यैवहर्षहेतुत्वेनकल्पनात्· अन्यप्रियज्ञानंह
र्षकारणंभविष्यतीतिशंकेयंकथमेवमितिचेत्· नएवंहिकार्यान्वितज्ञानेपिशक्तिर्नगृह्येत· प्रयोज्य
नं ज्ञानहेतुर्वैफल्यात्· अनन्यथासिद्धशक्त्यनुविधानस्यतुल्यत्वात्· अन्यप्रियस्याज्ञानाच्च· ज्ञानेपिवातदातदु
पस्थितिनियमेमानाभावात्संदेहाभावोपपत्तेः लिंगाभासजन्यकाकतालीयसंपन्नसंवादानुमितिवद्धर्षे
णलिंगेनपुत्रजन्यज्ञानानुमानसंभवाच्च· नचाभासजन्यत्वेनानुमितेर्भ्रमत्वेतद्धेतुकशक्तिग्रहोभ्रमः।वि
षयस्यतथाभावेनतत्पोर्यथार्थत्वात्· यथाकश्चित्सूत्रसंचारणविक्षिप्तंदारुपुत्रकंघटमानयेतिब्रूते सचत
मानयतितदाचेत्तन्नव्यवहारादिवत्तद्दर्शीबालोव्युत्पद्यते· इयंक्रियाकृतिजन्यासाक्षाज्ज्ञानजन्यात्तत्ज्ञानंतद्वा राम०
कच्चजन्यमित्यनुमितिर्यथार्थाभ्रमत्वेपितद्धेतुकशक्तिग्रहः तज्जन्यशाब्दबोधश्चयथार्थएव।विषय ७२

स्यतथाभावादिति सिद्धं सिद्धार्थे शक्तिग्रह इति ॥ अत एव यन्न दुःखेन संभिन्नं न च ग्रस्तमनंतरं अभि
लाषोपनीतं च तत्सुखं स्वःपदास्पदमित्यर्थवादोपस्थिते वेदादेव स्वर्गपदस्य शक्तिग्रहः ॥ ननु चंदनादौ
सुखोपभोगे स्वर्गपदप्रयोगाद्वैयतादृशापां चाप्रयोगात् सुखमेव शक्यं बहुवित्तव्ययायाससाध्येषु तत्त
त्कर्मणि सुखमात्रार्थी न प्रवर्त्तते इत्यर्थवादोपस्थिते स्वर्गपदतात्पर्ये न चार्थवादस्योपजीव्यत्वात्तदुपनी
ते तत एव शक्तिग्रहः । तस्य स्वर्गपदतात्पर्यविषयत्वेनास्पदत्वोपपत्तेर्न वाच्यत्वाभिधायकत्वं गौरवात्
सुखमात्रे चाप्रयोगादिति शपितसुखं वाच्यं प्रयोगोपाधिर्वाऽतिशयः न चातिशयस्यसावच्छिन्नत्वेन चं
दनसुखेऽस्मादयं स्वर्ग इति धीः स्यात् रसादाविवातिशयस्य जातित्वेनावच्छिन्नरूपत्वात् अतिशय
पदप्रयोगस्तु इतरत्वान्नापेक्ष्य ~~तेऽभिधायकत्वं गौरवात् सुखमात्रे चाप्रयोगादिति शपितसुखं वाच्यं प्रयोगोपाधिर्वा~~
~~ऽतिशयः न चातिशयस्यसावच्छिन्नत्वेन चंदनसुखेऽस्मादयं स्वर्ग इति धीः स्यात् रसादाविवातिशयस्य जातित्वेनावच्छिन्नरूप~~
~~त्वात् अतिशयपदप्रयोगस्तु इतरत्वान्नापेक्ष्य~~ इति न । विचित्रहेतुसाध्यतया विलक्षणातिशयस्यानेकत्वेनाननुगमा
त् सुखत्वावांतरातिशयत्वेनानुगमेऽनध्यवसायेन शक्तिग्रहादप्रवृत्त्यापत्तेः सुखत्वावांतरजातिश्च सुखमात्रसाधार

णत्वात्· प्रयोगोपाये निर्णकार्यत्वात्। लोके च लक्षणाः· ननु दुःखासंभिन्नस्य सुखस्य शक्यत्वे चंदनादौ स्वर्गपदप्रयोगो ल
क्षणयापि न स्यात्· सातिशयस्य सुखस्य शक्यत्वे तत्संबंधितया चंदनादौ लक्षणा भवति· तस्मात् दुःखासंभिन्नत्वादिनोपल
क्षितासु सुखत्वावांतरजातिरेव शक्या लाघवादिति चेत् न· एकजातीयहेतुसाध्ये एकजातिसत्वेपि विलक्षणहेतुसाध्ये
कजातौ मानाभावात्· विहितकर्मजन्यतावच्छेदकत्वेनैव· अननुगतस्यापि जन्यतावच्छेदकत्वात्· एवं च मात्रं च ल
क्षणाबीजमिति वक्ष्यते· एवं देवतायामपीन्द्रमुपास्ते इत्यादौ लोकप्रयोगस्यानियमात् गौणत्वेनैव व्यवहारः तच्चार्थानव्यव
सायेऽलौकिके सहस्राक्षवज्रहस्तादाविन्द्रादिपदशक्तिग्रहः। प्रमाणं चेंद्रः सहस्राक्षो वज्रहस्त इत्यादिविधिविषयमभिव्याहृतोऽर्थवाद एव·
स्वर्गपदवत्· अथ स्वर्गपदे प्रवृत्त्यन्यथानुपपत्त्या तत्सुखेतरः पदास्पदमिति श्रुतेश्चार्थवादादेव शक्तिग्रहः। न चेंद्रे तथा
र्थवादः। किं त्विंद्रः सहस्राक्षवज्रहस्तादेस्तावकत्वेन प्रवृत्तिपरत्वमिति चेत् न· इंद्रः सहस्राक्ष इत्यादि प्रसिद्धपदसामाना
धिकरण्यश्रुतितो बाधकं विना सहस्राक्षस्यैवेंद्रादिपदवाच्यत्वावधारणात्· प्रसिद्धपदसमन्वयबलेन प्रतीयमा
नमर्थमबाधितमादायैव तेषां प्रवृत्तिपरत्वात्। मंत्रप्रकाशितशाखिशाखाखण्डापेतमुद्दिश्य हविस्त्यागेन तत्रैव याज्ञि
कानां देवताव्यवहारात्· अपि च· शिवायगां दद्यादित्यादिना देवतासंप्रदानत्वश्रुतेः। शिवादिसहस्रनाम्नां पर्यायत्वेन श्रु एम०
तेर्महाजनपरिग्रहेण प्रमाणत्वादाराधितदेवताया वरदातृत्वश्रुतेश्च बाधकं विना चेतनैव देवता· अथ देवता चेतनत्वपक्षे ६४

प्रीतिरेव यागव्यापार इति नाएवं वै सिध्येदिति चेत् न। प्रीतेः सुखस्य तदनुकूलस्य वा आशुतरविनाशित्वात्। तज्जन्यसं
स्कारस्य स्वाविषये फलाजनकत्वात्। फलहेतुस्थापिकृतिव्यापारेपि तस्यां लाघवेन कृतिसमानाश्रयस्यैव व्यापारत्वक
ल्पनाच्च। नानायागेष्वेकदाह्वानेनैकदा सन्निधानं तद्बुद्धिविशेषस्य वा प्रतिष्ठाविधिना प्रतिमादावर्हकारादिवत्। अ
पराजसूयादि फलत्वेन श्रुतेरिंद्र श्रेतन एव। देवतात्वं तु तस्य नास्ति मानाभावात्। किंतु देशनादेशितचतुर्थ्यंतपदनि
र्देश्यत्वं देवतात्वमिति इन्द्राय स्वाहेत्यादिपदमेव देवता। अत एवाग्निप्रकाशकमंत्रेऽग्निप्रकाशनानंतरमग्नय इति नियमतो
हविस्त्यागो न पर्यायांतरेण। न चैवं ह्युद्देशेन हविस्त्याग इंद्रनिष्ठकिंचिज्जनकः तत्स्वरूपाजनकत्वे सति तदुद्देशेन क्रियमा ता
णत्वात्। ब्राह्मणाय दानवदिति वाच्यं। अप्रयोजकत्वात्। तदर्थत्वेन क्रियमाणत्वस्योपाधित्वाच्च इंद्राय स्वाहेत्यत्र च
नतादर्थ्ये चतुर्थी। किंतु स्वाहादियोगाद् उपपदविभक्तिरेव। अन्यथा नमः स्वस्तिस्वाहेत्यादिसूत्रं वैयर्थ्यादिति। गमैवं
चतुर्थ्यंतपदस्य देवतात्वे मानाभावात्। चतुर्थीं विनापीन्द्रो देवतेति व्यवहारात्। आग्नेयैकपवाहनायेत्यादौ देवताद्धितप्र
संगात्। इंद्रः सहस्राक्ष इत्यर्थवादस्येंद्रमुपासीतेति विधिसमभिव्याहारे लौकवाक्यवत्पातस्येवोपास्यत्वात्। शिवस्वना
ददीतेत्यत्र महादेवमुद्दिश्यन्यक्तेपि पिशिष्टानां शिवस्वत्वेन व्यवहाराच्च। अग्नये इति पदेन नियमतस्त्यागः श्रुतिबो
धितत्वेनातथात्यागस्य फलहेतुत्वात्। न च बीजान्तराणां देवतात्वं तत्रैव शिवादिपदशक्तिग्रह इति वाच्यं। बीजान्तराणां

७५

श॰म॰

75

चतुर्थ्यन्तत्वान्निषधात् । तदुक्तं तावति मंत्रप्रकाशितत्वशक्तिग्रहोपस्माद्युपेतमुद्दिश्य

हविस्त्यागभागित्वेनानुद्देश्यत्वात् । शिवस्य प्रतिमंत्रबीजादीनां नानात्वादननुगमेन शिवपदशक्तिग्रहस्याशक्यत्वा
च्च । न च मूर्तिभेदेन शिवशरीराणामननुगतत्वेन तद्वाचिन शक्तिग्रह इति वाच्यं । बाल्यादिनाभिन्नशरीरेषु चैत्र
त्ववच्छिवत्वजातिरदृष्टविशेषोपगृहीतत्वस्यैवानुगतत्वात् । अदृष्टशरीरान्यस्य चेश्वरस्य न देवतात्वं । ईशानश्च
तद्भिन्न एव । तस्मान्मंत्रकारणकहविस्त्यागभागित्वेनोद्देश्यत्वं देवतात्वं । अन्ये यो हविः संबंधे मंत्रस्याहेतुत्वा
दिति । क्वचिच्च वाक्यशेषाच्छक्तिग्रहः । यथा यवमयश्चरुर्भवति वाराही चोपानहौ वैतसे कटे प्राजापत्यं चिनो
तीत्यत्र यववराहवेतसशब्दाः किं कंगुवायसजंबूनां वाचकाः दीर्घशूकसूकरवंजुलानामिति म्लेच्छार्यव्य
वहारदर्शनाद्विप्रतिपत्तौ मुख्यार्थानध्यवसायात् तत्तत्पदवद्वेदे प्रामाण्यानिश्चये व्यवहारात्व्युत्पत्तिः स चावि
शिष्टः । पिकादिपदेषु म्लेच्छव्यवहारात्व्युत्पत्तेश्च । सूकरस्यैव चर्मणा काकस्याप्युपानहोः संभवादिति एवं प
ते । वसंते सर्वसस्यानां जायते पत्रशातनं मोदमानाश्च तिष्ठंति यवाः कणिशशालिनः । वराहं गावोऽनुधावंति ।
अप्सुजो वै वेतस इति वाक्यशेषचरूपवेदविरोधिनी म्लेच्छप्रसिद्धिस्मृतिरिव वेदविरुद्धा हेयेति निरस्ता पाम्लेच्छ
प्रसिद्धो निःप्रतिपक्षार्यव्यवहाराच्छक्तिग्रहः । ननु वाक्यशेषात् शूकरादिषु तात्पर्यनिश्चयो न शक्तिनिर्णयः । एम०
काकादिसदृशतपास्सूकरादौ प्रयोगस्यागौण्यादिनापि संभवादिति चेत् न । सूकरादौ तात्पर्यवत् शक्तेरपि नि ७५

स्यात्। तथा हि। यद्यप्यनादिप्रयोगयोगितानशक्तिनियता। वैदिकगोशब्दादिना व्यभिचारात् तथापि शक्तिरनादि
प्रयोगनियता। अतो वरं हशब्दस्यानादिप्रयोगयोगिताशक्तिश्च काके कल्प्यत इति गोशब्दवाशब्दकरत्वेनादिवेदसंब
धात्प्रयोगात् अनादिसिद्ध एव शक्तिमात्रं कल्प्यत इति लाघवं इत्यनादितात्पर्यात् शब्दकरे शक्तिरेव। अथ काकवच्छू
करोऽप्यसदृश एवासुसदृशशब्दगवयादेः सत्वात्। कथंचित्सादृश्यं काकस्याप्यस्तीति चेत् न। काकशब्दकरयोर्वरं हश
ब्दात् बुद्धिस्थत्वेऽनयोः को वाच्य इति जिज्ञासानुरोधात् परस्परान्यापेक्षया गोसादृश्यमुद्धृतं जिज्ञासमानस्य
ति विषय इति तन्निरासात्। अन्यथा तात्पर्यग्राहकवाक्यशेषस्यापि निःप्रयोजनत्वं स्यात् कथंचित्सादृश्यस्य सर्वत्र स
लभत्वेन तात्पर्यानध्यवसायादिति॥ इतरान्विते शक्तिरित्यपि गुरुइद्धिका। वस्तुतोऽन्वयेऽपि न शक्तिः। ननु व्यवहारा
नुमितेतरान्वितज्ञाने पदकारणत्वग्रहात् तत्रैव शक्तिं गृह्णाति। उपस्थितत्वात्। न चान्येतन्नागः हेत्वभावात्। न तु प
दार्थज्ञानमात्रे। व्यवहारान्तस्यानुपस्थितेः। उपायान्तरान्तदुपस्थितस्य तत्र कल्पने मानाभावात्। अत इतरान्वितस्वार्थज्ञा
ने शक्तत्वेन ज्ञातं पदं स्वार्थान्वयानुभावकमिति अन्विताभिधानमिति चेत् न। इतरान्वितपदार्थज्ञानोपस्थितौ पदा
र्थज्ञानं विशेष्यमिति तदुपस्थितौ तस्यापि विषयत्वात्। विशिष्टज्ञानस्य विशेष्यविषयत्वनियमादिति तत्रैव शक्ति
कल्पपतिलाघवात्। न त्वन्वयांशेऽपि गौरवात्। अस्तु वा प्रथममितरान्वितज्ञाने शक्तिग्रहः। अथैतन्नागः। अन्य

६६

श॰ सू॰

76

लभ्यत्वप्रतिसंधानात्॰ अनन्यलभ्यस्यैव शब्दार्थत्वात्॰ प्रथमग्रहे तत्वमात्रं च नचत्वमित्युक्तमेव॰ तस्मात्सर्वैः प्रथमं व्यव
हारादुपस्थिते कार्यान्वितज्ञाने इतरान्वितज्ञाने वा पदकारणत्वग्रहात्तत्रैव शक्तिग्रहे ऽग्रे गौरवान्यलभ्यत्वतर्कं प्रतिसं
धानेपि न त्यागः॰ एवं कल्पनाविपरीतत्वादित्यपि स्वशिष्यव्यामोहनं॰ अथ कार्यत्वस्येतरपदलभ्यत्वेन तथास्त्वानत्वेव
मन्वये ऽतस्येतरपदाशक्यत्वात्॰ शक्यत्वे वा ऽविवादादिति चेत् न॰ घटशक्तत्वेन ज्ञातपदं स्वार्थस्मरणद्वारा ऽकांक्षादि
सहकारिवशात् समभिव्याहृतपदार्थेन सह स्वार्थस्यान्वयमनुभावयति स्वभावादित्यन्यथैवान्वयज्ञानलाभात्॰ किंच श
क्तयाऽन्वयमात्रशक्तावप्यन्वयविशेषज्ञानार्थमाकांक्षादेरवश्यमपेक्षणात्॰ क्रियाकारकपदयोः प्रत्येकमितरान्वित
स्वार्थबोधकत्वे वाक्यार्थद्वयधीप्रसंगाच्च॰ नचैकमेवान्विताभिधायकं॰ इतरत्तु प्रतियोगिस्मारकं इति वाच्यं॰ अविशे
षात्॰ अशक्यानुभवे ऽतिप्रसंगादन्वयेपि शक्तिरिति चेत् न॰ अशक्यमपि हि शक्यान्वयं बोधयति नान्यः शक्या-
न्वयत्वस्य स्वरूपसतो नियामकत्वात्॰ अन्यथा तवाप्यप्रतीकारात्॰ नन्वेवं पदानामन्वितज्ञानजनकत्वात् तत्र शक्ति
रस्त्वेव॰ अशक्तस्याजनकत्वात्॰ तवापि पदादन्वयबोध ईश्वरेच्छासत्वादिति चेत्॰ सत्यं॰ किंत्वन्वयबोधे स्वरूपसती
सा व्याप्रियते॰ न तु ज्ञाता घटज्ञानशक्तत्वेन ज्ञातादेव घटान्वयबोधोपपत्तेः॰ यथा तव जातिशक्तस्य पदस्यात्तव्यक्तिज्ञा एम॰
ने॰ दंडं च ज्ञातकारणं सामान्यसंबद्धतया ज्ञातस्यापि विशेषबुद्ध्युपायत्वं॰ यथा वह्निसामान्यव्याप्ततया गृहीतधूमस्य व- ६६

द्धिविशेषबुद्धिजनकत्वं· अथघटज्ञानत्वमितराऽन्वितघटज्ञानेप्यस्तीतितेनरूपेणान्वितघटज्ञानेपिज्ञाताशक्तिर्गृ
ह्यतइतिचेत्सत्यं· किंतुघटज्ञानत्वंशक्यतावच्छेदकं· नत्वन्वितघटज्ञानत्वंगौरवादन्यलभ्यत्वाच्च। एवंचजाति
वाचकपदस्यव्यक्ताविवेकैवशक्तिरन्वयांशेस्वरूपसतीपदार्थांशेज्ञातायाग्रियते।जातिव्यक्त्योःसमानसंवित्सं
वेद्यत्वात्तथा।घटज्ञानंतुनान्वयविषयतानियतंस्मरणेव्यभिचारादितिचेत्।घटानुभवविशेषंप्रतिघटपद
त्वेनकारणता· सचघटस्मृत्यनुभवोविषयतानियतएव· केवलस्यशब्देनाननुभवात्· स्मरणंचप्रतिपदत्वेनजन
कता· व्यभिचारात्। किंतुसंबंधितयाज्ञातत्वेन॥ ॥स्यादेतत्· अन्वयतात्पर्यकतयातत्प्रतिपादकंपदमित्यविवा
दम्· तात्पर्यनिर्वाहिकाहिवृत्तिः।साचेहनगौणीनवालक्षणेतिशक्तिः· अथान्वयेलक्षणैव· स्वार्थसंबंधिनिताय
र्यात्· पदार्थोपस्थित्यनंतरंतदन्वयोपपत्तेश्च· नचवृत्तिद्वयविरोधः अन्वयविशेषणतयापदार्थोपस्थितेः नचलाक्ष
णिकानामननुभावकत्वादन्वयानुभवःकथमितिवाच्यं· पदार्थस्यस्मरणादन्वयेऽशक्तत्वाच्चपदानांशक्त्याऽननु
भवकतथासर्वत्रलाक्षणिकस्यैवानुभावकत्वादिति· तन्न· वृत्तिर्हिज्ञातोपयुज्यतेनस्वरूपसती।अतिप्रसंगात्· न
चेहस्वार्थसंबंधितयाऽन्वयःप्रागवगतः।वाक्यार्थस्यापूर्वत्वात्· किंचशक्यसंबंधितयाऽन्वयेलक्षणार्थंपदार्थेश
क्तिकल्पनं।तद्वरंलाघवादन्वयेशक्तिरस्तु· किंवृत्तिद्वयकल्पनया· एवंस्थितेप्रयोगोपि· अन्वयःपदशक्यःवृत्तं

७१

श॰मू॰

77

तरं विनापदप्रतिपाद्यत्वात्तत्पदार्थवदिति ॥ ॥ उच्यते ऽवृत्तिं विनापि तात्पर्यनिर्वाहात् किं वृत्त्या पदानामुक्तक्रमेणा
न्वयबोधजनकत्वसंभवात् अन्यथा शक्त्या तात्पर्यनिर्वाहे दृष्ट इति लक्षणोच्छेदः । अथ शक्तिं विनापि शक्यसंबं
धात्तन्निर्वाह इति न तत्र शक्तिः तर्हि वृत्तिं विनापि तन्निर्वाह इति किं वृत्त्या अत एवानुमानमप्रयोजकं । अन्यथापद
प्रतिपाद्यत्वादेव शक्तिसाधने वृत्त्यंतरोच्छेदः अत एव धूमोस्तीत्यत्र धूमपदस्य वह्निबोधपरत्वेपि वह्नौ न लक्षणा
शक्त्या धूमोपस्थितावनुमानद्वारा तत्प्रतीतिसंभवात् तथा गच्छ गच्छसि चेत् कांत पंथानः संतु ते शिवाः ममापि ज
न्म तत्रैव भूयाद्यत्र गतो भवानिति वाक्यस्य मा गच्छेत्यत्र तात्पर्येपि न लक्षणा गमनस्य स्वप्रियामरणहेतुत्वं हि
वाक्यार्थः ततो गमनं मया न कर्त्तव्यं प्रियामरणहेतुत्वादित्यनुमानादेव गमने ऽकर्त्तव्यताबोधने तात्पर्यनिर्वाहात्
यत्र हि मुख्यया सा तात्पर्यं परियावान तात्पर्यनिर्वाहस्तत्र लक्षणा ॥ ननु घटमानयेत्यत्र प्रत्येकमन्वयविशेषे जिज्ञा
सा भवति नच सामान्यानवगमे विशेषे सा स्यादित्यन्वयसामान्ये शक्तिरिति चेत् न कारकेण क्रियया च क्रियाकारकसामा
न्याक्षेपात्तदुपपत्तेः दृष्टे जंबीरफलादौ रसविशेषजिज्ञासावत् एतेन यदुक्तमन्वितपदार्थे ममैकैव शक्तिः तव त्वेका पदा
र्थे अपरान्वय इति निरस्तं अन्वये शक्त्यभावात् नचैवमन्वयानुभवे पदविनियोगो न स्यादिति वाच्यं अन्वयानुभवा णम॰
र्थमेव पदार्थे पदानां शक्तिकल्पनात् तस्मात्पदं करणं पदार्थस्मरणं व्यापारः आकांक्षादिसहकारिवशात्स्मारितार्थाप

७१

न्वयानुभवः फलं पदार्थस्मरणं च न व्यवधायकं। व्यापारत्वात्। न च स्मरणद्वारा पदार्थ एव करणं तस्यानागतत्वादिना स्व
स्मरणोऽन्वयानुभवे व्याऽजनकत्वात्। तथापि पदार्थस्मरणमेव करणमस्तु। आवश्यकत्वात्। अत एवञ्चिंतावशोपर
स्थितपदार्थानामन्वयबोधात् काव्यादिष्विति चेत्। न। स्मरणस्य निर्व्यापारत्वेनाकरणत्वात्। अनन्यथासिद्धान्वय
व्यतिरेकाभ्यामाकांक्षादिमत्पदस्यान्वयानुभवविशेषे करणत्वात्। पदार्थस्योपस्थितेः संसर्गधीमात्रहेतुत्वेऽपि शाब्द
संसर्गधीविशेषे पदस्यैव हेतुत्वात्। गौः कर्मत्वमानयनमित्यत्र पदार्थज्ञानेऽप्यन्वयज्ञानानुदयात्। पदविशेषोप
स्थितपदार्थज्ञानस्य हेतुत्वे पदविशेषस्यैवावश्यकत्वेन हेतुत्वाच्च। काव्यस्थले च पदार्थज्ञानव्यापारकमुत्प्रेक्षादिस
हकृतमन एवान्वयानुभवे करणं। न चैवमुत्प्रेक्षायाः पृथक्प्रमाणत्वम्। व्यभिचारिज्ञातोपनतपालिंगादाविव प्रमा
णतावच्छेदकानतिप्रसक्तानुगतरूपाभावात्। निर्व्यापारत्वाच्च। किंतु प्रमाणसहकारिणी सा। अत एव मानसे लिंग
परामर्शव्याप्तिस्मृत्यादिन पृथक्प्रमाणं। अथ पदमन्तरेणापि योग्यतादिज्ञाने अन्वयबोधो भवति। अतः पदार्थ
स्मरण एव पदानामुपलपः। तदुक्तं पश्यतः श्वेतमारूपं हेषाशब्दं च शृण्वतः। खुरविक्षेपशब्दं च श्वेतोऽश्वो धावती
ति धीरिति चेत्सत्यं। प्रयोजकवाक्यश्रवणानन्तरं प्रयोज्यव्यापारदर्शनादन्वितज्ञानोपपत्त्यर्थं पदस्यैव शक्तिः क
ल्प्यते प्रथमतस्तस्यैव कारणत्वावधारणात् पदार्थेषु शक्त्यन्तरकल्पने गौरवात्। तदाहुः प्राथम्यादभिधातृत्वात्ता

७८

योपगमाद्दर्थिः पदानामेवसाशक्तिर्वनमभ्युपगम्यतामिति श्वेतोश्वोधावतीतिधीश्वलिंगत्ता पदस्यकॢप्तकारणभावस्यामा
वादिति ॥ ॥एवंपदार्थमात्रेशक्तौपदार्थोनिरूप्यते ॥ ॥तत्रप्राभाकराः।यद्यप्यानयनादिव्यवहाराद्व्यक्तावेवशक्ति
ग्रहऽचिततथाप्यानंत्यव्यभिचाराभ्यांतत्रशक्तिग्रहः।समुच्चयेनशक्यत्वेगांदद्यादित्यादौसर्वोपादानासामर्थ्यमेक
स्यशक्यत्वेऽनध्यवसायः नचगोव्यक्तिमात्रमर्थः मात्रे स्यसर्वत्वेदुक्तदोषात् सामान्यार्थत्वेव्यक्तेरप्रतीतेः नाना
र्थत्वेचसर्वासांप्रत्येकंज्ञातुमशक्यत्वेशक्तौचशक्येचगौरवम् अप्रवेगाविव्यवहाराभावश्च नापिगोत्वेनोपलक्षिता
व्यक्तिःशक्याधेनुपदवत्।अतोनशक्यानंत्यंनव्यभिचारोनसर्वा ग्रहोनवानानार्थत्वंगोत्वेनतासामेक्यादिति
वाच्यं रूपांतरेणज्ञातमन्येनरूपेणोपलभ्यते यथाकाकेनगृहविशेषोगोत्वेनधानकर्मव्यक्तिविशेषः स्वतो
विलक्षणः।नतुकाकाद्याकारेणैव नचव्यक्तीनांजातिंविनारूपांतरमेकमस्तिज्ञाप्यतेवा गोपदाद्गौरित्येवप्रती
तेः गोत्वविशिष्टेचकार्यान्वयाद्गोत्वविशेषणेनोपलक्षणं तदन्येनकार्यान्वयेऽपलक्षणं।यथायंवासस्वीदेवदत्त
पदवाच्यइत्यत्रवासः नचगोत्वैकत्वेनव्यक्तीनामेकत्वंक्रियते।अशक्यत्वात् नापिज्ञाप्यते।असत्वात् नचतदेकत्वमे
वव्यक्तेरेकत्वं असंभवात् नापिव्यक्तिःशक्या।गोत्वमवच्छेदकं कारणत्वेदंडत्ववत् एवंहिगोपदाज्जगोत्वविशिष्टबु
द्धिःस्यात् शक्तिग्रहाहितसंस्कारसचिवाद्गोपदादेवधेनुपदादिवगोत्वविशिष्टज्ञानं तद्बुद्धौपश्चात्तद्देवपदंपरासं

७८

बंधादिति चेन्न· तत्र हि धानकर्मविशेषस्यावश्यकत्वेऽनुगमाय गोत्वमवच्छेदकमात्रं· न तु वैपरीत्यं· गोत्वस्य स्वरूपभेदेपि स
त्वात्· इह तु व्यक्तिरतिप्रसक्तेति जातिविशिष्टैव सा शक्या स्यात्· वस्तुतस्तु जाते· शक्योपलक्षणत्वे शक्यावच्छेदकत्वेवा
वश्यकत्वाल्लाघवाच्च जातिरेव शक्या न व्यक्तिः· येनुपदे तु गोत्वं न तथाऽतिप्रसंगात्· अस्तु तर्हि जातिविशिष्टे शक्यं· स्व
व्यवहारेण स्वहेतुतया जातिविशिष्टस्यानस्यानुमितत्वादिति चेन्न· विशिष्यभेदाद्विशिष्टानामनन्तत्वेन व्यक्तिवाच्य
त्वे उक्तदोषग्रासात्· विशेषणस्यैक्येन विशिष्टानामैक्यस्योपलक्षणपक्षवद्दूष्यत्वात्· तस्माद्व्यक्तेरपदार्थत्वे जातिरेव
पदार्थः· वस्तुतस्तु· व्यक्तौ जातिरनुगमिका विशेषिका वाऽवश्यं वाच्येति नागृहीतविशेषणन्यायेन सैव वाच्या· अथ
जातावपि व्यक्तिरेव विशेषोपधर्मान्तराभावात्· गचेतरावृत्तित्वे सति सकलगोवृत्तित्वाद्युपाधेरपि व्यक्तिघटितत्वात्· ना
गृहीतविशेषणन्यायो व्यक्तावपीत्युभयमपि वाच्यमिति चेन्न· जातेः स्वत एव व्यावृत्तत्वात्· अन्यथा जातिव्यक्त्योर्व्या
वृत्तान्योन्यज्ञानादन्योन्यव्यावृत्तबुद्धावन्योन्याश्रयः· स्वतो व्यावृत्तत्वं च न स्वयमेव व्यावर्तकत्वं· स्वस्मिन् स्वावृत्तेः· नापि व्या
वर्तकं विनैव व्यावृत्तत्वमसंभवात्· किंतु स्वाश्रयवत्स्वात्मनि व्यावृत्तधीजनकस्वभावत्वं परे सामान्यविशेषवत्· व्यावर्तकध
र्मेपि धर्मान्तरादेव व्यावृत्तबुद्धावनवस्था स्यात्· अत एव किंचिद्वस्तु स्वत एव विलक्षणमित्याहुः· अस्तु वाव्यक्त्या व्यावृत्तत
या बोधिता जातिरेव पदार्थो लाघवात्· ननु तद्द्वैपरीत्यमुभयं वा गौरवात्· कुतस्तर्हि व्यक्तिधीः· जातिशक्तादेवाकथम

६

७८

श॰म्र॰ न्यशक्तादन्यधीः। स्वभावात्। तत्स्वभावत्वमेव व्यक्तिशक्तिं विना न निर्वहतीति चेत्। न। गोपदं हि नियमतो जातिव्यक्ती बोधयति। त
त्रास्य जातिशक्तिधीरेव सहकारिणी कल्प्यते। लाघवादावश्यकत्वाच्च। न तु व्यक्तिशक्तिधीरपि गौरवात्। मम जातिशक्तिज्ञा
79 ने सति तां विना व्यक्तिबोधे विलम्बाभावात्। यथा तव पदार्थशक्तादेवान्वयधीः। यद्वा जातिशक्तमेव पदं व्यक्तिं बोधयति। अ
शक्यत्वेऽपि जात्याश्रयत्वमेव नियामकं। यथाऽशक्यमपि स्वार्थान्वयं बोधयति। तत्र प्रयोजकत्वेन क्लृप्ता शक्तिरेवास्तु। जात्या
श्रयत्वस्य तथा कल्पने गौरवादिति चेत्। न। अनन्यलभ्यस्य पदार्थत्वात्। अन्यथाऽन्वयोऽपि शक्यः स्यात्। लक्षणाच्छेदश्च।
अथवा। जातिशक्तिज्ञानाज्जातिधीर्भवन्ती व्यक्तिमपि बोधयति। व्यक्तिं विना जातेरज्ञानात्। यो येन विना न भासते तद्धीहेतुस्त ना
मपि बोधयति। यथा ज्ञानधीहेतुस्तद्विषयं यथा वा तद्वाधिकरणसिद्धान्ते ज्ञानादिनित्यत्वं। अन्यथा पदं जातिमपि न बोध
येत्। केवलाया अप्रतीतेः। तथा च जातिशक्तिकल्पनावैयर्थ्यं। तस्माज्जातिज्ञानार्थं क्लृप्ता शक्तिर्व्यक्तिमपि बोधयति। एकवि
त्तिवेद्यत्वनियमात्। एते नैकवित्तिवेद्यते व्यक्तिशक्तिं विना न स्यात्। ज्ञापकाभावात्। न हि व्यक्तिज्ञानमहेतुकं जातिहेतु
कं वा। सदातनत्वप्रसंगात्। नापि जातिधीहेतुकं। असंविद्धेद्यापत्तेरिति निरस्तं। जातिशक्तेरेव व्यक्तिज्ञापकत्वात्। ननु जात्य
तिं विनापि प्रत्यक्षादिना व्यक्तिज्ञानादन्यैव व्यक्तिधीसामग्री। जातिविशिष्टज्ञानं चोभयज्ञापकसामग्रीद्वयसमाजादर्थ एम०
अत एव व्यक्तिं विना जातेरस्मरणेन। जातिस्मरणस्य व्यक्तिविषयत्वनियमाज्जातिज्ञापकमात्रमेव व्यक्तिज्ञापकं कल्प्यते। सा

मान्यकल्पनायांबाधकाभावादितिपरास्तम्। जातिंविनापिव्यक्तिस्मारणात्तत्रान्यैवसामग्रीजातिविशिष्टस्मारणेचोभयोःशा
रकस्मारकसमाजादिति॥ ॥अत्रब्रूमः। जातिव्यक्तिप्रत्यक्षादिबोधेतथैव· सामग्रीद्वयस्यतथान्वयव्यतिरेकग्रहात्। शा
ब्देतुव्यक्तिबोधेजातिशक्तिज्ञानमेवहेतुर्लाघवात्। नसामग्र्यंतरं। तत्सत्त्वेतेनविनाविलंबाभावात्। एवंचजातिशक्तत्वे
नज्ञातंपदंजातिविशिष्टस्यस्मारकमनुभावकंचानतुज्ञानेशक्तिःपदार्थानांशक्यत्वात्। तथाचयस्यज्ञानेशक्तिस्तस्यैव
जातिव्यक्तिज्ञानेचशक्तिरितिजातिवद्व्यक्तिरपिशक्येतिचेन्न। नायद्विषयतयाहिज्ञानेज्ञाताशक्तिरुपयुज्यते· तज्ज्ञानेवि
षयतयाशक्यतावच्छेदकंशक्यं। जातिज्ञानंचतथेतिजातिरेवशक्या। नतुव्यक्तिज्ञानत्वमप्यवच्छेदकंगौरवात्। नचश
क्यज्ञानेनियतविषयत्वमेवशक्यत्वेव्यवहारानुमितशक्यानुभवविषयाणामन्वयतसंबंधिमितिमात्राणामपिशक्य
तापत्तेः। एवंचजातिव्यक्तिज्ञानजनकत्वादुभयत्रापिशब्दशक्तिर्जात्यंशेसाज्ञाताव्यक्त्यंशेस्वरूपसतीहेतुर्लाघवादि
तिकुब्जशक्तिवादः। एवंसैवतद्दैवतेनैवज्ञाताऽज्ञाताऽज्ञातांचवाचिकाऽवाचिकेत्यत्रजातिव्यक्त्यवच्छेदकभेदेनाविरो
धः। त्वयाप्यन्वयेकुब्जशक्तिस्वीकारात्। व्यक्तेःशक्यत्वेपिज्ञातशक्तिकशब्दजनितज्ञानविषयत्वलक्षणंवाच्यत्वंनास्ति·
नन्वेयंपरिभाषा· शब्दजन्यज्ञानविषयत्वेनवाच्यत्वेलाक्षणिकादेरपिवाच्यत्वापत्तेः। व्यक्तेःशक्यत्वेपिव्यक्तिशक्ति
ज्ञानंनकारणं। व्यक्तिशक्तिज्ञानत्वंचनावच्छेदकमितिलाघवं· यत्तुतच्छक्तत्वेनज्ञातादेवतदर्थबोधः। शक्तिभ्रमादपित

८०

श॰मू॰ दर्थधीदर्शनात् तथा योग्यताद्यन्वयानुपपत्तौ विना पदादुपस्थितिः शक्तिसाध्येति व्यक्तिरपि वाच्येति तन्न अन्यलभ्ये श
४० क्तेरकल्पनात् अन्यथा तवान्वयेपि शक्तिः लक्षणोच्छेदश्च ॥ ननु जातिरर्थः । व्यवहाराभावेन कल्पते ऽसिद्धेः । कार
कोपरक्तक्रिया हि व्यवहारगोचरः । जातिश्च न क्रिया । नित्यत्वात् । न कारकं कर्त्रादि । क्रियायास्तत्रासमवायात् क्रियाफ
लभागित्वाभावात् कर्तृव्यापारानाश्रयत्वात् अचेतनत्वात् तया सह विभागाभावात् क्रियानाधारत्वाच्चेति चेत् नाव्य
क्तिव्यवहारादेवोक्तन्यायेन जातौ शक्तिग्रहात् जातिसविकल्पकाद्याहृततया ज्ञाततायां व्यक्तौ क्रियान्वयः । सविकल्प
कं चालोचनद्वारा जातिजन्यमिति परंपरया जातेरपि कारकत्वेनान्वयः यद्वा न केवलाया व्यक्तेः कारकत्वं न हि गौर्गच्छती
त्यतो व्यक्तिमात्रं यातीति कस्यचित्प्रतीतिः । किं तु जातिविशिष्टायाः । तथा चोभयमपि कारकं । श्रीकरस्तु केवलजाति
व्यक्त्योरकारकत्वात् क्रियान्वयो व्यक्तेराश्रयतया जातेरवच्छेदकतया आरुण्यादिवत् । एवं च जातिशक्तिपदाज्जा
तेरनुभवः शाब्दः । व्यक्तेरौपादानिकः शाक्यत्वादिति ॥ अन्ये तु जातिशक्तमेव पदं जातिव्यक्त्योः स्मारकमनुभावकं च
ति व्यक्तेरपि शाब्दत्वं न च वृत्तिं विनान्वयानुभवे ऽप्रवेशाद्व्यक्तेर्न शाब्दत्वं वृत्तिं विनाप्येकवित्तिवेद्यत्वनियमेन जा
तिशक्तादेव व्यक्तेरनुभवात् अन्यथा जात्यन्वयोपि न स्यात् । व्यक्तिं विना जातेरननुभवात् । अत एव जातिशक्तिरेव राम॰
व्यक्तिं बोधयतीति गुरवः किं च शक्त्योपस्थापितस्यानुभवं प्रतिपदार्थानां कारणत्वं अतो जातिवदुपस्थापितायां व्यक्तौ ८०

रनुभवः पदात् । न तु तत्र पक्षे तयोपस्थापितस्य अन्वयानुभवं प्रति कारणत्वं गौरवात् । न चैवमशक्यपरत्वेन लक्षणा । यथा
त्यन्यत एव ज्ञानात् शक्तिस्तथा लक्षणापि न । तत्किमशक्येपि मुख्यः प्रयोगः । सत्यं । शक्त्या साक्षात् तदुपस्थित एव
तस्य मुख्यत्वात् । स्वशक्येयतिवाधिकं च तत्तज्जातिशक्त्यादेव व्यक्तिधीसंभवान्न व्यक्तौ शक्तिः । यदि च ततोनन्त
धीस्तदा तत्र शक्तिरेव स्यात् । अन्यथा तद्धीर्न स्यादेव । ननु पदज्जातिभ्यामेको जातिव्यक्त्यनुभवः क्रियते । तत्र जात्यं
शे पदस्याव्यक्त्यंशे जातेरनुभावकत्वात् मयमेवोपादानार्थं इति चेत् । तर्हि जातेः कारणत्वापेक्षया शक्तिज्ञानेनोपु
स्थितव्यक्तेरवच्छेदकत्वमात्रकल्पनेन वलघीयसी जातेः प्रमाणान्तरत्वापातश्च । अत एव व्रीहीनवहन्तीत्यत्र व्यक्ते
र्न लक्षणा । तत्साध्योपस्थितेर्जातिशक्तित एव सिद्धेः । अस्तु वावच्छेदकत्वेनान्वयादिवत् व्रीहित्वादेरवघाता
न्वय इति ॥ ॥ अत्रोच्यते । गोत्वज्ञाने गोज्ञाने वा शक्तपदमित्याकारः शक्तिग्रहः । तथा चैतज्ज्ञाने विषयतया जातेरव शक
च्छेदकत्वं व्यक्तिमादायैव प्रतीयते । न केवलायाः व्यक्तिं विना जातेरप्रतीतेः । तथा च जातेरवच्छेदकत्वे । नागृहीतविशे
षणन्यायेन व्यक्तेरवच्छेदकत्ववत्त्वलेपशेइति शक्तिज्ञानविषयतावच्छेदकत्वाज्जातिवत्तस्यापि शक्यतास्मान्यरिह
रैकवित्तिवेद्यत्वनियमं स्वीकुरु वा व्यक्तेर्वा वाच्यत्वं । अपि च यद्धर्मवत्तया ज्ञात एव यत्र यज्ज्ञानं स तत्रावच्छेदकः । व्यक्ति
ज्ञानं चैतज्ज्ञात एव तत्र ज्ञाने शक्तिधीरिति व्यक्तिधीरपि शक्या । नत्वाद्यकल्पनेऽमितिमात् विषयत्वेन ज्ञात एव ज्ञाने

८१
श॰मू॰
४१

प्रवर्त्तकत्वज्ञानं। नच तमोज्ञानं प्रवर्त्तकं। अतो व्यभिचारः। अन्यथा प्रवर्त्तकत्वेन मितिमात्रज्ञानमिति प्रयोज्यस्यानुमाय
बालस्तत्रापि शक्तिं गृह्णीयात्. एवं तत्रापि कार्यान्वितज्ञान एव शक्तिः स्या। तच्चेन्न ज्ञात एव ज्ञाने शक्तिग्रहादिति
चेत्. मितिमात्रज्ञानत्वं कार्यान्वितज्ञानत्वं च विनापि प्रवर्त्तकज्ञाने घटज्ञानत्वादिकं ज्ञातं तु शक्यमिति न तयोरवच्छे
दकत्वं. किंतु घटज्ञानत्वादिकमेव लाघवात्। तयोरपि तत एव प्राप्तेश्च। किंच पदस्य व्यक्तिज्ञानार्थं शक्यज्ञाने विष
यतया व्यक्तेरवच्छेदकत्वमात्रं कल्पयति लाघवात्। जातिविषयत्ववद्व्यक्तिविषयत्वस्य ज्ञानविनिवेशत्वेनावश्यं शी
घ्रोपस्थितत्वात्। नतु जातिशक्तिं। तद्बोधे कारणांतरं वा तदवच्छेदकं वा गौरवात्। शक्तिग्रहकाले कल्पनीयोपस्थि
तिकत्वाच्च। अन्ये तु प्रथमं व्यवहारानुमितव्यक्तिज्ञाने शक्त्यनुविधानान्यदं शक्तमिवत्यवधारयति। नतु जाति
ज्ञाने. व्यवहारजनकत्वेन तदा तस्यानुपस्थितेः पश्चाद्व्यक्तेर्व्यभिचरत्यर्थमनुगमार्थं च जातिरपि तद्विषयत्वमिति मा
नांतरेण ज्ञात्वा जातिज्ञानेपि तन्यदस्य कारणतां प्रत्येति। तथा च व्यक्तिशक्तिज्ञानमपि कारणं नतु जातिशक्तिज्ञा
नेनान्यथासिद्धिः. व्यक्तिज्ञानकारणतामुपजीव्य जातिज्ञानकारणताग्रहहेतुत्वप्रतीव्यविरोधात्। एतेन जातिरेव
शक्या। लाघवात्। शक्तिग्रहजन्यसंस्कारस्य व्यक्तिविषयत्वनियमेन पदाज्जातिस्मरणमुत्पद्यमानमवश्यं व्यक्ति राम॰
विषयं. संस्कारस्यानियतोद्बोधत्वेपि जात्यंशोद्बोधकादेव व्यक्त्यंशोद्बोधनियमकल्पनात्। यथा पदेनोद्बुद्धसंस्कार

देवनियतत्वाच्छक्तिस्मृतिः। एवं विनापि च सर्वा जातिस्मृतिर्व्यक्तिविषया। अन्यथा केवलजातिस्मरणापत्तेः संस्कारसहि-
तान्यदा देवजातिविशिष्टानुभवोपि। द्वित्यादिच प्रत्यभिज्ञा। अत एव भाष्ये संस्कारशब्दशक्तिभ्यां विशिष्टानुभवस्र-
त्युन्नीतमतमपास्तं। उक्तन्यायैर्जातिवद्व्यक्तेरपि शक्यत्वात्। विशिष्टानामानन्त्येपि एकत्र विशिष्टे तत्त्वं विहाय गोत्व-
मादाय गोत्वविशिष्टं शक्यमिति शक्यः शक्तिग्रहः। यथा कश्चिदेव धूमे धूमो वह्निव्याप्य इति बुद्धिः। यथा वात-
वैव कार्याणामानन्त्येपि क्वचित्कार्ये तत्त्वं तदंशरक्षीकृत्य यत्कृतिमादाय यत्प्रभिन्नकार्यं शक्यमिति लिङ्गादेरेवं श-
क्तिग्रहः। अत्र वक्ष्यदकेक्यापक्षेरेकत्वं तद्देवा यथा वा व्यक्तिवाचकपश्वादिपदानां। अथवा गोत्वेन सामान्यलक्ष-
णया ज्ञाते सर्वत्र गावि गोत्वमादाय शक्तिग्रहः प्रमेयत्वेन सर्वज्ञाने सार्वज्ञ्यमिष्यत एव। नेष्यते तु घटत्वादि सर्वप्र-
कारकज्ञानवत्त्वेन। सर्वैकोदासीनगोः शक्यत्वापत्तिः किंचिदेकोपादाने गोरुपादानान्नोपादानं शक्यत्वमेकोपाद-
नेऽनध्यवसायो वा। अन्यथा तवाप्येकवित्तिवेद्यतया सर्वैकपरत्वउक्तदोषे का गतिः। का वा गतिर्व्यक्तिवाचकपश्वादिप-
दानां। भट्टमते तु जातिरेव शक्या लाघवात्। व्यक्तिस्त्वाक्षेपलभ्या। ननु नाक्षेप एकवित्तिवेद्यत्वात्तयोः। समानानां हि भा-
वः सामान्यं। तद्व्यक्तिं विना न भासत इति चेत्। न स्वरूपेण हि शक्या जातिः न च समानत्वं तस्याः स्वरूपं तद्धर्मत्वात्। अन्य-
थालोचनेपि सा न भासेत। कथं सामान्यत्वेनाप्रतीता जातिर्व्यक्तितो भिन्नतया शब्देनाभिधातव्येति चेत्। नाशब्देन व्यक्तिभि

श्रा·स्र· न्नतयाजातेरबोधनात् । ननु व्यावृत्तजातिर्द्वीव्याव्यावृत्तबुद्धिं विना व्यक्तिविशेषमानात्क्षेपात् । आवर्त्तिकाचतत्रव्यक्तिरेवानु
गतत्वमप्यनुगम्यमानं विना न भासत इति जातिविनिवेद्यैव व्यक्तिरितिचेत् न । स्वतो व्यावृ [redacted]
त्तजातिस्वरूपस्यवाच्यत्वात् । व्यक्तेर्धर्मान्तरस्यवाव्यावर्त्तकत्वेऽन्योन्याश्रयेणानवस्थावा । ननु गौरिति पदाज्जातिव्यक्त्योर्युगप
त्प्रतीतिः । न च सूक्ष्मकालभेदाग्रहात्साम्प्रतम् अबाधकाभावात् । तथा च गोपदाद्गोत्वधीः ततः क्रमेण व्याप्तिलिङ्गपक्षधर्मताज्ञा
नं ततो व्यक्त्यनुमितिरिति ज्ञानपरंपराकल्पनाद्वरं जातिविनिवेद्यत्वं व्यक्तेरितिचेत् न । व्यक्त्यपधीनं हि शब्दस्य बोधकत्वमतो व्यक
त्यनिपर्यालोचनया युगपद्ज्ञानमसिद्धं । अत एव ज्ञानपरंपराकल्पनमपि युक्तं । अन्यथाकर्तुरप्याक्षेपो न स्यात् । शब्दात्सकर्तृका
या एव क्रियाया अवगमात् । न च जातिज्ञानत्वेन व्यक्तिविषयतानियमः । प्रत्यक्षादौ तस्य व्यक्तिधीहेतुसमानाधीनत्वात् । अत ए
व न जातिधीहेतोर्व्यक्तिधीहेतुसहकारिता नियमः । समाजस्यार्थसिद्धत्वात् । गोत्वं गवा विषयप्रतीतिविषयः जातित्वाद्भिन्नभा
वत्वाद्वेति जातिमात्रधीसिद्धेश्च । अथ यथा परतन्त्रं तत्तन्नैकवित्तिवेद्यं यथाऽर्थपरतन्त्रं ज्ञानमर्थेन । जातिश्च व्यक्तिपरतन्त्रेति व्यक्तेः
भासमानायामेव भासत इति चेत् न । परतन्त्रत्वं हि न यावत्समवेतत्वं चंपकादिसूक्ष्मभागंधादिना व्यभिचारात् । न तद्धीनिरूप्यत्वं नन्विह
मसिद्धेः । नापि तस्मिन्भासमान एव भासमानत्वं साध्याविशिष्टत्वात् । नापि विशेषणत्वनियमेन वज्ञानं गौरित्येव प्रतीतेः । गविगोत्व एए·
मितिकश्चिदस्त्येतीतिचेत् न । आलोचने विशेषणत्वं विनापि स्वरूपतः प्रतीतेः । जातिमात्रप्रकारकात्याद्ज्ञातेः स्मरणमालो

चनमेवाजातिविशिष्टगोत्वसंस्कारादेवपदेनजातसंशोद्बोधे सति जातिमात्रस्मरणात् । अत एव ततो जातिं विना कथं दाचिद्व्यक्ति
स्मृतिः । अस्तु वा गुरोरिवालोचनमपि संस्कारजनकं शक्तिग्रहकत्वं निबलेन जातिमात्रस्मरणसिद्धेः । न च स्मरणस्य विशिष्टज्ञानत्व
मेव । अनुभवस्यापि तथात्वे निर्विकल्पकासिद्धिप्रसंगात् । एकवित्तिवेद्यत्वेपि प्रथमदर्शने वक्तृशब्दोत्वस्मरणमालोचनमेवागो
गो त्वैव्यक्तिगोचरत्वित्वादिवैशिष्ट्यस्याशक्यत्वेन तदविषयत्वात् । न चालोचनस्येन्द्रियजन्यत्वात् न स्मृतित्वं । ज्ञानत्वसाक्षाद्व्याप्य
धर्मत्वेनस्मृतित्वस्यालोचनवृत्तित्वात् । न त्वाक्षेपाद्व्यक्तिधीर्नव्यक्तित्वेन न वा रूपांतरेण व्यक्तेर्गौरित्येव प्रतीतेः । नापि गोत्वे
न । गोत्वस्य गोत्वविशिष्टाभेदेनाक्षेपाभावादिति । न ॥ विशेषणविशेष्ययोर्भेदे नानुमानाविरोधात् । अत एव गोत्वं व्यक्त्याश्रि
तं जातित्वादिति पक्षधर्मताबलाद्गोत्वाश्रयव्यक्तिसिद्धिः अर्थापत्तेर्वा तत्सिद्धिः । ननु व्यक्त्या विना किमनुपपन्नं व्यक्तिं विना
पि गोत्वस्य तद्बुद्धेश्च सिद्धेः कथमर्थापत्तिरिति चेत् न । व्यापकं विना व्याप्यस्यासिद्धेः ॥ ॥ उच्यते । गामानयेत्यतो गोत्वविशिष्टस्य
क्रियान्वयबोधात् गौरित्याकारगोविशेष्यकाबुद्धिः कारणं । सा च न शक्तिं विना । आक्षेपाद्व्यक्त्याश्रितं गोत्वमिति धीर्न तु गौरिति ।
न चैवं व्यक्तेः क्रियान्वयः गोत्वाचित्ततया निराकांक्षत्वात् । राजपुरुषमानयेत्यत्रेव राज्ञः । अन्वये वा व्यक्तिमानयेति धीः स्यात्
न तु गामिति । किंच गोत्वं न व्यक्तिव्याप्यं न हि यत्र यदा वा गोत्वं तत्र तदा वा पदस्थलेस्ता व्यक्तिरिति वा नियमः व्यभिचारात् । नापि गो
त त्वं गवाश्रितं गोत्वादित्यनुमितिः । व्याप्तिग्रहस्य गौरत्वात् । न च जातित्वं व्यक्त्याश्रितत्वे लिंगं । जातित्वस्य पदादनुपस्थितेः तथा

त्वेवाजातिविशिष्टैव व्यक्तिः॥ अपि च लिंगमनुपपन्नं च स्वाश्रये व्यापकमुपपादकं च बोधयति। न चेह गोत्वाश्रये व्यक्तिबुद्धि
॥ ॥ वयं तु ब्रूमः व्यक्तेः पदार्थत्वे विभक्त्यर्थसंख्याकर्मत्वादेर्व्यक्तावनन्वयः स्यात्। सुविभक्तीनां प्रकृत्यर्थान्वितस्वार्थबोध
कत्वस्य व्युत्पत्तिसिद्धत्वात्। अत्र प्रकृतितात्पर्यविषये तदन्वयव्युत्पत्तौ लक्षणोच्छेदो गौरवं च। आख्यातसंख्यापि च नानुमितेनार
न्वेति। किंतु भावनान्वयिना शब्देन प्रथमं नानुपस्थितेनापदार्थतयाऽनुपस्थितिरेव तत्राक्षेपार्थः। अत एव न व्यक्तेराक्षेपः
किंतु लक्षणया गोपदात्प्रतीतिर्व्यक्तिधीरिति मंडनः। यदाह। जातेरस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति। नित्यत्वाल्लक्ष्यमा
णायां व्यक्तेस्ते हि विशेषणे इति। उच्यते स्वार्थोऽन्येन रूपेण ज्ञाते भवति लक्षणा। तीरत्वेन ज्ञाते गंगापदस्येव। न चेह गो
त्वादन्येन रूपेण व्यक्तेरुपस्थितिः। किंतु गोत्वेनैवाव्यक्तित्वेन सास्नादिमत्त्वेन वोपलक्ष्यत्वे गोपदाद्व्यक्तित्वादिरूपेणाधीः
स्यात्। नापि गोत्वसंबंधिनि गोत्वविशिष्टे लक्षणा। गोत्वे हि न सामानाधिकरण्येनान्वयः इति व्यक्त्यवच्छेदकतया तस्यान्वये मुख्य
त्वं। लक्षणयापि गोत्वावच्छिन्नैव व्यक्तिः क्रियार्थान्वयिनी प्रतीयते न केवला व्यक्तिरिति गोत्वविशिष्टस्य लक्ष्यत्वे युगप
द्वृत्तिद्वयविरोधः। गोत्वेपि वा लक्षणा। अपि च जातिमात्रे न शक्तिर्न वा व्यक्तौ लक्षणा। जातौ मुख्यप्रयोगाभावात्। तयो
स्तन्मूलकत्वात्प्रयोगो हि व्यवहारहेतुज्ञानार्थं। न च जातिमात्रे निर्विकल्पकात् व्यक्तिमनादाय जातौ केवलव्यक्तौ वा व्य
वहारः। तस्य विशिष्टज्ञानसाध्यत्वात्। गां पश्य गौरस्तीत्यादावपि गोत्वविशिष्टस्यैव ज्ञानं व्यवहारश्च। तस्मादेकवित्ति

वेधत्वनियमाज्जातिविशिष्टं शक्यं। यदि च तृतीयायाः करणे कर्तृत्वे इव गोगोत्वे शक्ये तदा गोत्वं व्यक्तिश्चेति धीः स्यात् न तु गौर
िति वैशिष्ट्यं च संबंधो वा न ज्ञातो घट इत्यत्र च विशेषणता विशेष्यो वार्थांतरं वेत्यन्यदेतत्। जातिविशिष्टवदवयवसंयो
गरूपाकृतिरपि पदशक्या। गोपदाज्जात्याकृतिविशिष्टस्यैवानुभवात्। पिष्टकमय्यप्यावङ्न्यादौ गवाकृतिसदृशा
कृतौ लक्षणा। पिष्टकसंयोगविशेषस्याशक्यत्वात्। व्यक्तिजात्याकृतीनां प्रत्येकमात्रपरत्वे लक्षणैव। प्रत्येकस्य जात्या
कृतिविशिष्टादन्यत्वात्। यथा गुरूणां कार्ये शक्तायालिङ्गो लोके कार्यत्वपरत्वे। अत एव व्यक्त्याकृतिजातयस्तु पदा
र्थ इति पारमर्षे सूत्रे एकस्यैव शक्त्यैकवित्तिवेद्यत्वसूचनाय पदार्थ इत्येकवचनं। एवं पङ्के पंकजपदशक्यं। ततो नि
यमतः पंकजनिकरेऽपद्ममिति प्रतीतेः। अवयवार्थस्तत्रास्मन्न्यात्। रूढिविनायोगमात्रात्कुमुदे धीप्रयोगप्रस
ङ्गाच्चाननुरूपावपियोगात्कुमुदे तौ कुतो न स्यातां ता रूढ्या प्रतिबंधादिति प्राञ्चः॥ ॥वयं तु नियमतो रूढ्या स्मृ
तं पद्ममेव व्यक्तिवाचकद्रुप्रत्ययेन पंकजनिकरे तथाऽनुभाव्यते। बाधकं विना व्यक्तिवचनानां सन्निहितविशे
षपरत्वनियमात्। यथाग्नेपीइतिरंगतपदे न प्रकरणादिसंनिहिताक्रकुठगभिहिता व्यक्तिर्बोध्यते। एवं सर्वत्र प
द्मानुभवसामग्र्येवेति न कुमुदधीर्न वा तदर्थप्रयोगः। नन्वेवं रूढिरेवास्तु तत एवोभयलाभात् किं योगरूढ्या
न। अवयवशक्तेः क्लृप्तत्वान्न यौगिकार्थानुभवाच्च। यदि च रूढ्यर्थ एव योगार्थ एव वानुभूयते तदा विवाद एव न

स्यात्। अननुभवेनैव तद्विच्छेदात्॥ अत्र मीमांसकाः न तावत् स्मृत्यर्थं शक्तिः पंकजपदप्रयोगविषये नियतपद्मा
नुभवजनितसंस्कारात् स्मृतेरुपपत्तेः। स्मृतेस्तज्जन्यत्वनियमात्। नाप्यनुभवार्थं। नियमतः स्मृतं पद्ममादाय व्यु
त्पत्तिवचनन्यायेनावयवैः पंकजनिकर्तृत्वं पद्ममित्यनुभवसंभवात्। स्मृतिश्च रूढ्यान्यथा वेति न विशेषः। शक्तिं
विना नियतः प्रयोग एव कुत इति चेत् न। एवं प्रयोगमपेक्ष्यावयवानामुक्तन्यायेन पद्मानुभवजनकत्वनि
यमात्। एवं प्रयोगोपि तत्पूर्वं प्रयोगमपेक्ष्येत्यनादितैव। अथानियतोद्बोधकस्य संस्कारस्य शक्तिं विना निय
तोद्बोधहेतुत्वभावान्नियता स्मृतिरेव स्यादिति चेन्न। कदाचिच्छक्तितोप्युद्बोधाभावेन शक्यास्मरणात्। शक्तिं
विनापि नियमतः शक्तिस्मरणाच्च। उद्बोधकं च न नियतम्। सदृशपदशक्तिसंबंधिज्ञानानां प्रत्येकं व्य
भिचारात्। किंतु यत्र स्मृतिस्तत्र तत्कालोत्पन्नमनियतमेवोद्बोधकं कल्प्यते फलबलात्। कार्यान्वयधर्माणां
यथा कार्यमुन्नयनात्। न च पद्मवत्तद्व्यापकादेरपि स्मृतिप्रसंगः। स्मृतिबलेनोद्बोधकल्पनमिति तत्र स्मृत्य
भावेन तदुद्बोधाभावात्। तस्माच्छक्तिं विना शक्तेरिव पद्मत्वस्य नियता स्मृतिः। न चैवं गवादिपदेपि न शक्तिः स्या
त्। व्यवहारकालीनसंस्कारादेव गवादिस्मृतिसंभवादिति वाच्यम्। न हि तत्र स्मृत्यर्थं शक्तिः किंत्वनुभवार्थं पदा ग्रं० ८४
दन्यतो गवादेरनुभवासंभवात्। अव्युत्पन्नस्य तु तोनुभवासंभवाच्च। पद्मानुभवश्च प्रयोगादेवेति न समुदायो हे

तुरन्यथासिद्धत्वादतो नानुभवत्वात्समुदायशक्तिः। नन्वेवं गवादिपदानां प्रमेयत्वे शक्तिरस्तु गवादिस्मृतिः संस्कारा
दिति चेत् गोव्यवहारेण हि स्वोपपादके गोज्ञाने पदस्य शक्तिकल्पनम् न तु अनुपपादके प्रमेयत्वज्ञाने गोपदात्प्रमेयो
गौरित्यनुभवाच्च अथैवं संस्कारादेव तीरादिस्मृतिसंभवे गौणलाक्षणिकोच्छेदः। तीराद्यनुभवार्थं हि न तत्कल्पनं तद
नुभवस्येतरपदादेव सिद्धेः। तयोरननुभावकत्वात् तस्मान्नियतास्मृतिर्वृत्तिसाध्येति तयोः कल्पना तथा च नियतपद्म
स्मृत्यर्थं पंकजपदेपि वृत्तित्वेन शक्तिकल्पनमावश्यकं लक्षणाद्यभावादिति चेन्न गंगायामित्यादौ वृत्तिं विना तीरादे
रपदार्थत्वे विभक्त्यर्थान्वयस्तत्र न स्यात् सुविभक्तीनां प्रकृत्यर्थगतस्वार्थान्वयबोधकत्वव्युत्पत्तेः। पद्मस्य तु पंकजवा
क्यप्रतिपाद्यत्वेन पाचकादेरिव विभक्त्यर्थान्वयोपपत्तिः। यत्तु शाब्दोपस्थित एव शाब्दान्वयबोधः। अन्यथा प्रत्यक्षो
पस्थिते कलाये पचतीत्यन्वयबोधः स्यादिति। तन्न पदस्य तात्पर्यग्राहकत्वात् यद्वै भवत्येव किं पचतीत्युक्ते वधूः प्रद
र्शितकलायादौ अन्यथा प्रत्यक्षोपस्थितेर्देवाश्रुतस्मृतकलायपदात्कुतो नान्वयबोधः द्वारमित्यादावपि न पिधे
हीत्यध्याहारः। किं तु तदर्थस्यैव लाघवात् न च पद्ममानयेत्यादौ शाब्दपद्मानुभवे पद्मोपस्थापकपदजन्यत्वाद
न्यत्रापि तथेति वाच्यम् शाब्दपद्मानुभवेपि हि तदन्वयबोधतात्पर्यकपदत्वेन कारणता ननु पद्मोपस्थापकपदत्वेना
पि गौरवात् अथैवं जनिकाल एव प्रयोगः स्यान्न तदत्यये न ह्यसति दंडे दंडीति व्यपदिश्यत इति चेत् न पाचकादिपदप
वदप्रत्ययस्य योग्यताशक्यत्वात्तद्वृत्तकत्वात् वा डुपसंज्ञादौ तथा निर्णयात् अन्यथा योगरूढावपि जनिकाल ए
व प्रयोगः स्यात् योगत्यागे केवलरूढिवादे विवादाभावश्च तथापि कुमुदे न लक्षणा स्यात् योगार्थस्याबाधादि

८५

शा॰ मू॰

[redacted]

दितिचेत् न वस्तुतो हि तत्र तत्प्रकारसाचुत्वम् न व्याप्त्या नियमतः स्मृतपद्मस्यान्वयानुपपत्त्यनंतरमेव कुमुदधीरिति तत्र लक्ष
णाव्यवहारो वस्तुतो मुख्यैव तथापि पद्मत्वस्यायोग्यतयानन्वये योगादेव कुमुदधीर्न लक्षणयेति उच्यते अस्ति व्यु
त्पन्नस्य पदज्ञानानंतरं नियमतोन्वयप्रतियोगिस्मृतिस्तत्र तत्संस्कारोद्बोधकं प्रतिबंधकं विना पदज्ञानमेव दृ
ष्टानुविधानादनुगतत्वाल्लाघवाच्च न तु प्रतिपदार्थस्मृतितत्कालोत्पन्नमनंतमदृष्टं वा मनिर्वचनीयं गौरवा
त् अतः पद्मस्मृतावपि गृहीतसम्बंधं पंकजपदमपेक्षितमिति संबंधत्वेन शक्तिसिद्धिः। अन्यथा प्रकारशब्देपि
जातिविशेषे रूढिर्न स्यात्तत्संस्कारादेव तदुपस्थितिसंभवात्। तथा च वर्षासु रथकार आदधीतेत्यत्र रूढ्यर्थे
स्य वत्त्वेन शीघ्रमुपस्थितत्वाज्जातिविशेष एव तत एवाधानं विधीयत इति राद्धान्तव्याघातः। यथा च शाब्दः सन्निधिर
न्वयबोधांगं तथोक्तं प्रासत्तिप्रस्तावे। स्यादेतत्। पद्मे नियतप्रयोगाद्रूपसंबंधेन पंकजपदादेव पद्मस्मृतिरस्तु।
एवं च पद्मे विभक्त्यर्थान्वयः शाब्दानुभवप्रवेशश्चाप्युपपद्यते। पंकजपदप्रतिपाद्यत्वात्। न च प्रतिपाद्यतावच्छे
द्यैव तदुभयोपयोगिनी। पाचकमानयेत्यादौ वाक्योपस्थापितदभावात्। न च पदाद्दृष्टैव स्मृतिः। किं तु संबंधि
ज्ञानाद्वृत्तेरपि संबंधत्वेन स्मृत्युपयोगात्। अन्यथा पदादृष्टेः स्मृतिर्न स्यात्। गवादिपदेप्येवं स्मृतिसंभवे
प्यनुभवार्थं शक्तिरित्युक्तं। एतेन पंकजपदान्नियमतः पद्मज्ञानं न वृत्तिं विना अतो लक्षणाद्यभावे शक्तिरि
त्यपास्तम्। ज्ञानं हि स्मृतिरनुभूतिश्च शक्तिं विनाप्युपपन्ना न तां कल्पयति। अनन्यलभ्यस्यैव शब्दार्थत्वात्।
अन्यथा शक्तिं विना पदान्नोपस्थितिरित्यन्वये शक्तिलक्षणोच्छेदश्च। पंकजपद्ममुच्यत इति प्रसिद्धपदसामाना
धिकरण्यात्पद्मस्य ज्ञापकं तत्सिद्ध्यतीति। ननु तच्छक्तम्। अत एव पंकजपदं पद्मशक्तम्। नियमतस्तत्स्मारकत्वात्पद्मपद

८५

त्वेऽपभ्रंशत्वाद्वाच्यवाचकयोरपि नियतस्मृतिप्रसंगः। अथ पदस्य प्रयोगत्वं तत्र एव प्रयोगे इति नियतसंबंधेन पदैतस्यास्तेऽत्रापदस्यैव पदत्वं
हेतुत्वे सकलप्रयोगादर्शिनो बालस्यापभ्रंश एवं गृहीतप्रयोगस्य समव्याप्तिज्ञानाभावात् न पदस्मृतिः स्यात् । स्व
रूपसतस्तथात्वे चागृहीतपदप्रयोगस्यापि ततो नियतपदस्मृतिप्रसंगः । अथ यादृशः प्रयोगो ज्ञातस्तयाश
क्तिग्राहकत्वेनाभिमतः स एव पदस्मारकोऽस्तु · न च पदत्वस्यैव प्रयोगसमव्याप्तत्वेन गृहीतस्य सोऽस्माद्दृश्योऽधि
स्ततः स्मृतिप्रसंगः · तदापि शक्तिग्रहप्रसंगात् । तयोस्तुल्यत्वेपि शक्तिग्राहकप्रमाणेऽलाघवादितर्कावतार
ण्णोपाधौ शक्तिरिति यदि तदा तर्कसहकृत एव शक्तिग्राहकत्वाभिमतः संबंधः पदस्मृतिहेतुरस्तु । तर्कानव
तारेपि बहुधा गृहीतप्रयोगस्य पदस्मृतिदर्शनान्न तथेति चेत् । तर्हि तदापि तर्कं विना शक्तिग्रहाभावात्क
शक्ति थं पदस्मृतिरिति तुल्यम् । न चैवं तत एव शक्तिग्रहोपि स्यात् । अनन्यलभ्यस्यैव शब्दार्थत्वादिति ॥ ॥मैवम्· एवं
हि गवादिपदेपि शक्तिग्राहकत्वाभिमतादेवंविधप्रयोगादेव ज्ञातात्तद्वादेः स्मृत्यनुभवोऽस्तु । मास्तु किं शक्त्या · तस्मा
त्पदाधीनानियतास्मृतिः शक्तिसाध्या · नियतसंबंधसाध्या वा · वृत्तिसाध्या वा · तत्र हि परिशेषादिह शक्तिसाध्येव ·
न च शक्तिस्मृतौ व्यभिचारः । शक्तिस्मारकत्वाभिमताद्धि पदात्पदार्थस्यैवाहत्य स्मरणं न तु शक्तेः । हेत्वभावात्
कल्पनागौरवात् । संबंधिनं विना संबंधस्यास्मरणेन प्रथमं पदार्थस्मरणस्यावश्यकत्वात् । पदार्थस्मृतेश्च श
क्तिविषयत्वेमानाभावः । उद्बुद्धसंस्कारविषयत्वाद्यपि शक्तिरपि तद्विषयस्तथापि पदार्थशक्तत्वेनैव ज्ञा+
+ स्मृतिः ॥ न चैवं नियतप्रयोगादेव शक्तिसिद्धिरनन्यलभ्यस्यैव पदार्थत्वादिति चेत् तर्हि ज्ञानस्यास्मृ+

८६
श॰सू॰
66

तस्य पदस्य शक्तिस्मारकता । न तु शक्तिसंबंधित्वेनान्यथासिद्धत्वात् । यद्वा पदान्नियमतः स्मृतिः नियतसंबंधसा
ध्या । शक्त्यापि समं पदस्य शक्त्याश्रयत्वमेव नियतः संबंधः । अपि चा कुमुदे अवयवशक्तिप्रतिबंधार्थं रूढिः ।
न च नियतपद्मस्मृतिरेव प्रतिबंधिका । रूढिं विना नियतस्मृतेरभावात् । अत एव नव्यक्तिवचनन्यायोपि न चैकं
पदमेकदा एकेनैव रूपेण वर्त्तते । अतो न पद्मत्वपंकजत्वयोर्धीरिति वाच्यम् । अवयवसमुदाययोर्भेदात् । लं
बकर्णादिपदे व्यभिचारश्च । तर्हि तद्वदेव रूढ्यानावयवशक्तिप्रतिबंधः । यत्त्ववयवशक्तिस्मृतिकाले समुदा
यशक्तिस्मृतिनियमे हेत्वभावान्न तया प्रतिबंध इति । तन्न । समुदायस्य तावदवयवरूपत्वेन सर्वावयवादेर्वोभ
यशक्तिस्मृतिसंभवात् । मंडप● पदे तथादर्शनात् । अथ पंकोत्पन्नपदं प्रतिबंधकं । गोबलीवर्दवृत्पंकजनिसह
प्रयोगे दत्रत्ययस्यैकत्वविशेषपरत्वं वा । जनेः पद्मजनिविशेषपरत्वं वा । स्वभावादेव कुमुदबोधाजनकत्वं
वा । चतुष्वरसो । अवयवशक्तिकुंठनं वा कल्प्यतां । तेन कुमुदे न धीरिति चेत् । तर्ह्यज्ञातपद्मप्रयोगस्य कु
मुदसाधारणबोधो न स्यात् । न भवत्येवेति चेत् । किमवयवव्युत्पन्नस्य ततोर्थप्रत्यय एव न भवति । यद्वा पंकज
त्वेन पद्ममेवानुभूयते । आद्ये मंडपादिपदादिव सामग्रीसत्त्वे कथं नानुभवः । द्वितीये कुमुदमप्यनुभूयेतावि १५०
शेषात् । न चैवं पंकजशब्दस्य सामान्यशब्दत्वात्तात्पर्यवशेन विशेषतः पद्मकुमुदधीसंभवान्न रूढिर्नेवात्त

णात्स्यादिति वाच्यं · न हि प्रयोजनत्वातिभयेन सामग्रीनानुभावप्रति · यदि पद्मकुमुदयोरुक्तत्वपुतात्तदागृहीतप
मप्रयोगस्य पद्मान्वयानुपपत्तिपुरस्कारेणैव कुमुदधीर्न स्यात् । स्याच्च कदाचिद्देवपरित्याग्यतः पद्मे रूढिरेव · कु
मुदे यथा लक्षणा तथा वक्ष्यामः । कुंठनं च शक्तिरुक्तिधर्मांतरं वा शक्तेरनुद्बुद्धो वा ऽभिभवो वा तत्र कारणांतरं वा ऽ
दृष्टं चांकल्प्यम् । रूढेर्योगप्रतिबंधकत्वं मंदपादिदृष्टमेव · अत एव पंकाद्यवयुत्ये: पद्ममेवानुभाव्यत इति अव
यवनियमकल्पनान्न कुमुदे धीप्रयोगौ । अन्यथा रूढावपि योगान्न कुतस्तौ कुमुदे · यथोद्भिदादस्य योगात्स्व
नित्रे रूढ्या कर्मविशेषे प्रयोग इति निरस्तं · अगृहीतनियतपद्मप्रयोगस्य कुमुदस्याधारणबोधदर्शनात् । रू
ढिवादे तु सैव प्रतिबंधिका मंदपपद्वत् । ज्ञातस्य चावयवनियमस्य प्रयोजकत्वे पद्मे शक्तिरेव · पद्मज्ञानजन
कं च ज्ञानस्य शक्तिनिर्वाह्यत्वात् · उद्भिदादेस्त्ववयवार्थः कर्मणि प्रयोगपत्वादेव नान्वीयते · न तु रूढ्या प्रतिबं
धात् · अवयवान्वययोग्ये खनित्रेपि प्रयोगात् । एवं च रूढियोगाभ्यामुद्भिदादस्य नानार्थत्वे तु त्यैतैवाउभाभ्यामेका
र्थानवगमात् । ननु गृहीतपद्मप्रयोगस्यावयवैः सह प्रयोगे पद्ममेवानुभाव्यत इति स्वभावकल्पनमस्तु न चैवं क
ल्पयितरं · स्वरूपसत एव प्रयोगग्रहस्य शक्तिग्रहस्येवोपसंदानत्वात् । उपसर्गस्येव धातोः प्रकर्षादिबोधकत्वे · उप
संदानं च विना कुमुदबोधो भवत्येवा यन्नुपदानां स्वार्थान्वयबोधसामर्थ्यमुपपत्तौ कुमुदबोधार्थं नान्विताभिधा

न प्रतिबंधः
कोऽग्रेन

श·मू·
८१
87

नेश्रवयवनियमः कल्प्यत्यते·ऽपजीव्यविरोधात् किंतु समुदायस्यकुमुदेस्वार्थत्वाभावएवेति।तन्न· एवंस्वार्थत्वा
भावेनसमुदायान्कुमुदधीनं स्यात्·शक्तिभ्रमेणाबोधकत्वाच्चात थाचबोधकशक्त्यभावादेवाबोधकत्वं·कार्या
भावेहेत्वभावस्यैवतंत्रत्वात्·धातोश्चोपसर्गोपसंदानाप्रकर्षादौशक्तिरेव॥ ॥स्यादेतत्·यथासर्वनामत्वमूह्
पदेषुबुद्धिस्थत्वसंबोध्यत्वोच्चारयितृत्वानिप्रयोगोपाधयस्तेनबुद्धिस्थादिकमेवतद्बोधयति·तत्रैवप्रयुज्यते
चः नतुबुद्धिस्थत्वादिकंशक्यं।तेनरूपेणज्ञानाभावात्·तथापद्मत्वमपिप्रयोगोपाधिरितिचेत्न·तेनहिनावयव
शक्तिर्विच्छिद्यते।पद्मेतत्सत्वात्·नापिकुमुदेतात्पर्यमपोद्यते।बाधकंविनातस्यौत्सर्गिकत्वात्·नाप्यवयवार्थीनज्ञा
नंप्रतिबध्यते।शक्त्याकांक्षादितात्पर्याणांसत्वे·अन्वयज्ञानस्यावश्यकत्वात्·ऽपायेरन्वमबोधाप्रतिबंधकत्वात्·
नापिप्रयोगोबाधितः·इष्टकुमुदधीहेतुतयाइष्टसाधनताज्ञानस्यतल्लिंगककार्यताज्ञानस्यवाप्रयोगहेतोःसत्वे·
प्रयोगस्याहेतुकत्वात्।अहमादिपदेत्वात्ममात्रशक्तेशक्तिग्रहसहकारितयास्वरूपसदेवोच्चारयितृत्वादिधीनि
यामकं।स्वभावान्नियमतस्तस्यैवबोधनादितिस्वरूपसतएवोपाधित्वं·पद्मत्वंतुनतथा।कुमुदसाधारणबोध
दर्शनात्।ननुकुमुदेपूर्वेषामप्रयोगादाधुनिकानामप्रयोगः।नचप्रयोगमात्रेकोहेतुरितिवाच्यं।प्रयोगाणांहि श्म०
मेलकेनकार्यता।किंतुप्रत्येकं।तत्रोन्नतस्यपूर्वोहेतुः।यथापूर्वंगोरुन्नतस्य।अन्यथागोमात्रेकोहेतुरित्यत्रकिमुत्तरं ८१

तद्वेति चेत् । अप्रयोगहेतोः सत्त्वात् । पूर्वप्रयोगस्यकाहेतुत्वात् । पूर्वप्रयोगमज्ञात्वाप्यवयवशक्त्यन्नेन पाचकादि
पदानां नवकाव्यानां गौणलाक्षणिकदेवदत्तादिपदानां च प्रयोगात् ॥ स्यादेतत् । ग्रामगामादिपदे त्वयं बोधाभा
वात् साधुत्वज्ञानमपि हेतुः । न चैवं तदेव हेतुरस्तु । किं शक्त्या गौणलाक्षणिकविवेकश्च सोपाधित्वान्नुपाधित्वाभ्या
मेवास्त्विति वाच्यम् । प्रथमं भ्रमवहारेण शब्दस्य ज्ञानकारणतावगमान्तरैव शक्तिकल्पनं । ततो ग्रामगामादौ व्यभिचारा
दाकांक्षादेरिव साधुत्वज्ञानस्य हेतुत्वकल्पनात् । साधुत्वं च न पूर्वप्रयोगप्रवाहाविच्छेदः । नवकाव्यादौ तदभावा
त् । किंतु भ्रमादिजन्यत्वाभावः । कुमुदे च तत्प्रयोगो बोधकत्वभ्रमात् । न चैवं भ्रमजन्यत्वाद् बोधकत्वं अबोधकत्वे च
बोधकत्वभ्रमं तज्जन्यत्वमिति अन्योन्याश्रयः । पूर्वं भ्रमजन्येनोत्तरं प्रति बोधकत्वभ्रमादुत्तरस्य प्रयोगो भ्रमजन्यः एवं
पूर्वस्यापीति । तत्र भ्रमपरंपरैव मूलं । एवं ग्रामगामादेरपि । कथमिदं ज्ञातव्यमिति चेत् । ग्रामगमनकर्तरि ग्रामगाम
पदस्येव प्रामाणिकानां कुमुदे तस्य निरुपाधिप्रयोगाभावात् । अत एव साधुत्वे ग्रामगामपदवल्लक्षणापि न स्यात् । पप्रे
तस्य साधुत्वात् । उच्यते । पंकजनिकर्तृत्वं लक्ष्यते । न चासाधुत्वे ग्रामगामपदवल्लक्षणापि न स्यात् । पप्रेतस्य साधुत्वा
त् । उच्यते । पंकजनिकर्तरीति तत्प्रयोगस्य भ्रमाघजन्यत्वेन साधुत्वं । कुमुदे न तथेति चेत् । न । पुंडरीकवन्नवपद्मवच्च
तस्य व्यक्तिस्थानीयत्वात् । प्रतिवाक्यार्थं च साधुत्वज्ञानस्य हेतुत्वे ऽभिनवव्यक्तौ भ्रमाघजन्यत्वस्याग्रहीतुमशक्य

श·मू·
८८
३४

त्वयापाचकादिपदप्रयोगो न स्यात्· पाककर्तृजातीयेऽस्मदाद्यतनत्वं त्वस्य सुग्रहत्वं च तत्पंकजत्वमकर्तृजातीयेपि सुग्रहत्वात् ये
न रूपेणान्वयबोधस्तस्य कुमुदवृत्तित्वात्। अथ पंकजपदं कुमुदे वृत्त्यंतरं विना न साधु। वृत्त्यंतरं विना वृद्धैस्तत्राप्रयुज्य
मानत्वात्। यः शब्दो यत्र वृत्त्यंतरं विना वृद्धैर्न प्रयुज्यते स तत्र वृत्त्यंतरं विना न साधुः। यथा गंगापदं तीरे· यथा वा ग्रामगामिपदं
ग्रामगमनकर्तरि। न प्रयुज्यते च वृत्त्यंतरं विना पंकजपदं कुमुदे· तस्माद्वृत्त्यंतरं विना न तत्र साधुरिति चेत् न· व्यर्थविशेषणत्वा
त्। तत्राप्रयुज्यमानत्वस्यैव व्याप्यत्वात्। आकांक्षादिमद्वाक्यासाधुत्वे अवयवार्थान्वयबोधकत्वस्य व्याकरणस्मृत्यनुप
गृहीतत्वस्य पक्षधर्मावच्छिन्नसाध्यव्यापकस्योपाधित्वाच्चापक्षे भयाभावेन साधनाव्यापकत्वात्· पंकजशब्दः कुमु
दे साधुः साधुत्वे सति कुमुदबोधप्रयोजकाकांक्षादिमद्वाक्यत्वात् साधुत्वे सति यद्वाक्यं यद्बोधप्रयोजकाकांक्षादिम
द्भवति तत्तत्र साधुः यथा तरुप्रसूनेत्र नशब्दः कुसुमे यथ भावा पाचकशब्दः पाककर्तरि· तथा पंकजपदं कुमुदे तस्मा
न्न येति संप्रतिपन्नत्वाच्चावस्ततः साधुत्वज्ञानं न हेतुः। अवयवादिकल्पनेन अमाद्यतनपूर्वप्रयोगमज्ञात्वापि
नवकाव्यादिप्रयोगात्। कुतस्तर्हि ग्रामगामादौ ना~~साधुत्वनिश्चयः। संशयश्च~~न्वयबोधः। असाधुत्वनिश्चयादि
ति ब्रूमः। साधोरप्यसाधुत्वनिश्चयेनाबोधकत्वात्· अभिनवकाव्यादौ नासाधुत्वनिश्चयः। संशयश्च न प्रतिबंध एम०
कः। अन्यथा योगरूढिसंशये सत्यभिनवव्युत्पत्तौ पाचकादिपदप्रयोगो न स्यात्। अन्ये तु ततोऽन्वयबोधो भवत्येवा। अप ·८

गमिपूर्वोत्तरत्वेन वा।

मंशादिवयथातवसाधुत्वमप्रमाता। साधुत्वंतस्यनास्तितद्वदेव। अपरेत्वत्राकांक्षैवनास्तिघटः कर्मत्वमानयनमित्यत्रे
व। यत्तुगम्याद्यनुत्तरास्त्वेनशक्तिः काशपूर्वैतरकुशत्वेनेचेति तन्न। कर्मोपपदस्यात्‌जराएन्द्वेनैवशक्तेः। नतुतत्तद्धा
त्वनुत्तराएन्द्वेनगौरवात्‌। तन्नद्धान्तत्वंनाविशिष्यान्तनेशक्तिग्रहानुपपत्तेः। कर्मत्वपरिणतिस्तूत्रार्थमजानतः कुं
भकारादिपदप्रयोगानुपपत्तेश्च। शक्तिसंदेहात्‌। असाधुत्वंचनभ्रमादिजन्यत्वं। अनाप्तोक्तेअसाधुत्वापत्तेः। ध्व
काध्कदीरितेग्रामगामादौभ्रमाद्यजन्यत्वाच्च। किंतुमहाजनपरिगृहीतव्याकरणस्मृतिनिषिद्धत्वंतदपरिगृहीतत्वं
चेतिवक्ष्यते। पदस्यसाधुत्वंशक्तिरेव। शक्तिश्चशाब्दबोधहेतुपदार्थोपस्थित्यनुकूलः पदपदार्थयोः संबंधः।
वाक्यसाधुत्वंचाकांक्षादिमत्त्वार्थान्वयबोधकत्वेसतिव्याकरणस्मृत्यनिषिद्धत्वं। तस्मात्कुमुदेपंकजस्य
साधुत्वेसतिप्रयोगप्रतिबंधकत्वेनसमुदायशक्तिसिद्धिरिति॥ नचैवंलाघवाज्जशब्दएवशक्तिरस्तु। नसमु
तो दायेमंडुराजादौपंचमीप्रसंगात्‌। पंकोत्तरजपदत्वेनशक्तिरितिचेन्नहिंसर्वत्रतत्तद्वर्णोत्तरत्वशब्दएवशक्तिः
रितिसमुदायशक्त्युच्छेदः। नचैवमेव। विनिगमकाभावादितिसंप्रदायः॥ ॥अत्रब्रूमः॥ ॥ज्ञातादियाशक्य
मनुभावयतिसाशक्तिः। नचसमुदायः पद्यानुभवहेतुः। अवयवादेवतदुपपत्तेः। एवंचप्रतिबंधकमात्रेश

श॰सू॰ क्तिपदं पारिभाषिकं। शक्तित्वादनुभावकत्वसाधने ऽन्योन्याश्रयः। प्रतिबंधकत्वेनावगमे शक्तित्वासिद्धेश्च। मंदपादौ
८६ त्वनुभावकत्वेनैव शक्तिसिद्धिः। किंच रूढियोगयोर्विरोध एव परं रूढ्या योगप्रतिबंधः। मंदपादौ तथा निर्णयात्
89 । अन्यथा लंबकर्णादावपि योगप्रतिबंधः स्यात्। न चेह विरोधः। पद्मे द्वयोः समावेशात्। योगाद् र्थधीश्चोभय
त्र तुल्या। यत्तु पंकजमानयेत्यादौ रूढ्या शीघ्रोपस्थितं पद्मं वेमेव क्रियायामन्वीयते। न पंकजन्मकर्तृ। तस्य वाक्यार्थ
त्वेन विलंबप्रतीतिकत्वात्। एवं चाविरोधेपि रूढेर्योगापहारित्वेति। तन्न। क्रियापदं तदर्थयोग्यतादिज्ञानाधी
नत्वेन क्रियान्वयबोधस्य विलंबितत्वात्। रूढ्यवयवार्थयोरन्वयबोधस्य सामग्रीसत्वेन प्राथमिकत्वात्। तस्मान्न
प्रतिबंधकत्वेन रूढिसिद्धिर्नवा तया योगप्रतिबंध इति॥ ॥अत्रोच्यते। नियमतः पद्मस्य स्वार्थमेव रूढिः।
रूढ्या च नियमतः स्मृतं पद्ममेवावयवैः पंकजनिकर्तृत्वेनानुभाव्यते बाधकं विना व्यक्तिवचनानां सन्निहित
विशेषपरत्वनियमात्। अतः सर्वत्र पद्मानुभवसामग्र्येवेति न कुमुदधीप्रयोगौ। न चैवमनुभवाजनकत्वे
न सा न शक्तिः। या ज्ञाता नियमतः शक्यं ज्ञापयति सैव हि शक्तिः। ज्ञप्तिश्च स्मृतिरनुभूतिश्चेति नियमतः स्मा एम॰
रिकापि शक्तिः। वस्तुतः स्वार्थस्मृतिद्वारावयवानामिव समुदायस्य स्वार्थान्वयानुभावकत्वमविशेषादिति पश्च

दनुभाविकापि रूढिः। पंकजमानयेत्यादावानयनादिनाक्षार्थान्वयानुभवे समुदायावयवयोर्हेतुत्वाच्चातस्मान्नि
यतस्मृतिहेतुत्वेनैव रूढिसिद्धिः नतु प्रतिबंधकत्वेन। यदि च नियतास्मृतिः प्रकारांतरेण भवति तदा योग एव न यो
गरूढिः रूढिन्यायेनैव कुमुदे धीप्रयोगयोरभावादिति॥ गोपदस्य गाविवेदेहीनपदस्य कर्मविशेषे रूढिरिव। त्वा
घवात्॥ ननु गमेर्डोस्त्रहुः खः कतुसम्रूहरूत्यनुशासनाद्योगोपि। दोरवप्रत्यययोर्लोके कर्त्तरि कर्मविशेषे रूढिरे
घवात्॥ ननु गमेर्डो व शक्तिर्न क्लृप्ता। अतः प्रत्ययेपि शक्तिः नियामकं च गमकत्वमहः पदोन्तरत्वं च कल्प
तथा च गौरवं। एवं धेनुपदेप्येकैकस्यातिप्रसक्तत्वाद्द्वित्वविशिष्टध्यानकर्मणि रूढिरिव। नियमतो गोत्वविशिष्टो
पस्थितेः॥ ननु योगोपि दानुमानुरूपान्वादौ भिन्नार्थत्वेन नतु प्रत्ययशक्तेः कल्पनात्॥ गमेर्डोस्त्रहुः खः कतौ दाभा
भ्यांनुः धेटइच्च इत्यादिस्मृतिश्चाल्बब्रूदिवत् कथंचित्कृत्याद्दनपरा। अत एव भगवान्पाणिनिर्भ्योन नु गमात्सम्
दायशक्त्यपेक्षया गौरवाच्चोणादिप्रत्ययेषु न शक्तिरिति पंचपादिकाविहितानुणादिप्रत्ययानुणादयो बहुलमित्येकेनै
व सूत्रेण विहितवान्॥ यत्र तु प्रत्ययेषु शक्तिस्तत्र प्रत्येकमेवासूत्रयत्॥ यत्तु धेनुपदे गोत्वं न शक्यं किंतु शक्योपलक्षक
तया शक्यकपाधिः। यत्र गोत्वं तद्ध्यानकर्मशक्याशक्यासूपलक्ष्यामहिष्यादिव्यावृत्ता ध्यानकर्मव्यक्तिविशेषा एव
अनुगमस्योपलक्षणैक्यात्॥ न चैवं त्वाघवादेरपि शक्यं ध्यानकर्मत्वमुपाधिः उपलक्षणस्य गोत्वस्यातिप्रसक्त

श॰प्र॰ स्यात् । न च लक्षणया मुख्यार्थाभावात् । न चापभ्रंशेनुस्मारितसाधुशब्दादन्वयबोधः । साधुशब्दमजानतामपि पा
८१ मराणां ततोर्थप्रतीतेः । तदर्थकसंस्कृतेनार्थाप्रतीतेश्च । शक्त्यारोपात्ततोर्थप्रत्यय इति चेन्न । मानाभावात् । व्य
९१ वहारादिना हृत्तं शक्तिग्रहे बाधकाभावाच्च । न च शक्तिसाध्यं शक्त्यारोपादुद्भवितुमर्हति । आरोपितादपि वह्ने
र्दाहापत्तेः । प्रत्यक्षायमानकारणोत्थानं प्रयोजकरूपवत्तयाज्ञायमानादेव फलं बाध्येऽप्यारोपादृष्टानुमि
तिवदिति चेत् । तर्हि तद्वदेव फलस्यायथार्थत्वापत्तेः । अन्यथाऽपभ्रंशेष्वेव शक्तिः साधुशब्दे एव तथेति किं न
स्यात् । न च सादित्वादेव दक्षादिशब्दवदाधुनिका एव तत्र संकेताः गवादिपदे त्वनादित्वाच्छक्तिरिति वाच्यं ।
सजातीयप्रयोगजप्रयोगत्वस्य प्रमाणाद्यजन्यत्वस्य चाऽनादित्वस्याऽपभ्रंशेपि सत्त्वात् । तत्तद्देशीयापभ्रंशेषु
संकेतयितॄणामस्मरणाच्च । न चापभ्रंशानां देशभेदेनैकत्रार्थे बहुत्वात्संस्कृतस्यैकत्वाल्लाघवेन तत्रैव शक्ति
: प्रमाणवतो गौरवस्यादुष्टत्वात् । अन्यथा नानार्थोच्छेदः । प्रतीत्यन्यथानुपपत्तिस्तूभयत्रैव । न तूभयोः शक्तत्वे
साध्वसाधुविभागाभावाद्व्यवहारविरोधः । साधुभिर्भाषितव्यं नापभ्रंशितवै नम्लेच्छितवै इत्यादिविधिनिषेधा श॰प्र॰
नुपपत्तिश्चेति चेत् तर्हि शक्तत्वाविशेषेपि तदभियुक्तैः पाणिन्यादिप्रणीतव्याकरणोपात्ततानामेव संस्कृतानां ८

साधुत्वमस्मानत्यपभ्रंशेतैः साधुत्वं स्मर्यते । तद्धि यथा एव साधुभिर्भाषितव्यमित्यादिविषयः । तेषामेव धर्मोपयोगित्वं
स्वभावादेव बीजस्येवांकुरे । तस्मादपभ्रंशेष्वर्थप्रत्यायकत्वाच्छक्तइति ॥ । उच्यते । एकत्र शक्त्याप्यन्यत्र तदारोपा
दर्थप्रतीत्युपपन्नावेकत्रैव शक्तिर्लाघवात् । अनन्यलभ्यस्यैव शब्दार्थत्वात् । अन्यथा ह्यनंतरोच्छेदः । तदाह भगवा
न्जैमिनिः अन्यायश्चानेकशब्दत्वमिति । सा च शक्तिः संस्कृत एव सर्वदेशेतस्यैकत्वात् । नापभ्रंशेषु तेषां प्रति
देशमेकत्रार्थे भिन्नभिन्नरूपाणां तावच्छक्तिकल्पने गौरवात् । पर्यायबहुतरत्वं चोभयत्रापि । न च देशभेदेपि प्रा
कृतस्यैकरूपत्वान्नैव शक्तिः । संस्कृतभवतत्समदेशीभेदेन तस्याप्यनेकत्वात् । एवं शक्त्यारोपादर्थप्रत्ययो
पपत्तौ नापभ्रंशे शक्तिः । ननु म्लेच्छादीनां संस्कृतमजानतां कथं तच्छक्त्यारोपः । उच्यते । केनचिद्गोशब्दे प्रत्ये
यो येपं क्रमे प्रमादाद्गावीशब्दे प्रयुक्ते व्युत्पन्नस्तेन गोशब्दमुन्नीय ततो गोप्रतीत्युपपन्नवत्तत्तवान् । यथाहुः । अं
बाम्बेति यद्वाबालः शिक्ष्यमाणः प्रभाषते । अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णय इति । पार्श्वे स्थश्च व्युत्पित्सु
र्गावीशब्दादेवायं गां प्रतीतवानित्यवगम्य गावीशब्दं गोशक्तत्वेन प्रतीत्यान्येषां व्युत्पादको बभूवेति । ततः प्रभृ
त्यपभ्रंशे शक्तत्वभ्रमः । एवं च प्रथमेयं व्युत्पन्नस्यापभ्रंशेन स्मारितसाधुशब्दादर्थप्रत्ययः । तन्मूलक एवान्

शा·प्र·
९१
92

नुसंहितसाधुशब्दानामपि शक्तिभ्रमात्। शक्तिमत्तया ज्ञायमानस्यैव शब्दस्य ज्ञानहेतुत्वात्। यत्तु जनकज्ञानस्य भ्रमत्वे
शाब्दज्ञानायथार्थत्वं। लिंगभ्रमजन्यानुमितेरिवेति। तन्न। नहि शक्तिज्ञानयथार्थत्वं शाब्दप्रमायां प्रयोजकं। अना
प्तोक्ते व्यभिचारात्। नापि जनकज्ञानभ्रमत्वेनायथार्थत्वं। भ्रमानुव्यवसाये व्यभिचारात्। प्रमाजनकत्वं चापभ्रंशस्या
वश्यकं शाब्दप्रमाप्रयोजकाद्योग्यतादेर्यथार्थतद्बोधाद्वा। न तु शक्तिज्ञानयथार्थत्वं तत्र गौरवात्। अबाधितसंस
र्गज्ञानजनकपदार्थोपस्थापकत्वादित्यन्ये। संसर्गबाधकप्रमाविरहादित्यपरे। ननु साधुत्वं न प्रतिपादकत्वं। अप
भ्रंशेतिव्याप्तेः। नापि यत्र पस्पानादिप्रयोगः स तत्र साधुः। हेरयो हेलय इति वदंतोसुराः पराबभूवुरिति वेदे अवगा
द् तिशब्देपभ्रंशेगतत्वात्। संज्ञाशब्दाव्यापनात्। लौकिकगोणत्वाद्यलौकिकयोरसाधुत्वापत्तेः। तथाभ्युपगमे वेदे
पितयोः साधुत्वं न स्यात्। अनादित्वं सजातीयप्रयोगपूर्वकत्वमपभ्रंशेपि। नियमतस्तथात्वं च सर्गादौ स्वतंत्रप्रयो
गेऽव्यापकं भ्रमाद्यजन्यत्वमपभ्रंशेपि। ननु साधुत्वं जातिर्गत्वादिव्यापिका। न चानुपलब्धिबाधः। व्याकरणसंस्कृ
तश्रोत्रग्राह्यत्वात्। न च संज्ञाशब्दानामसाधुत्वापत्तिः। तत्रापि प्रकृतिप्रत्ययोर्हेसंभवात्। गाव्यादिशब्देष्वपि तत्संभ एम०
वात्साधुत्वं स्यादिति चेत्। यत्राधिकतयासंभवः तत्र तथैवागवादौ न तथेति तत्रासाधुत्वमिति चेत्। न। जातिरूपत्वे

प्रतियोगिकत्वानुपपत्तौ सर्वस्य सर्वत्र साधुत्वापत्तेः। ननु गोशब्दोऽप्येवं साधुरेव ज्ञापकस्तु न भवति तच्छक्तत्वेना
ज्ञानादिति चेत्। एवं गावीशब्दोऽपि कपाचित्कत्वात्कचित्साधुरिति साधुत्वजातियोगाद्व्यपि साधुः स्यात्। प्रति
शब्दं च भिन्नतद्विषयतातित्वीकारे। ननु गमः तारत्वादेस्तु जातित्वेऽपि उत्कर्षरूपतातित्वेनावधिनिरूप्यत्वा। नापि
यत्नप्रयोगार्हत्वं साधुत्वं। एकमवच्छेदकं विनाप्रतिशब्दमर्हत्वस्य दुर्निरूपत्वात्। साधुत्वेनैव यत्नेविधानात्। चां
डालादुच्चार्यमाणस्यापि साधुत्वात्। यत्नाग्रहणेऽपि साधुत्वव्यवहाराच्च। नापि धर्मजनकशब्दत्वं। अपभ्रंशेऽपिगत
त्वात्। यतितोच्चार्यमाणस्यापि साधुत्वाच्च। नापि वेदस्थशब्दत्वं। अपभ्रंशे लिङ्गशब्देऽपिगतत्वात्। संज्ञाशब्दे तदभावा
त्। भाषायां सद्वसुश्रुवद्रुत्यादेः साधुत्वानुशासनविरोधात्। सर्वेषां साधुत्वेन सप्रतियोगित्वानुपपत्तेश्च। नहि
कचिद्विषये तद्वेदस्थं कचिन्नेति युज्यते। विरोधात्। नापि व्याकरणव्युत्पाद्यशब्दत्वं। संज्ञाशब्दे तदभावात्। साधुत्वे
न सिद्धे व्याकरणप्रवृत्तेः। साधुत्वान्याव्यापकस्य व्याकरणशब्दवाच्यत्वाच्च॥ उच्यते। यः शब्दो यत्रेश्वरेण संकेति
तः स तत्र शक्तः साधुरित्युच्यते। परं शब्दार्थयोः स्वाभाविकसंबन्धवत् अस्माकमीश्वरसंकेतस्य नियामकत्वात्। य
था च याकाचिद्दोषधीनकुलदच्छस्य घासाविषहति तथा प्रतिपादकत्वाविशेषेऽपीश्वरसंकेतात् एव शब्दा धर्मो
पयोगिनः स्वभावात्। तद्विषया एव साधुभिर्भाषितव्यमित्यादिविधयः। ईश्वरसंकेतज्ञानं च व्यवहाराद्युपमानात्॥

श॰भू॰
९२
93

सिद्धार्थपदसामानाधिकरण्यादाप्तोपदेशात्। यववराहेंद्वादिशब्देषु वाक्यशेषात्। कोशात्। तदभियुक्तैः पाणिन्यादिप्र
णीतशब्दानुशासनाच्चेति। तेषां साध्वसाधुविभाग एवाधिकारात्। तदुक्तं तत्रत्वमभियोगात्स्यादिति। अभियुक्ताश्च येयत्र य
न्निबद्धप्रयोजनाः। तत्रत्यगुणदोषाणां ज्ञाने चाधिकृता मता इति। न च साधुत्वे सिद्धे शब्दानुशासनं तस्मिंश्च सति तद्धीरि
त्यन्योन्याश्रयः। एवंएवं शब्दान्वाख्यानेन साधुत्वमवगम्योत्तरोत्तरेणानुशासनप्रवृत्तेः। सर्गादौ भगवत्प्रणीतव्याकरण
द्वा साधुत्वनिश्चयेनोत्तरव्याकरणप्रवृत्तेः। विश्रामविश्रमशब्दयोश्च साधुत्वे पाणिनिचंद्रगोमिव्याकरणविरोधेपि विश्र
मे विकल्प इष्यत इति महाभाष्यकारवचनादुभयमपि साधु। ननु मैत्रादिशब्दानामीश्वरसंकेतस्याभावादसाधुत्वे यज्ञा
दौ न प्रयोगः स्यादिति चेत्। द्वादशेऽहनि पिता नाम कुर्यादित्यनेन सामान्यतस्तेषामपीश्वरसंकेतितत्वात्। ननु वासुदेव
शब्दस्य वसुदेवापत्ये व्याकरणोक्तत्वात्तत्रैव साधुत्वं न त्वाधुनिकसंकेतविषये। अथ तत्र प्रकृतिप्रत्ययविभागक
ल्पना कर्तव्या। तर्हि गावीशब्देपि तथात्वं संभवतीति तस्यापि साधुत्वं स्यादिति चेत्। न। द्वादशेऽहनि पिता नाम कुर्यादिति
सामान्यतस्तस्येश्वरसंकेतितत्वेन साधुत्वनिश्चयात्। व्याकरणस्य तद्विशेषविषयत्वमस्तु न तु गावीशब्दे तथा। अथ शा
स्त्रकारसंकेतितशब्दादृश्यादिषु संकेतितगोशब्दाद्वा कथमर्थनिश्चयः। शक्तितदारोपवृत्त्यन्तराणामभावादिति चेत्। न। एम॰
येन शब्देनोपस्थितेऽर्थे गवादिसंकेतग्रहः तस्मादेव गवादिपदेन स्मारितादर्थप्रत्ययात्। चिह्नात्स्मारितपदादिवेति संप्र २

दायः॥ ॥अत्रवदंति नेश्वरसंकेतितत्वं साधुत्वं तस्य निष्पत्तियौगिकत्वेन सर्वत्र सर्वस्य साधुत्वापत्तेः॥ नापि यः श
ब्दो यत्रेश्वरेण संकेतितः स तत्र साधुः गोणलान्तणिकयोरसाधुत्वापत्तेः। केवलयोः प्रकृतिप्रत्यययोर्बोधितिग्राम
गामइत्यादेश्च साधुत्वापत्तेः। बाधतीत्यादेश्च समुदायस्यासंकेतितत्वे बाधतइत्यपि साधुर्न स्यात् प्रकृतिप्रत्यययोः
प्रत्येकं संकेतात् अन्वयस्य प्रत्येकशक्तिलभ्यत्वात् प्रत्युत प्रकृतिप्रत्ययसमुदायो न साधुः स्यात् समुदायस्यासंके
तितत्वात् ईश्वरसंकेतमज्ञात्वापि व्याकरणव्युत्पाद्यत्वमवधार्य साधुत्वव्यवहाराच्च। शक्तत्वं साधुत्वमित्यपि न ई
श्वरसंकेतोक्तदोषग्रासात्॥ ॥अत्रोच्यते व्याकरणव्युत्पाद्यत्वं साधुत्वं यः शब्दो यस्मिन्नर्थे व्याकरणेन व्युत्पादितः
स तत्र साधुः। अत एव गावीशब्दो व्याकरणोक्तव्युत्पत्त्यायमर्थं प्रतिपादयति ऽतत्र साधुः। असाधुरन्यत्र नाम्नामप्य
णादयो बहुलमित्यादिना व्युत्पादनात् केवलप्रकृतिप्रत्यययोर्बोधवृत्ति ग्रामगामइत्यादेश्च न तद्व्युत्पाद्यत्वं तत्प्रयोग
स्यानभिधानान्निषेधात् गोणलान्तणिकयोश्च यथाप्रतिपादकत्वं तद्व्युत्पादनमपि तत्रेति तयोरपि साधुत्वं तस्माच्छ
क्तत्वपीश्वरसंकेतितत्वाद्यज्ञात्वापि साधुत्वव्यवहारात् ज्ञात्वाप्यव्यवहाराच्च न तत्साधुत्वं किंतु व्याकरणपरिगृहीतत
तदभावाभ्यामेव प्रामाणिकानां साध्वसाधुव्यवहारान्नावेवेतो न च साधुशब्दव्युत्पाद्यत्वमेव व्याकरणत्वमित्यात्माश्र
यः। शब्दगुणदोषविद्भिरभियुक्तैः प्रकृतिप्रत्ययादिकल्पनपाशब्दान्वाख्यापकशब्दस्य व्याकरणत्वात् न च साधुत्वे

श॰सू॰
९४
94

सिद्धे व्याकरणकर्तृत्वाद्यत्वमित्यन्योन्याश्रयः। पूर्वं एवं व्याकरणे साधुत्वमवगम्योन्नीतो न व्याकरणेन व्युत्पादनमित्युक्तत्वा
त्॥ ननु तद्बीजजनकतावच्छेदिकायाः शक्तेः तद्बीजजनकताविषयके श्वरसंकेते व्याकरणेन व्युत्पादनमित्युक्तत्वात्॥ ननु
तद्बीजजनकतावच्छेदिकायाः शक्तेः तद्बीजजनकताविषयके श्वरसंकेतस्य वा ज्ञानादर्थप्रत्ययइत्यावश्यकत्वात् लाघवा
च्च तद्बीजजनकत्वज्ञानमेवार्थप्रतीतौ हेतुरस्तु किं शक्तेरीश्वरसंकेतस्य वा ज्ञानेन· अन्यथा मीमांसकस्य शक्तिज्ञानाद
र्थप्रत्यये नैयायिकस्येश्वरसंकेतज्ञानादिति व्यभिचारे लौकस्यापि कारणता न स्यादिति। अत एव लौकिकानां शक्ती
श्वरसंकेतज्ञाने पि वृद्धव्यवहारादर्थज्ञाने शब्दस्य जनकत्वमवधार्यो ग्रे शब्दादर्थप्रत्ययः। न चैवं लक्षणोच्छेदे गंगापदा
द्विलंबिताधीर्न स्यादिति वाच्यं· लाक्षणिकस्याननुभावकत्वात्। तथात्वे पि वा तीरज्ञानजनकत्वेन ज्ञानस्य न तीरज्ञापकत्वं
किंतु प्रवाहज्ञानजनकत्वेन लाघवात्। अथ ज्ञानजनकता ज्ञाप्यसंबंधाधीना· प्रत्यक्षादौ तथादर्शनादिति संबंधत्वेन
शक्तिसंकेतयोरन्यतरसिद्धिरिति चेत् न· तद्बीजजनकत्वेन ज्ञातत्वस्यैव संबंधत्वात्· न च तद्बीजजनकत्वमेव न गृह्येत संबंध
ज्ञानं विनेति वाच्यं। तत्रापि ज्ञानजनकत्वज्ञानेनैव प्रत्यक्षादिवत्तत्रापि संबंधत्वेन शक्तिकल्पनात्। अन्यथान्योन्या
श्रयः। संबंधज्ञाने सति जनकत्वज्ञानं तस्मिन् सति संबंधज्ञानात्· यथा पूर्वं तद्बीजजनकत्वज्ञानं यत्र भवति तत्र पूर्वसंबंधो रा॰म॰
स्त्येव चेति चेत्· अस्त्येव। पूर्वं पूर्वं यां तद्बीजजनकत्वेन ज्ञातत्वस्य पूर्वमपि सत्त्वात्। एतावतापि शक्तिः संकेतो वा संबंधोस्तु। ९६

तथात्वेपि तद्बोधस्यानार्थप्रत्यायकत्वं गौरवात् किंतु तद्विषयधीजनकत्वज्ञानस्यैव। एवं च यद्धीजनकत्वेन ज्ञातं यत्पदं यदनु
भवं जनयति तस्यैव तत्र शक्तत्वं न तु शक्तिरीश्वरसंकेतो वेति॥ ॥उच्यते देवदत्तादिपदादर्थबुद्धौ संकेतज्ञानस्य कारण
त्वावधारणादन्यत्रापि तत्कल्पनात्। न त्वस्माच्छब्दादयमर्थो बोद्धव्य इति यस्तत्र संकेतस्तद्बोधं विना ततस्तदर्थप्रत्ययः।
संकेतज्ञानात्पूर्वं तद्धीजनकत्वस्य तद्ग्रहस्य चासंभवात्। सादिपदे तथा अनादिपदे त्वर्थप्रत्ययस्यान्यथापि भावान्न तत्क
ल्पनेति चेत्। न। पदत्वस्यैव प्रयोजकत्वसंभवति तत्र विशेषणगौरवात्। संकेत एव मुख्या वृत्तिः। तात्पर्यनिर्वाहकत्वात्।
अन्वयप्रतियोग्युपस्थापकत्वाच्च॥ ॥लक्षणा च वृत्यंतरं। यत्र वाच्यान्वयानुपपत्त्या वाच्यसंबंधोपस्थापितेन वाक्यार्था
न्वयः। यथा गंगायां घोष इत्यत्र गंगापदस्य तीरे। तदुच्यते। वाच्यस्यार्थस्य वाक्यार्थे संबंधानुपपत्तितः। तत्संबंधवशप्राप्त
स्यान्वयाल्लक्षणोच्यते इति॥ अथ तीरे शक्तिरेव। शक्तिग्राहकस्य व्यवहारस्य मुख्यलक्षणसाधारण्यात्। पदानां संभूय वा
क्यार्थान्वयबोधकत्वकल्पनेः। पदजन्योपस्थितेः शक्तिसाध्यत्वात्। अन्यथा न तत्र शाब्दत्वं तात्पर्यं वा तयोः शक्यनियत
त्वात्। किंच। तीरे यदि तात्पर्यमवधृतं तदा तन्निर्वाहकत्वेन शक्तिरेव कल्प्या। कॢप्तत्वादित्यलक्षपदवन्नानार्थतैव युक्ता।
न त्वकॢप्तवृत्यंतरकल्पनमिति॥ उच्यते। गंगापदस्य लक्षणीयतीरादिसहस्रेषु प्रत्येकं शक्तिकल्पने तद्रूपलक्षणी
येषु प्रत्येकं वृद्धव्यवहारापेक्षणात्। तथा च गौरवमननुभवश्च। लक्षणा तु शक्यसंबंधरूपैका लक्षणीयविषय
कवृद्धव्यवहारानपेक्षा चेति लाघवात्सैव युक्ता। न च गौरवमपि न्याय्यं प्रामाणिकत्वात्। लक्ष्यत्वाभि[illegible]तान्वयबोधस्य

श॰ सू॰
८५
९६

शक्तितद्ग्रहं विनानुपपत्तेः। लक्षणायाः क्वापि कारणत्वाग्रहादिति वाच्यं। शक्तिं विनापि तीरान्वयबोधोपपत्तेः। तथाहि व्युत्प
न्नो निरूपितासत्त्वभावस्य गंगायां घोषः प्रतिवसतीति वाक्यं श्रुत्वा विमृशति। इदं प्रमाणमाप्तोक्तत्वात् संभवति चेदं तथा यु
था वस्त्रेण पिधेहीत्यत्र कर्मतापन्नद्वारेऽध्याहृते योग्ये द्वारपदे स्वार्थान्वयो बोध्यते तथा शक्त्या गंगापदस्मारितमुख्यार्थ
स्मारिते तीरे योग्याकांक्षिते द्वारपदैः स्वार्थान्वयबोधोऽत्रापि संभवतीति। ततो मुख्यार्थस्मारिते तीरे घोषादिपदैः स्वार्थान्वय
बुद्धिरुत्पद्यते। एवं च तीरान्वितवाक्यार्थबुद्धिः तीरप्रतिबद्धवृद्धव्यवहारदर्शनेन विनैव तावत्तत्पदानां स्वतो योग्यान्वि
तस्वार्थप्रतिपादनत्वाद्वाक्यार्थबुद्धिः तीरस्य प्रागेव क्लृप्तत्वात्। एवं च तीरस्यानुभवयोः शक्यसंबंधज्ञानादेवो
पपत्तेर्न शक्तिः। स्वार्थप्रतिसंबंध एव च लक्षणा। पश्चात्पर्यायगंगासंबंधितीरप्रतिपत्तये नेनाप्तेन गंगापदं प्रयुक्तमिति ता
त्पर्यधीर्जायते। गंगास्मारिततीरान्वयबोधश्च न तात्पर्यज्ञानमपेक्षते। न्यायत एव तीरस्य प्रथमं वाक्यार्थान्वयबोधोपपत्तेः
। अथवा निश्चिते वा स्वार्थसंबंधिनोऽन्वये तद्विशेषज्ञानार्थं तदपेक्षास्तु न चैतदर्थमपि योग्यतादेरेव तद्विशेषलाभा
त्। अन्यथाऽनुपस्थिते विशेषे तात्पर्यस्यापि ज्ञातुमशक्यत्वात्। शक्तिस्मारितशक्यसंबंधो वा तज्ज्ञाना शक्यसंबंधिस्म
ति वा लक्षणा। उभयथापि लक्षकपदस्थले स्वे तात्पर्यज्ञानं लक्षणामामनुपयुक्तमेव। उक्तन्यायेन शक्त्यापर्यायाऽप्र
कयस्थले तात्पर्यग्रहस्य वैमेव क्लृप्तकारणादुपपत्तेः। शक्योपस्थापितार्थे शक्ततात्पर्याद् लक्षणेति तात्पर्याद्धि वृत्तिरि एव॰
ति च लक्षणास्थले लक्ष्येव स्तुतः तात्पर्यमस्तीत्येवं पां। नन्वेवं तात्पर्यानपेक्षणे यत्र नीरं तीरं वान्वययोग्यं तत्र कदाचित्तीरान्व

योपिबोध्यतेतिचेत्तन्नाशक्योपस्थितेयोग्याकांक्षितेतेनैवान्विताभिधानमितिकृत्यत्तेःशक्यत्वंतुतीरस्याप्यात्तत्से
व॰इतःपरंपदेस्तीरान्वितस्वार्थान्वयाभिधानात्तदेवदृद्धव्यवहारादिदर्शनंविनैवतीरादौलक्षणेतिस्थितम्॥अथ
वा॰गंगायांघोषःप्रतिवसतितमानयेतिवाक्यानंतरंप्रयोक्तृस्यतीरेनितघोषानयनेप्रवृत्तिमुपलभ्यकिंतीरेपिगंगा
पदस्यशक्तिरुतस्वार्थेनसंबंधात्स्मारितेतीरेतात्पर्यमात्रंतीरान्विताभिधानंतुपदांतरैरेवमप्ययोग्यार्थपरत्वाभा
वेनप्रमाण्यान्नाद्युक्तत्वोपपत्तेः इतिविचिकित्सन्बालः तीरादौवशक्तिः तथासत्येकार्थसंबंधिषुबहुष्वेकपदस्यब
हुशक्तिरेवंपदांतरेष्वपितेषुतेषुचशक्तिग्रहार्थंदृद्धव्यवहारापेक्षाच॰तथाचगौरमतः स्वार्थसंबंधिनितीरादौतात्प
र्यमात्रंलाघवादितितत्रतत्रलक्षणामेवकल्पयति॰यस्यचैवंविमर्शःप्रथमलाक्षणिकपदश्रवणान्नज्ञायतेतत्प
तत्रशक्तिबुद्धवपियदालक्षणाव्युत्पत्तरज्ञानंपूर्वोक्तन्यायेनज्ञायतेतदाप्रथमावगतशक्तिज्ञानमप्रमात्रमइ
तिकल्पयतिलाघवादिति।अन्यत्रतुयस्यप्रथमावगतस्यसत्यत्वकल्पनेतदुपपादककल्पनंचतल्लाघवादेवअन्यत्र
तुनतथा॰अन्यत्रतुनतथा॰अन्यथासंबंधिषुसहस्रेष्वपिशक्तिकल्पनाप्रसंगात्‌ एवंचलक्षणास्थलेयस्यप्रयोगस्यव्य
वहारादाद्यव्युत्पत्तिस्तीरादौसप्रयत्नोरनीरघोरन्वयबोधयोग्यप्रयोगोनीरव्यवहारात्प्रभृतितदातत्रैवशक्तिःतीर
धीस्तुप्रयोगस्यलक्षणावशान्नमतदनाकलनात्तत्रशक्तिज्ञानंभ्रमइतिकल्पयति॰यत्रतुभयात्तुगतमेकमव

श०मू०
९६

96

छेदकमस्तिऽमयत्रप्रयोगश्चतत्रोभयत्रशक्तिरेवनलक्षणातुल्यव्यवहारादुत्पन्नेरेकत्रमुख्यत्वोपमर्देहेत्वभावात्।
यत्रतुनतथातत्रतत्रानेकार्थत्वमेवास्त्वादिपदे तावदन्यतरत्वंतत्राप्यनुगतमस्तीतिचेत्‌ न। तावदन्योन्याभाववदन्यत्वंहि
तत्‌· नचतावदन्योन्याभाववदन्यत्वेनरूपेणतावतामर्थानांपदादुपस्थितिः किंतुपाशकत्वादिनैव· किंच· यदितीरे
पि शक्तिस्तदानतीरमात्रे किंतु गंगातीरेतथाचविशिष्टशक्तौविशेषणेशक्तिरावश्यकी· नागृहीतविशेषणा
न्यायात्‌। अथलक्षणापक्षेयथाप्रवाहेणोपलक्षणेनव्यावृत्ततीरविशेषस्यान्वयोनतीरांतरस्य· तथाप्रवाहोपल
तीरे क्षिततीरेशक्तिरस्तु। नतुप्रवाहेपीतिचेत्‌। गंगापदशक्तेःप्रवाहस्यशक्यत्वेनविशेषणत्वसंभवतिनोपलक्षणत्वं·
विशेषणत्वासंभवेसत्येवोपलक्षणत्वादतः प्रवाहएवशक्तिः। किंचतीरशक्तावुपलक्षणत्वंप्रवाहस्यनशक्यता
वच्छेदकत्वंनापिधेनुपदेगोत्वस्येवशक्यत्वचुपाधिकएवव्यवहारः एवंसचशक्यत्वभावोपपाद्यइति॥ तन्न। लक्षणाया
मक्लृप्तत्वाबालः प्रयोजनस्यतीरान्वितानयनादिव्यवहारस्यपन्न अन्यत्रदृष्टशक्तिंकथंनकल्पयेत्‌· अथलक्षणा
यातीरत्वेनोपस्थितौतीरांतरान्वयोपिस्यात्‌। गंगातीरत्वेनोपस्थितौयुगपद्वृत्तिद्वयविरोधः। गंगोपस्थितेः शक्ति
साध्यत्वादितिचेत्‌। लक्षणाधीनतीरस्मृतेर्नगंगासंबंधित्वेनतीरंविषयः। किंतुयद्व्यक्तितोगंगासंबंधितद्वतीरत्वे एम०
नपरिचीयते· संबंधिदर्शनात्स्मृतेस्तत्संबंध्यविषयत्वात्‌। यथापदहस्तिदर्शनात्पदार्थहस्तिपकस्मृतेर्नपदह

स्तिविषयत्वम्· अत एव तीरान्वितवाक्यार्थबोधेपि न गंगासंबंधित्वेन तीरं विषयः· अपि च· गंगायामित्यादिपदानां
आसत्तेर्नैकत्वेन प्रामाण्यात् संभूय पदप्रतिपाद्यान्वयबोधकत्वरूपमेकवाक्यत्वमवगतं। मुख्यार्थस्यायोग्य अति
योग्याकांक्षितस्यामुख्यार्थोपि पदप्रतिपाद्यः कल्प्यते· अन्यथा एकवाक्यत्वभंगप्रसंगात्· न चापदार्थेनैव यो
ग्यतादिमतान्वयबोधकत्वमस्त्विति वाच्यं· गंगापदवैयर्थ्यप्रसंगात्· प्रतिपाद्यता च लक्षणीयस्य कॢप्तेनैव स्वा
र्थसंबंधेन न तु शक्त्या· गौरवात्· तदन्वयबोधश्चेतरपदेनैव· शक्त्या पदोपस्थापितस्य पदेनान्वयो बोध्यते।
अन्यत्र तथादर्शनादिति चेत् न। लाघवेन पदोपस्थापितत्वस्यैव तंत्रत्वात्। यद्यपि लाक्षणिकपदस्य पदांतरे
ण न संभूय प्रतिपादकत्वमननुभावकत्वात्। लक्ष्यस्मृतौ च न संभूयकारित्वं· अत एव नैकवाक्यत्वमपि· तथा
पि घोषादिपदानां समभिव्याहृतपदप्रतिपाद्यान्वयबोधकत्वमवगतं तत्र च न लक्षणां विनेति तां कल्पयति· य
त्सामान्यतो गंगादिपदार्थान्वयो ज्ञात इति तद्ज्ञातार्थं परंपरया गंगादिपदस्यापि तेजीरादौ लक्षणा कल्प्यत इति त
न्न· प्रथमं गंगापदार्थान्वयबोधकाभावात्· अन्वयबोधेपि लक्षणया गंगापरिचिततीरस्य घोषान्वयबोधेपि गं
गाया अन्वयाबोधाविषयत्वेन तदन्वयस्य लक्षणात्। यत्तु गंगायां घोष इत्यादेरेकवाक्यत्वं पदस्यापि तान्वयबो
धकत्वरूपमवगतं तच्च यद्यपि गंगापदार्थस्य साक्षाद्घोषाधारत्वायोग्यत्वान्न संभवति तथापि गंगासंबंधितीरे।

श्र॰मू॰
९१
५१

योग्ये घोषान्वयात्तीरावच्छेदकतया गंगापदार्थस्य घोषान्वयादेकवाक्यत्वं संभवति । अत एकवाक्यत्वस्य सामान्य-
तोवगतपदार्थान्वयस्य वा न्याय्यं गंगापदस्मारितस्वार्थस्मारिततीरे वृत्तितां लक्षणा कल्प्यते । तयोरन्यथाभंगप्रसं-
गादिति । तन्न । तीरस्य घोषान्वयबोधेपि गंगापदार्थस्य तदन्वयबोधाविषयत्वात् । अथ गंगातीरत्वेनोपस्थिते घो-
षान्वयबोधाद्भवति गंगायास्तीरावच्छेदकतयाऽन्वयबोधविषयत्वमिति चेत् । गंगापदाद्गंगातीरयोर्युगपदुपस्थि-
तौ युगपद्वृत्तिद्वयविरोधात् । न त्वभयोः शक्त्या लक्षणया वोपस्थितिः संभवति । अथ लक्षणत्वाभावाल्लक्ष-
कपदेन स्वार्थसंबंधित्वेनैव लक्षणीयतीरादेरुपस्थितिः । अन्यथा तीरमात्रान्वयप्रसंगात् । तथा च लक्षणायेव
स्व गंगोपस्थितिरिति चेन्न । गंगासंबंधात्तीरस्मृतिः संभवति । न तु गंगासंबंधस्यात तत्संबंधेतत्संबंधाभावात् । अत एवं
संबंधिज्ञानादपरसंबंधिस्मृतेरपरसंबंधिसंबंधाविषयत्वनियमः । यथा पदहस्तिज्ञानात्पदार्थहस्तिपकयोः स्मृ-
तौ न पदहस्तिनोर्विषयत्वं । पदे पदस्य हस्तिनि हस्तिनः संबंधाभावात् । सामान्यतो गंगापदार्थान्वयो नावगम्यते ।
बोधकाभावात् । लक्षणा च शक्तार्थायं परया शक्यासदृशस्यान्वयपरोपस्थितिरूपा । शक्यसंबंधाद् शक्यासदृशा-
न्वयपरोपस्थितिरूपा वा । अशक्यासदृशान्वयप्रतियोग्युपस्थितिहेतुः स्वशक्यसंबंधो लक्षणेति परमार्थः । उप एम॰
स्थितिहेतुर्हि वृत्तिः । शक्तिवत् । एवं च कृतेन स्वार्थसंबंधेन लक्ष्योपस्थितिसंभवान्न तदर्थं शक्तिः । न चैवं एतत्पुरुषादौ

षष्ठ्यर्थलक्षणायाव्याप्तिः एतत्संबंधे राजसंबंधाभावादिति वाच्यं शक्येन राज्ञा स्वसंबंधं विना संबंधस्य लक्षयितुमशक्य
त्वात् अन्यथातिप्रसंगात् न चात्माश्रयः राजनिरूपितपुरुषसंबंधस्य [illegible] संबंधसंबंधस्य च भिन्नत्वात् अथैवं मुख्य
परत्वे लक्षणा स्यात् शक्यसंबंधस्य तीरादौ सत्त्वादिति चेत् न लक्षणायां तात्पर्याभावेन शक्तेरिव मुख्यपरत्वे लक्षणाया
मूलकत्वात् वृत्तेस्तात्पर्यानुरोधित्वात् तदुक्तं तात्पर्यार्थं द्विवृत्तिर्न तु वृत्तेस्तात्पर्यमिति गोपदादेश्च स्वपरत्वे लक्षणैव न श
क्तिः स्वार्थसंबंधे नैवोपस्थितिसंभवात् अन्ये तु पदानामौत्सर्गिकमर्थपरत्वं तदभावे स्वपरत्वं गामुच्चारयेदित्यादौ
वाच्याविवक्षया पदेन स्वान्विताभिधानादिति तन्न वृत्तिं विना स्वपरत्वस्यानिर्वाहात् अन्यथा वृत्त्यंतरोच्छेदः तस्मादेव
तदन्विताभिधानसंभवात् ननु पदश्रोत्रजनितप्रत्यक्षोपस्थितस्वपरत्वमेव पदानां तदन्वितस्वार्थाभिधानं तु पदांत
रेण न च वृत्त्युपस्थापिते नैव स्वार्थान्वयः पदेनाभिधीयत इति व्युत्पत्तिः किंतूपस्थितमात्रेण लाघवात् अध्याहारे
तथैव स्वीकारात् लक्षणादीनां चोपस्थितिरूपतया तद्द्वारा वान्विताभिधानोपयुक्तत्वात् लक्षणात्वाद्यसाधारणरू
पेण तद्रूपयोगे परस्याव्यभिचारादिति चेत् न वर्णानामयोग्यपदेन पदगोचरप्रत्यक्षस्याभावात् भावे वायोग्यतादिविमर्शा
पेक्षया प्रत्यक्षस्यातीतत्वात् किंचैवं गामुच्चारयेत्यादौ विकृतगोपदमेवोच्चारणकर्म स्यात् तस्यैव श्रोत्रप्रत्यक्षत्वात् न त्व
विकृतं गोपदं एकमुच्चारयेदित्युक्तौ च न प्रकृतपदं तदुच्चारणकर्म स्यात् किंत्वेकमुच्चारयेति पदमेव सत्यन्वपयोग्य

श·म· समभिव्याहृते प्रकरणादेरनुपयुक्तत्वात्। अपि चाध्याहारे अत्रत्युपस्थापितेनान्विताभिधानमस्तु· तस्यापदार्थत्वेपीतरपदेना
९८ न्विताभिधानात्। अत्र तु स्वरूपस्य पदार्थत्वमवश्यं वाच्यं तच्च दृश्यंतभावादेव· अन्यथा गामुच्चारयेत्यादौ द्वितीयार्थावाकी
98 यं स्यामेत्यादौ च प्रत्ययो न स्यात्। अर्थशून्यत्वेनाप्रातिपदिकत्वात्। तस्माच्च प्रत्ययानुशासनात्। किंच· गोरस्तीत्यादावुभ
यपरत्वसंभवे स्वपरत्वमेव स्यात्। स्वस्य प्रत्यक्षेणाशीघ्रमुपस्थितत्वात्। प्रत्यक्षमूलकस्मृतपदार्थस्यान्वयो भवतीति चेत्।
न· उक्तदोषात्। पदार्थस्मरणस्यान्वयपरत्वानिश्चयात्। तत्परसन्निधानस्यान्विताभिधानोपयोगात्। किंच विभक्त्युपनी
तान्वयप्रकारकर्मत्वादिनानुपस्थितेः आकांक्षादिविरहेण क्रियाद्यन्वयो न स्यात्। स्मृतपदे द्वितीयार्थकर्मत्वान्वय इति
चेत्। नाविभक्तेः प्रकृत्यर्थान्वितस्वार्थान्वितस्वार्थान्वयबोधकत्वस्य व्युत्पत्तिसिद्धत्वात्। अत एव गां गायामित्यत्र सप्तम्य
र्थान्वयार्थं तीरे लक्षणा· अन्यथा स्मृत्युपनीततीरस्यान्वयेनान्वयबोधसंभवे लक्षणोच्छेदः। नन्वेवं ज्ञबगडदशमाहेत्या
दौ निरर्थके लक्षणा· अन्यथा स्मृत्युपनीततीरस्यान्वयेनान्वयबोधसंभवे लक्षणोच्छेदः। नन्वेवं ज्ञबगडदशमाहेत्यादौ
निरर्थके लक्षणा न स्यात्। स्वार्थसंबंधाभावात्। प्रत्यक्षोपस्थितेः स्मृतेर्वा स्वरूपे क्रियान्वय इति दूषितमेवेति चेत्। न· न
हि ज्ञबगडदशमाहेत्यत्र समुदाये क्रियान्वयः समुदायस्योच्चारणाभावात्। किंतु दशानंतरं श्रुतक्रियापदेन प्रत्येक राम·
वर्णे स्वार्थान्वयबोधनात्प्रत्येकवर्णस्य प्राक्तत्वेन स्वार्थसंबंधादेव स्वस्मिन् लक्षणा· स्तोभेष्वेवं स्वार्थसंबंधाग्रहे चस· ९८

रूपोपस्थितिः शक्तिभ्रमान्निरर्थकस्य स्वरूपे शक्तिरेव। इत्यंतरं विनोपस्थितेः शक्तिसाध्यत्वादित्यथार्थः। अन्ये तु प
दस्य स्वबोधकत्वं वृत्तिं विनैव स्वभावात्। अन्येन त्वन्यबोधनेऽतिप्रसंगाद्वृत्तिकल्पनं। स्वबोधकत्वे तु न तथा। यथा घ
टस्य स्वबोधकत्वं स्वसंबंधं विनैव। एवं च स्वबोधितस्वस्मिन्न विभक्त्यर्थान्वयोपि। न च पदस्य स्वभावात् स्वबोधकत्वे स
र्वत्र स्वबोधप्रसंग इति वाच्यं। इत्यादिपदस्वार्थान्वयानुपपत्त्यादेः सहकारित्वात्। यथा घटस्य स्वबोधकत्वे इंद्रियसं
बंधापेक्षेति। यत्तु स्वार्थसंबंधिनि तात्पर्यं लक्षणा। तत्तात्पर्यं च तत्प्रतीतीच्छयोच्चरितत्वमिति तन्न। लक्ष्यस्मृत
ये लक्षणा सा च स्वार्थसंबंधज्ञानादेवेत्यधिकस्य व्यर्थत्वात्। संबंधधीः स्मृतिहेतुः कॢप्ता न तु तात्पर्यधीरपि तस्या
लक्ष्यस्मृतिजन्यत्वेनान्योन्याश्रयप्रसंगात्। तात्पर्यज्ञानं च लक्षणाबीजानुपपत्तिज्ञानेन्वयानुभवे चोपयुक्तम्। अ
तोऽशक्योपस्थितिस्तद्धेतुशक्यसंबंधो वा लक्षणेति तत्स्वरूपे तात्पर्यमनुपयुक्तमेव। लक्ष्ये तात्पर्याद्धि लक्षणा तात्पर्या
द्धि वृत्तिरिति च लक्षणास्थले वस्तुतः लक्ष्ये तात्पर्यमस्तीत्येवं परं। किं चैवं मुख्येपि तत्तात्पर्यकत्वमेव वृत्तिरस्तु किं शक्त्या।
तात्पर्यमेव वृत्तिं विना न निर्वहतीत्युच्यत इति चेत् तर्हि लक्षणापि तन्निर्वाहकैव न तु तदेव। अपि च तात्पर्यानुपपत्ति
र्लक्षणाबीजं न तु तदनुपपत्तिरेव तद्बीजं। विरोधात्। अत एवाशक्ये तात्पर्यं न लक्षणा। वृत्तेस्तात्पर्यनिर्वाहकत्वात्। ता
त्पर्यनिर्वाहकं संबंधमपश्यत आप्तस्य तात्पर्याभावात्। अतः शक्त्या शक्यसंबंधेन वा पदादर्थज्ञानादित्यभिप्रा

श·मू·
८९
११

येणपदप्रयोगोऽनं न तु तात्पर्यादेवायममुमर्थं ज्ञास्यतीति बुध्या तात्पर्यमात्रस्य शक्तित्वे सर्वस्य सर्वत्र प्रयोगो नेनार्थोऽवेदः स्वा
स्वार्थसंबंधेनेदं पदमर्थं बोधयिष्यतीति वक्तुरभिप्रायो लक्षणा· तदभिप्रायज्ञानं विना श्रोतुर्लक्ष्यानुपस्थितेरित्यन्ये· त
न्न· अयं त्वभिप्रायः प्रयोगनिमित्तं· यथा शक्त्यामुमर्थं बोधयिष्यतीत्यभिप्रायः। न तु स एव लक्षणा· गौरवात्· किंतु स्वार्थ
संबंध एव लक्षणा। तत्र एव लक्ष्योपस्थितिसंभवात्। शक्तेस्तत्रैवोपयोगात्· तस्य चाबाधकत्वे स्वार्थसंबंधेनायं बोधयिष्य
तीत्यभिप्रायवान् वक्ता नापेक्ष्यः स्यात्। तात्पर्यधीस्त्वन्वयबोधे हेतुरित्युक्तं· शक्यसंबंधश्चाविनाभाव एव· यष्टीः प्रवेशय
मंचाः क्रोशंतीत्यत्रापि प्रवेशनक्रोशनसमये यष्टिधरमंचस्थपुरुषयोर्यष्टिमंचाविनाभाव एव· एवं छत्रिणो गच्छंति
काकेभ्यो दधि रक्ष्यतामित्यत्राजहत्स्वार्थलक्षणायामपि छत्रिणस्तत्समूहांतर्गतेनाछत्रिणोऽविनाभावः काकस्य कुक्कु एत
रादीनां दध्युपघातकत्वेन युगपदुपस्थितिसमये काकस्य कुक्कुराद्यविनाभावः। यत्र तु उपघातकत्वेन काकमात्रमुप
स्थितं न कुक्कुरादि तत्र काकपदे दध्युपघातकलक्षणापि नास्ति· दध्युपघातकत्वेनात्र किं तादृक्षणो पदेशानर्हत्वादिति
संप्रदाय·। वस्तुतः शक्यसंबंध एव लक्षणा· अतिप्रसंगश्च संबंधस्याविनाभावरूपत्वेपि तात्पर्यादन्वयनियमः शक्यसं
बंधमात्रलक्षणापक्षेपि· लक्षणाबीजं तात्पर्यानुपपत्तिः पदस्य वृत्तिं विना तस्य तात्पर्यानिर्वाहात् न तु शक्यान्वययोग्य एम०
त्वं लक्षणाबीजं· यष्टीः प्रवेशयेत्यत्राजहत्स्वार्थायां च स्वार्थान्वययोग्येपि लक्षणासत्वात्। तात्पर्यानुपपत्तिस्तत्रापि। न ८८

८९

च्छेतात्पर्यं विना लक्षणानुदयादिति संप्रदायः। वस्तुतोऽन्वयपदस्य प्रमाणशब्दस्य मुख्येऽन्वयायोग्यत्वमेव लक्षणाबीजं। गं
गायां घोष इत्यादौ पूर्वोक्तन्यायेन लक्ष्ये तात्पर्यग्रहात्। एवं मुख्यार्थस्यान्वयायोग्यत्वज्ञानेन लक्षणोपपादनात्। अस्तु
वा तत्रापि लक्ष्ये तात्पर्यग्रहस्तथापि मुख्येऽन्वयानुपपत्तिरेव लक्षणाबीजं प्रथमोपस्थितत्वात्। तात्पर्यानुपपत्तिं विनैव
लक्षणाबीजत्वसंभवाच्च। यष्टीः प्रवेशयेत्यत्राजहत्स्वार्थायां च मुख्यान्वयानुपपत्तिरेव। तथाहि। येन प्रकरणादिना प्रवेश
येत्यस्य भोक्तृप्रवेशनपरत्वं यातीत्यस्य यष्टितदितरसंघटितसमूहगमनकर्तृपरत्वं च ज्ञातं तादृशप्रवेशनगमनयोरन्वययोग्य
वे वयष्टिच्छत्रिणोः। अथ प्रकरणादिनैवेतरपदवद्यष्टिच्छत्रिपदयोरपि लक्ष्ये तात्पर्यमवगतमतस्तदनुपपत्तिरेव लक्षणाबी
जमिति चेत्। न। लक्षणातः पूर्वमवश्यं लक्ष्योपस्थितौ तत्र तात्पर्यग्रहे वा मानाभावात्। लक्षणायाश्चान्यथापि संभवात्। भा
वे वा तत्रास्त्वन्वयानुपपत्तिस्तथाप्यन्वयानुपपत्तिरेव लक्षणाबीजं। गंगायां घोष इत्यादौ क्लृप्तत्वात्। ननु पदार्थविशेषस्य
तौ तदन्वयबोधे वा प्रकरणादेः सहकारिता। न तु तात्पर्यग्रह इति चेत्। न। शब्दसहकारित्वेऽननुगमात्। तात्पर्यग्रहे तु त
द्व्याप्यत्वेनानुगमः। तात्पर्यव्याप्यत्वग्रहे तात्पर्यग्रहः संभवत्येव। बहुव्रीहौ चित्रगोपदार्थस्यान्वययोग्यत्वादन्यपदार्थे
तात्पर्यानुपपत्तिर्लक्षणाबीजमिति चेत्। न। तत्रापि चित्रगोस्वाम्यानयनपरानयनपदार्थान्वयानुपपत्तेः। यद्यपि लक्ष
णायामयोग्यत्ववन्निराकांक्षत्वमप्यस्ति। तथाहि गंगायां घोष इत्यत्र घोषस्य निविडधाराकांक्षित्वेन न प्रवाहाकांक्षा।
एवं समूहगमनस्य छत्रिमुनाकांक्षाते ह्युपरिसमाप्तेः। तथापि नोभयं निमित्तमन्यतमत्वेनापि लक्षणासंभवात्। ने

श॰प्र॰
१००
100

कैकमेव निमित्तमननुगमात्. अन्वयानुपपत्तिर्व्याप्यत्वेन चाननुगमे अन्वयानुपपत्तिरेव लक्षणाबीजं तस्या उभयत्र सत्त्वात्.
लक्षणास्थले च स्मृतशक्यान्वयानुपपत्तिज्ञानानंतरं गंगापदात् पुनः शक्यस्मृतिः। स्मृतशक्यात् स्वसंबंधेन तीरस्मृतिः
शक्तेः शक्यस्मृतौ प्रवाहस्य स्वसंबंधेन तीरस्य स्मृतौ सामर्थ्यावधारणात्। अतः शक्यस्मारिततीरस्येतरपदार्थान्वयबोधः।
अत एव लाक्षणिकं पदं नानुभावकं अन्वयप्रतियोगिनस्तीरस्य ततोऽनुपस्थितेः। अन्वयप्रतियोग्युपस्थापकत्वेन पदानाम
न्वयानुभावकत्वात्। न च गंगापदं स्वशक्यसंबंधेन प्रथमं तीरस्मृतिरेव पुनः शक्यस्मारणे गौरवादिति वाच्यम्। पदस्य स्वशक्यसं
बंधेनान्वयप्रतियोगिस्मारकत्वाकल्पनात्। न चैवं हैवं तत्कल्पनं। क्लृप्तकारणकस्मृतिद्वयादेव तीरोपस्थितिसंभवादिति प्राञ्चः
।। तन्न. गंगापदात्तीरानुपस्थितौ सप्तम्यर्थान्वयानुपपत्ते विभक्तेः प्रकृत्युपनीतस्वार्थान्वयबोधकत्वव्युत्पत्तेः। प्रकृत्यर्थोप
स्थाप्यस्यापि विभक्त्यर्थान्वयेऽतिप्रसंगोऽननुभवश्च. न च प्रकृतितात्पर्यविषयेन स्वार्थान्वयबोधकत्वं विभक्तीनां गौरवात्.
एवं च प्रकृत्यर्थे विभक्त्यर्थान्वयनियमानुरोधकसंबंध एव लक्षणावृत्तिः स्मारकत्वेन कल्प्यते. न चैवं गंगापदात्साक्षात्तीरोपस्थि
तौ शक्तिः तां विनापि तदुपस्थितिसंभवात्। न चैवमन्वयप्रतियोग्युपस्थापकत्वे पाऽतरप्रदवल्लाक्षणिकमप्यनुभावकं स्यादि ग
ति चेत्। इतरपदैः सह स्वशक्यान्वयानुभावकत्वेनैव क्लृप्तादितरपदाद्देवतीरानुभवसंभवेन लाक्षणिकस्याननुभावक
त्वात्। स्वशक्यान्वयानुभवे पदानां कारणत्वावधारणात्। अथ यदि गंगापदं नान्वयबोधकं तदा गंगापदाभावेन संभू एम॰
यान्वयबोधकत्वलक्षणं नैकवाक्यत्वं न वा प्रमाणत्वं। तथा च तदुभयरक्षार्थं न लक्षणाकल्पनं न च पंरपरयाऽसाक्षाद्वा १००

न्वयप्रतियोगिस्मृतिहेतुत्वेनैव प्रमाणत्वं स्मृतेरप्रमात्वात् । न चैकवाक्यत्वं वाक्यभेदे ऽपि पदार्थस्मृतिसत्त्वात् श्रुति
चेत् । न । अप्राप्तोत्कलत्वाद्गंगापदान्तर्भावेनान्वयबोधकत्वलक्षणं नैकवाक्यत्वेन [illegible] प्रयोजकत्वं सम्भूयान्व
यबोधप्रयोजकत्वं च स्पष्टीकृतं तदुभयमपि तीरोपस्थितिद्वारा निर्वहति । नन्वास्तु लाक्षणिकमप्यनुभावकं । न चैवं ज्ञा
ने शक्तिः शक्यत्वादिति लक्ष्यमपि शक्यं स्यात् । प्रवाहशक्तत्वेन ज्ञातादेव गंगापदात्शक्तिं विनापि तीरानुभवसं
भवात् । यथापरैर्मान्यते शक्तत्वेन ज्ञातादेव व्यक्त्यनुभवसंभवात् । यथा चास्माकं पदार्थशक्तत्वेन ज्ञातादेवान्वया
नुभवसंभवात् । न व्यक्त्यन्वययोः शक्तिरिति । कश्चित्तु योगात्त्वार्थान्वयसंभवे ऽपि रूढिपूर्विका लक्षणा । यथा मंडपं भो
जयेत्यत्र रूढ्यर्थगृहविशेषस्यान्वययोग्यत्वाद्रूढ्यर्थगृहसंबंधिज्ञानं लक्षणया मंडपपदेन क्रियते न तु योगान्मं
डपानकर्त्तुरिति मीमांसकाः । ननु रूढिपूर्विका लक्षणा न युक्ता श्रौतार्थपरत्वे संभवति लक्षणायाश्चान्याय्यत्वात्
रूढ्या योगापहारेणान्वयमुख्यतेति चेत् । अपहारो हि न यौगिकार्थस्मृतिः । स्मारकसंबंधस्य शक्ते रूढ्यर्थ इव यौगिके ऽपि
सत्त्वात् । नापि योगार्थस्य प्रथमस्मृतिः । यदैव हि समुदायेन स्वार्थस्मरणं तदावयवैरपि स्मारकसमुदायज्ञाने ऽवय
वानामपि विषयत्वात् । प्रत्युतावयवैरेव प्राग्घ्रस्वार्थस्मरणं । अवयवज्ञानस्यैकत्वात्समुदायज्ञानस्य विलंबे ऽपि यदा
रूढ्यर्थे न लक्षणया स्वार्थसंबंधिस्मरणं तदा यौगिकार्थस्मरणं वाच्यं । तथा चौत्सर्गिकान्वयाभिधायकत्वानुरोधाद्यौ
गिकार्थान्वयबोध एवास्तु । नापि स्मृतस्याप्यवयवार्थस्यान्वयबोधबहिर्भूतत्वमपहारः । योग्यतादिबलादवयवार्थे

शा॰मू॰
१०१

101

स्यान्वयबोधः स्यादेवा न तु रूढ्यर्थस्योपयोगपत्वात्। नापि लक्षणया स्मारितस्यार्थस्य लाक्षणिकस्यानभिप्रायकत्वात्।
यव अर्थमंडपशब्दस्य गृहविशेषे प्रयोगदर्शनाद्यौगिकत्याच तदनिर्वाहात् तत्र समुदाये शक्तिकल्पनात्। तथा च मंडपान
कर्तरि सत्यपि प्रयोगस्यादर्शनात्तत्रावयवशक्तिकुंठनमपि कल्प्यं। कार्यानुरोधित्वात्कल्पनायाः। अन्यथा नेकार्थ
रूढ्यात्नादिपदादिव कचिन्मंडपानकर्तुरवगमः स्यात्। बहुव्रीहौ समुदायशक्तावपि नावयवशक्तीनां कुंठनं। अ
वयवार्थे लंबकर्णादौ प्रयोगप्राचुर्यात्। कुंठनस्य प्रयोगाभावकल्प्यत्वात्। एवं च मंडपादिपदे ऽवयवशक्तेः कुं
ठितत्वाद्रूढ्यर्थस्योपस्थितपदस्य परंपराप्यवाक्यार्थे प्रतीत्यन्वयायतत्सूर्विकात् लक्षणेति चेत्। न। तत्प्रेपयासिद
य ध्यान्नेति। सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति वाजिनमित्यत्रामिक्षापाकोत्पत्तिशिष्टत्वेन विश्वेदेवदेवताकत्वं वाज
मन्तमामिक्षारूपं येषामस्तिते विश्वेदेवा एवेति चतुर्थ्यंतवाजिपदयोगेनाभिक्षारूपान्नयोगिनां विश्वेदेवा
नामुपस्थितेर्वाजिनस्यापि विश्वेदेवदेवताकत्वमेवा न तु वाजिपदाद्रूढ्योपस्थितानामश्वानां वाजिनं देव
तात्वमिति सिद्धांतः स न स्यात्। रूढ्यायोगापहारादश्वानामेव तत्र देवतात्वापत्तेः। न त्वत्र लंबकर्णादिपदवद्वा
तिपदस्य विश्वेदेवेषु प्रयोगप्राचुर्यमस्ति। अथान्वयप्रकारो विभक्त्योपनीयते। सा च यतः समभिव्याहृतात्स्या
न्वयं बोधयति। विभक्तिश्च समुदायात्। अतः समुदायोपनीतस्य रूढ्यर्थस्यैवान्वयबोधो नान्वयवोपनीतस्येति एम॰
चेत्। न। पंकजनिकर्तुरिव मंडपानकर्तुरप्यन्वयबोधसंभवात्। नान्वयवार्थानां परस्परमन्वययोग्यतादिसापेक्ष १०१

तयाविलंबितः। रूढ्यर्थधीस्तु न तथेति चेत्। अस्तु तावदवयवार्थस्यान्वयधीर्विलंबिता न तु स्मृतिरूपापि सा
तथा। सा चान्वयबोधोपयोगिनी। एवं च यथा पंकजमानयेत्यत्र प्रथमं दार्थवाक्यार्थान्वयधीस्तत्रैव तत्तदन्वि
ततन्मधी।। तदनु च परंपरा तथा रूढतत्तन्मानि पंकजपदार्थान्वयधीः। कार्यान्वितव्युत्पत्त्यनुसारात्। न तु सिद्ध
पंकजन्मकर्तृत्वानां प्रथममन्वयधीः। तथा मंदपादिपदेप्यस्ति यदि च सिद्धार्थेप्यन्वयधीर्योग्यतादिवशात्
तदा रूढ्यर्थावयवार्थानां स्मृतावयवार्थान्वयबोधसंभवाद्रूढ्यर्थान्वितबोधस्य तत्र पदतदर्थस्मरणाकांक्षायोग्य
तादिज्ञानसापेक्षितया विलंबितत्वात्। अथ यावत्स्तु वर्णोच्चैकाशक्तिस्तावत्तास्मृतिरप्येकैव कार्यबलात्कल्प्यते
अत एकदा स्मृतसमुदायनिष्ठाशक्तिस्मृतिः शीघ्रा अवयवशक्तीनां तु स्मृतिर्भिन्नत्वेन कतिचिदंशस्मृतावितिवि
लंब इति चेन्नाय थाहि मंदपसमुदायगोचरा एका स्मृतिस्तथा मंदपादिपंदिपदविषयापीति न कश्चिद्विशेषः। अतः
कथं योगाद्रूढेर्बलवत्त्वमिति।। उच्यते।। यदा मंदपपदाद्रूढविशेषस्मृतिस्तदैव मंदपार्थोपस्थितिः।। तद्वृत्तं पिबत्यर्थ
स्य तदनंतरं प्रत्ययार्थस्य ततो मंदपानकर्तृत्वेन ज्ञातस्य स्मृतिः। तदेवं रूढियौगिकयोर्बलाबलं शीघ्रविलंबितधी
कृतमेवा तथा च रूढ्यर्थस्य शीघ्रोपस्थितत्वाद्बलवत्त्वमौत्सर्गिकं। यत्र तु प्रकरणादिना यौगिकार्थस्य शीघ्रं धीवि
षयता तत्र रूढेर्योग एव बलवान्। यथाग्निर्वसुभिः सोमो रुद्रैरिंद्रो मरुद्भिर्वरुणा आदित्यैर्बृहस्पतिर्विश्वैर्देवैरित्य
त्र विश्वदेवपदायोगेन सकलदेवप्रतिपादकात् प्रकरणबलेन संनिहितावसुरुद्रमरुदादित्यरूपसकलदेव

श०म०
१०२
102

तानां शीघ्रं बुद्धिस्थता प्रकरणादवयवार्थसंस्कारोद्बोधात् । न तु मुख्यो माऽस्त्वप्रमितिः गुणो मुख्यादपि विश्वेदेवपदा
र्थधीः । एवं सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्रामिक्षारूपान्नस्योत्पत्तिशिष्टविश्वेदेवताकत्वज्ञानं वाजिभ्य इ
ति चतुर्थ्यंतपदादश्वे रूढ्यादपि वाजमन्नं तदस्यास्तीति व्युत्पत्त्या वाजिनामामिक्षारूपान्नयोगिनां विश्वेदेवानामेव प्र
करणाच्छीघ्रमुपस्थितिर्न तु रूढ्याश्वानां । तेन वाजिनस्यापि विश्वेदेवा एव देवताः प्रतीयंते । ननु रूढेर्बलवत्वादत्रापि
रूढ्यर्थधीर्वस्यादिति चेत् । न । द्वयोरुपस्थितयोरनुपस्थितयोर्वा रूढिर्बलीयसी । अत्र तु प्रकरणाद्रूपदे त्वं ततो [illegible]
स्कारेण योगार्थ एव ज्ञाने संभूतसामग्रीकः । ननु शाब्दानुभवे शब्दकारिता स्मृतिरुपयोगिनी न तु प्रकरणादिकारितापि स्है
ऽपूर्वलज्ञानस्य अन्विताभिधानानुपयोगादिति चेत् । न । प्रकरणादुद्बुध्यमानसंस्कारस्यैव शब्दादप्युद्बोधसंभवात् प्रकर
णसहकृतशब्दादवयवार्थसंस्कारोद्बोधादवयवार्थस्मृतिः शब्दकारिता शीघ्रा । न तु रूढ्यर्थस्मृतिः । तत्र संस्कारोद्बो
धकाभावात् । न चैवं लोकेपि मंडपादौ योगस्य बलवत्वान्न लक्षणेति वाच्यं । प्रकरणाद्यभावे हि शीघ्रं रूढ्यर्थप्रतीतौ रू
ढिपूर्विका लक्षणा । प्रकरणादिसत्वे मंडपादिपदेपि योगार्थ एव बलवानिति तत्र न लक्षणा । अत एव रूढिच्युतके प्र उ
करणादिसत्वे न रूढ्यर्थास्मरणात् न लक्षणा । किंतु योग एव । तस्मात् प्रकरणाद्यभावेपि रूढ्यर्थस्य शीघ्रमुपस्थितत्वा
त् रूढिपूर्विका रूढ्यर्थसंबंधिनि लक्षणा । प्रकरणादिसद्भावे च रूढ्यर्थस्य न स्मृतिरिति योगार्थ एवेति तत्वं । न चैवं प्रो ए
क्षणमिस्रत्रोक्षीथा यस्मास मभागयोगिनां त्रयाणां प्रकृतत्वात् योगस्यैव बलवत्वं स्यात् । ननु रूढिपूर्विकानुवाके लक्ष

तिवाच्यं। तत्र रूढौ योगे च प्रकरणस्य तुल्यत्वात् रूढ्यर्थस्य शीघ्रोपस्थितत्वेन च बलवत्वात् रूढिः पूर्विकालत्तगौव ॥
अत्र वदंति भवतु रूढ्यर्थस्य शीघ्रमुपस्थितिस्तथापि तस्यायोग्यत्वादनन्वये योगार्थोपस्थापितावयवार्थस्यैव योग्यत्वा
दिसत्वादन्वयबोधो भवेत् प्रतिबंधकस्य रूढ्यर्थान्वयबोधस्याभावात् लाक्षणिकार्थस्य विलंबोपस्थितिकत्वात् न
न्वेवं मंडपं भोजयेत्यत्रावयवार्थपरत्वे ऽवयवार्थानां प्रथममेकमन्विताभिधानं तदनंतरं तस्य वाक्यार्थे अपरमन्विता
भिधानमिति तात्पर्यगौरवं रूढिपूर्वलक्षणायां तु एकत्रान्विताभिधाने तात्पर्यमिति लाघवमिति चेत् न सामग्रीस
त्वेनावयवार्थानामन्वयबोधस्य गौरवेणापहस्तयितुमशक्यत्वात् लक्षणायां तात्पर्यग्राहकस्याभावात् भावे वान्यायाभि
धानस्य व्यर्थत्वात् ननु रूढ्यर्थस्य प्रथममुपस्थितत्वात्तस्य च लक्षणायां परंपरापि प्रयोजकत्वं संभवेत् त्यागायोगाद्वा लक्षि
तस्यान्वयबोध इति चेत् तर्हि प्रथमं रूढ्यर्थस्मरणसमकालं वा स्मृतस्य मंडपाद्यवयवार्थस्य बाधकं विनाऽन्वयपरित्यागार्थं तत्त्या
गोऽपि बीजोचितः तत्त्यागहेतो रूढ्यर्थान्वयबोधस्याभावात् अथ रूढ्यर्थोपस्थितिरेव योगार्थान्वयबोधप्रतिबंधिका
न तु रूढ्यर्थान्वयबोधो गौरवात् यत्र च प्रकरणादिना योगार्थान्वयबोधः तत्र रूढ्यर्थस्मृतिरेव नास्ति संस्कारोद्बोध
कस्याभावात् किंतु प्रकरणाद्युद्बुद्धमवयवार्थस्य संस्कारोद्बोधेनावयवार्थस्यैव स्मृतिरिति चेत् अवयवार्थस्य स्मृ
तौ अन्वयबोधे वा रूढ्यर्थस्मृतेः प्रतिबंधकत्वे मानाभावात् मंडपपदस्य गृहपरत्वे रूढ्यर्थस्यान्वयबोधायोग्यत्वात्

श॰ म॰ स्मृतस्याप्यवयवार्थस्य नान्वयबोधः कृत्तकारणायोग्यतादिविरहात् तान्न तु रूढ्यर्थस्मृत्याप्रतिबंधात् । इह तु रूढ्यर्थस्यायो-
१०३ ग्यत्वान्नान्वयबोधः । अवयवार्थस्य योग्यतादिसामग्रीसत्त्वादन्वयबोधो भवत्येव । यदि च रूढ्यर्थस्मृत्याप्रतिबंधान्ना-
वयवार्थस्य स्मृतिरन्वयबोधो वा तदा त्वन्मते लंबकर्णमानयेत्यस्य तद्गुणसंविज्ञाने बहुव्रीहौ अवयवार्थान्वयबोधो न
103 भवेत् । किं तु रूढ्यर्थस्यान्यपदार्थस्यैव । तस्माद्रूढेर्योगापहारिता रूढियोगविरोधे मंदपादौ । न तु लंबकर्णादौ । अप-
हारोप्ययमेव । यद्योग्यतया रूढ्यर्थस्यान्वयबोधो भवति नावयवार्थस्य अयोग्यत्वात् । न तु योग्यतादिमतोप्यन्वयबोधो-
ऽवयवार्थस्य न भवति । अनन्वितरूढ्यर्थस्मृत्याप्रतिबंधात् । तस्मान्न न्याय्यत्वमस्या रूढिपूर्विकालक्षणा । किं तु यत्र रूढ्य-
र्थसंबंधिनि तात्पर्यं मानांतरादवधार्यते तत्र रूढिपूर्विकालक्षणा । रूढ्यर्थसंबंधिविशेषज्ञापनार्थं विशिष्टतात्पर्य-
ग्रहस्यावश्यकत्वात् । यत्र तु प्रकरणाद्यभावान्न योगाबलवत्त्वं तत्र रूढ्यर्थस्य शीघ्रमुपस्थितत्वान्नैव पदार्थान्वय-
इति रूढेर्योगापहारः । उपपदधातुप्रत्ययार्थानां स्मृतिस्ततस्तेषां योग्यतादिज्ञानं ततोऽवयवार्थान्वयबोध इति यौगिका-
र्थान्वयस्य विलंबितोपस्थितिकत्वात् । यथा वर्षासु रथकार आदधीतेत्यत्र रथकारशब्दात् रूढ्या जातिविशेषवत् प्रतीतेश् :
शीघ्रत्वात्तस्यैवाधानं प्रतीयते तदर्थं तदनुकूलविद्याप्रयुक्तिरपि तस्याक्षिप्यते । न तु रथकारशब्दस्य योगोपस्थितरथक- ण॰ म॰
रणयोग्यान्यतोलब्धविद्यत्रैवर्णिकपरत्वं । विद्याप्रयुक्तिकल्पनातो रथकारशब्दे योगसंकोचमात्रस्य लघुत्वादिति युक्तं । १०३

शब्दार्थानुरोधेन हि कल्पनानां तु कल्पनाभयेन शब्दार्थत्यागः। प्रमाणशब्दमूलकत्वेन फलमुखगौरवस्यादोषत्वात्। अत एव
क्रतुविशेषे हिरण्मयीं प्राकाशावध्वर्यवे दक्षिणां ददातीति श्रूयते। तत्राध्वर्युशब्दात् तद्व्यक्त्विग्विशेषस्य शीघ्रमुपस्थितौ
तस्यैव प्राकाशस्य तल्लक्षणः संबन्धो विधीयते ददातीत्यनुवादः तेन क्रतुदक्षिणायामध्वर्युभागमात्रबाधः। अन्येषामृत्वि
जां प्राकाशसंबन्धाभावात् क्रतुदक्षिणायामन्वयः। यदि चाध्वर्युं युनक्तीति योगोपस्थितक्रत्विङ्मात्रे प्रकाशसंबन्धविधिः
स्यात्तदा सर्वेषामेव क्रत्विजां क्रतुदक्षिणाबाधो नाध्वर्युभागमात्रस्य। न चैवं स्वर्गकामो यजेतेत्यत्र स्वर्गकामशब्दात् स्वर्गकाम
त्वेन स्त्रीशूद्रयोरप्युपस्थितेरधिकारो बोध्येत· शब्दार्थानुरोधादिघाप्रयुक्ति।पितयोर्ण क्षिप्येतेति चेत्; न· स्त्रीशूद्रयोर्विद्या
निषेधात् स्वर्गकामपदस्य स्त्रीशूद्रेतरपरत्वं· तेन स्वर्गकामपदार्थे संकोचमात्रेन बाधः। संकोचे तु न शब्दार्थहानं। स्वर्गकाम
त्रैवर्णिकस्याधिकारबोधनात्· रथकारशब्दे च पदार्थमात्रस्यैव बाधः स्यात्। यद्यपि संकोचोप्येकदेशबाध एवेति सोपि न यु
क्तः तदंशे शब्दार्थहानप्रसंगात्। तथापि सामान्यबाधादेकदेशबाध एव लघुरिति॥ ॥लक्षणा च पदवृत्तिः वृत्तित्वात् श
क्तिवत्। ननु गंभीरायां नद्यां घोष इत्यत्र नैकपदे लक्षणा तीरस्यानदीत्वाद् गंभीरत्वाच्च मुख्यलक्ष्ययोरनन्वयापत्तेः। नापि
पदद्वये प्रत्येकं शक्यासंबन्धिनो गंभीरनदीतीरस्याप्राप्तिप्रसंगात्। तस्माद् गंभीरनद्योरन्वयबोधानंतरं वाक्येन स्वज्ञाप्य
गंभीरनद्यास्तीरं लक्ष्यते वाक्यार्थगंभीरनदीसंबन्धिनिस्तीरत्वेन प्रतीतेः। न च वाक्ये शक्त्यभावात्तत्संबन्धं विना न लक्षणा

श·मू· तिवाच्यं स्वज्ञाप्यसंबंध एव हि तत्र लक्ष्यस्मृतौ तंत्रं न तु संबंधविशेषः शक्तिगौरवात् ज्ञाप्यश्च शाक्यवद्वाक्यार्थोपि घोषनघो
१०४ रन्वयबोधात् गंभीरनघोरन्वयबोध एवेति चेत् न प्रथमोपस्थितत्वेन गंभीरनघोरन्वयबोधस्य शीघ्रत्वात् घोषत
दनुपपत्तिज्ञानाधीनतया तीरस्मृतिविलंबेन नदीघोषयोरन्वयबोधे विलंबात् न चैवं वाक्यभेदः एकतात्पर्यान्विताभिधाना
104 तरानुकूलत्वेन वाक्ये एकवाक्यतावदेकवाक्यत्वादिति ॥ अत्र नव्याः वाक्यस्य ज्ञाप्याभावेन ज्ञाप्यसंबंधाभावान्न लक्षणा
अथान्वयबोधकं वाक्यं पदानि हि संभूयार्थं बोधयंति न प्रत्येकमात्रमिति चेत् न पदं हि स्वार्थान्वयं बोधयति न तु समूह
समूहे स्वार्थाभावात् न च पदे मुख्यासत्प्रवृत्तिर्बोधकता न चेतरपदावच्छिन्नेतरपदे गौरवात् किंच गंभीरायां नद्यामित्यत्र वि
भक्तिं विनान्वयबोधाभावाद्विभक्तिं च तत्र विना वाक्यत्वं तथा च लक्ष्ये च विभक्त्यर्थान्वयो न स्यात् लक्षकार्थस्य लक्ष्येऽनन्वय
नियमात् नापि गंभीरायां नदीति विभक्तिशून्ये लक्षणा अन्वयस्य तदज्ञाप्यत्वात् विभक्तिश्च प्रकृतिनदीगतस्वार्थमभि
दध्यात् न गंभीरनदीगतं तस्या अप्रकृतित्वात् वस्तुतः पदलक्षणायैवोपपत्तौ न वाक्ये लक्षणा तथा हि गंभीरनद्योरन्वयबो
धोत्तरं नदीपदं गंभीरपदं वा स्वज्ञाप्यगंभीरनद्यास्तीरं लक्षयति न वाक्यं न च विनिगमकाभावेन पदयोर्लक्षणाद्वयं वा
ज्ञा१२ क्येप्येकं लक्षणेति युक्तं पदे क्लृप्तत्वाद्वाक्यापेक्षया लघुत्वाच्च पद एव लक्षणा अन्यथा विनिगमकाभावाद्व लक्षणाद्व एम०
यं पदे वाक्ये चापरा लक्षणेति गौरवं स्यात् अन्वयबोधपूर्विका प्रत्येकं पदद्वये लक्षणा वाक्ये लक्षणेति परिभाषापदवा। १०४

क्ययोर्भिन्नत्वात्। वस्तुतो गंभीरपदात् स्वार्थपरंपरासंबंधेन लक्ष्योपस्थितौ विलंबान्नदीपदात् स्वार्थसाक्षात्संबंधेन शी
घ्रं तीरोपस्थितिसंभवात् तत्रैव लक्षणा। अथ पदपांशुना यूपमनक्ति सप्तमं पदं गृह्णातीत्यत्र पदस्य ग्रहणकर्मानर्हत्वे
न ग्रहणकर्मार्हे ष्ठेवनसाधनत्वेन निरूढे पुंसामक्रयार्थानीयमानैकहायन्युपलक्षितसप्तमपदपांसुषु सप्तमान्वि
तपदपदार्थान्वयबोधके वाक्ये लक्षणेति चेत् न। अत्रापि हि सप्तमपदयोरन्वयबोधानंतरं सप्तमपदार्थान्वितस्वार्थप
दबोधके पदे पदे लक्षणा न तु वाक्ये। अत एव पुरोडाशकपालेन तुषानुपवपतीत्यत्रावघातजनितव्रीहितुषाणां पुरो
डाशकपालेनोपवापो विधीयते पुरोडाशश्रपणप्रयोजनत्वेनोपस्थिते च कपालेनोपवापप्रयोजनाकांक्षा। न त्वमु ९
कप्रयोजनस्य किं प्रयोजनमित्याकांक्षा भवति। अन्यत्र विनियुक्तत्वेन शास्त्रादन्यत्राकांक्षाविरहेण विनियोगाप्रतीति
रेव हि विनियुक्तविनियोगविरोधः। अत आकांक्षोत्थापनार्थं पुरोडाशकपालवाक्यस्य पुरोडाशार्थाधिष्ठाने आश्रय रता
स्वरूपे लक्षणेति निरस्तं। अत्रापि हि पुरोडाशपदेन पुरोडाशश्रपणप्रयोजनकाधिष्ठानमाश्रयस्वरूपं लक्ष्यते। कपाल ला
पदं च तत्र कपालत्वविशिष्टबोधकमिति पुरोडाशपदे लक्षणा न पुरोडाशकपालवाक्ये॥ ॥ ननु बहुव्रीहौ चित्रगुमा
नयेत्यत्र वाक्यार्थं चित्रगोः स्वामिना संबंधितयाऽन्यपदार्थस्य प्रतीतेर्वाक्य एवान्यपदार्थे लक्षणा। अथ चित्रा गावो यस्ये
ति विग्रहवाक्यस्थलुप्तयत्पदस्मृतमन्यपदार्थं बोधयति यथा दधिपयसेत्यादौ लुप्तद्वितीयास्मृतकर्मत्वं। अन्यथा तत्र

धारितिचेन्न स्वतन्त्रपसरान्संबंधतयोपस्थितेरन्यपदार्थेऽत्र १

ए०म० कर्मत्वलक्षणापत्तेः। अज्ञातविग्रहस्य बहुव्रीहौ शक्तिभ्रमादन्यपदार्थस्य कर्मत्वेनोपस्थितिं विनाऽनयनान्वयानुपप
१०५ त्तेः। राज्ञः पुरुषमानयेत्यत्र राज्ञ इव विशेषणत्वेनोपस्थिते क्रियानन्वयाच्च। विभक्तिशून्ययत्पदाद्युपस्थितेश्च चि
त्रगुपदेन क्रियया वान्वयो न स्यात्। अन्वयप्रकारबोधकविभक्त्यभावात्। न च चित्रा गावो यस्य इति विग्रहे स्वत प्रथमा
105 ह तय इति पदानुपस्थितिः। प्रथमान्तेनानन्वयात्। प्रथमान्तविग्रहे तदभियुक्तैर्बहुव्रीहेः साधुत्वनिषेधाच्च। न च चित्रा नयना
गावो यस्य तमानयेति तत्पदार्थस्य क्रियान्वय इति वाच्यं। तथाऽननुभवात्। चित्रगोसंबंधिनमानयेति हि वाक्यार्थ
धीः। विग्रहे तत्पदस्याप्रयोगेणास्मृत्यभावाच्च। यत्तदोर्नित्याभिसंबंधात्तत्पदस्मरणमिति। चेत्। न। अध्याहारापत्तेः र्थ
।तथापि चित्रगुमानयेत्यत्र विभक्तिस्तत्पदार्थगतं न स्वार्थमुपनयेत्। किंतु गोगतमेव। विभक्तेः प्रकृत्यर्थगतस्वा
र्थबोधजनकत्वव्युत्पत्तेः। अत एवान्यपदार्थोपस्थापकेन समासेनोक्तार्थत्वात् यत्पदाप्रयोगः। अन्यथा यत्प
दप्रयोगोऽपि स्यात्। न च यत्पदाप्रयोगः साधुत्वार्थमेव। स्त्रीप्रत्ययस्यैवेति वाच्यं। गोस्त्रियोरुपसर्जनस्येत्यनुशा
सनबलात्तत्रैव साधुः। यत्पदे तूक्तार्थत्वं विनाऽसाधुत्वापत्तेर्निमित्तान्तरमस्ति। बहुव्रीहेर्नित्यसमासत्वेन वि
ग्रहाभावाच्च। चित्रा गावो यस्येति वाक्यं बहुव्रीहेरन्यपदार्थकथनाय। अन्यथा चित्रगुमानयेत्यत्र प्रक्रान्तप्रक्रमस्य ए०म०
मानयोरभावे यत्पदार्थव्यवहारो न स्यात्। न च चित्रापदं चित्रगोस्वामित्वलक्षकं तत्र गोपदार्थानन्वयात्। नापि गोप १०५

गो दं लक्षकौ स्वामिनि चित्रापदार्थानन्वयापत्तेः तस्माद्वाक्यार्थस्य चित्रगोसंबंधितयाप्युरूपस्य प्रतीतेर्बहुव्रीहौ वा
क्य एव लक्षणेति । वार्त्तिमेव तत् । वाक्ये निरर्थकतया स्वार्थसंबंधाभावेन लक्षणानिषेधात् । अत्रापि पदलक्ष
णायैवोपपत्तेश्चात् तथाहि । चित्रगोपदयोरन्वयबोधानंतरं गोपदं चित्रगोस्वामिलक्षकं । स्वलक्ष्यचित्र
गोसंबंधेन तत्स्वामिस्मारकत्वात् । चित्रापदं गवान्वितस्वार्थबोधकतया मुख्यार्थमेवाकर्त्तृत्वान्न्वयबो
धानुकूलत्वेन न वाक्यभेदोपि । नचैवमेकस्य गोपदस्यान्यपदार्थवृत्तौ समासो न स्यात् । अनेकस्यान्य
पदार्थे वर्त्तमानस्य समासानुशासनादिति वाच्यं । चित्रापदस्यापि परंपरयान्यपदार्थबोधकत्वा
त् । अस्तु वा चित्रापदेपि लक्षणा । चित्रापदार्थस्य परंपरया चित्रगोस्वामिसंबंधात् । नचैवमेकपदलक्ष
णायामितरपदवैयर्थ्यं इतरपदमहिम्नैव विशेष्यस्य लक्षणीयत्वात् । नच्चैवं वाक्यार्थबोधके
पदलक्षणाद्वयमेव वाक्यलक्षणा । पदवाक्ययोर्भिन्नत्वात् । यत्तु चित्रापदेन गोपदसंन्निधानात्
व स्वार्थसंबंधिनी गौर्लक्ष्यते । चित्रगवं स्वामी लक्ष्यत इति लक्षितलक्षणयान्यपदार्थधीरिति । तन्नाए
कपदार्थलक्षणतो लक्षितलक्षणाया जघन्यत्वात् । भूवादयो धातवः चैत्रादीन्नभोजयलंबक
र्णामानयेत्यादितद्गुणसंविज्ञानबहुव्रीहौ चैत्रादेर्विशेषणस्यापि कार्यान्वयात् । क्रियावाचित्वमि प्रगदे:

शा·सू· मंत्रितत्वादिरूपेणाजहत्स्वार्थलक्षणेति संप्रदायः। आद्यः। अनन्तमित्यदपदार्थविभागस्य चित्रगुसमु
दायस्यान्योन्याचित्तावयवार्थसंबंधिन्यन्यपदार्थे शक्तिः कल्प्यते। अतो नानेकार्थत्वं। नवावयवार्थत्याग
१·६ गो नवातद्गुणसंविज्ञानेलक्षणा। योगरूढिस्वीकारात्। अवयवार्थाज्ञाने तत्संबंधिनो ज्ञानात्। मंद
पादौ तु अवयवार्थनिरपेक्षे वाग्दृविशेषधीरित्यनवयवार्थे समुदाये रूढिः। तथाहि। अस्ति चित्र
106 ग्वादिपदस्यान्यपदार्थे तात्पर्यमेव तत्रैव च तात्पर्यानियमतोन्यपदार्थस्य प्रतीतेः। तदन्याप्रतीतेश्च
नियततात्पर्यविनाऽन्यपदार्थे बहुव्रीहेर्नियमतो लक्षणापि न स्यात्। तस्मान्नियततात्पर्यनिर्वाहिका
बहुव्रीहेरन्यपदार्थे शक्तिरेवा लक्षकस्य लक्ष्ये तात्पर्यानियमात्। तात्पर्यानियमे च क्वचिद्बहुव्रीहेरन्य
पदार्थपरत्वमपि न स्यात्। अथ क्वचिद्बहुव्रीहेरन्यपदार्थे तात्पर्यमपि न संभवति· यथा यजमानपंचमा ऋ
त्विजो लोहितोष्णीषा ऋत्विज इत्यत्र यजमानपंचमत्वलोहित्ययोर्विधेयत्वेन प्राधान्यान्नैतत्परतयाऽन्य
पदार्थे तात्पर्याभावात्। एवं क्वचिन्नोकेपीति चेत्। तर्हि तत्रान्यपदार्थे तात्पर्याभावात् तदनुपपत्तिं वि
ना लक्षणाविरहादन्यपदार्थे शक्तिरेव। अन्यथा तत्रान्यपदार्थबुध्यनुदयापत्तिः। न च तत्रान्यपदा शा०
र्थबुद्धिरभिमानिकैव न भवतीति युक्तं। अक्लिष्टिः सामानाधिकरण्यानुभवात्। तस्माद्बहुव्रीहेर्नियम
१·६

तोन्यपदार्थबुभुत्सयात्तत्र शक्तिरेवायद्यपि शक्यस्य शक्येन तात्पर्यनियमो लक्ष्ये विक्वचित्तात्पर्यात् तथापि श
क्ये तात्पर्यमौत्सर्गिकं । क्वचिदन्यत्र प्रयोगादपोद्यते । बहुव्रीहौ चान्यपदार्थादन्यत्र प्रयोगाच्छक्यत्वे पिता
त्पर्यनियमो भवति । ननु केवललाक्षणिकस्याभावाद्बहुव्रीहौ शक्यनियमे परि... वादन्यपदार्थ एव
शक्य इति । तन्न । शक्तिं विनापि तात्पर्यनिर्वाहात् ॥ ॥ अत्र ब्रूमः । बहुव्रीहौ न वाक्ये लक्षणा किंतु पदे
। तस्य च नान्यपदार्थे तात्पर्यनियमः । क्वचिच्छक्येपि तात्पर्यात् । अथास्तु बहुव्रीहिस्थपदद्वयस्यान्यपदा
र्थे तात्पर्यनियमः । ततो नान्यत्राप्रयोगनियमात् । अतस्तन्निर्वाहिका पदद्वये शक्तिः सैव च वाक्ये । वाक्य
स्य पदद्वयात्मकत्वादिति चेत् । अस्तु तर्हि बहुव्रीहिस्थपदे निरूढलक्षणा तथैवान्यपदार्थेषु
तात्पर्यनियमोपपत्तौ समुदायशक्तौ मानाभावात् । ॥ नवीनास्तु बहुव्रीहावन्यपदार्थस्य लक्ष्यत्वे
नियमतो लक्षणीयपदलिंगता न स्यात् । लक्षकपदस्य लक्षणीयपदलिंगग्राहकत्वनियमात् । स्वलिंगा
परित्यागाच्च । अतोऽन्यपदार्थे शक्तिरेवेति । ॥ तत्र ब्रूमः । बहुव्रीहेर्लाक्षणिकत्वेन विशेष्यपदत्वनि
~~यमात् स्वलिंगापरित्यागाच्च । अतोऽन्यपदार्थे शक्तिरेवेति । ॥ तत्र ब्रूमः । बहुव्रीहेर्लाक्षणिकत्वे वि~~
शेष्यपदत्वनियमात् नियमतो लक्षणीयविशेष्यपदलिंगत्वात् समानाधिकरणस्य समानवि

श०मू० भक्तिकस्य च विशेषणपदस्य विशेष्यपदलिंगत्वं नियमात्। भिन्नविभक्तिकयोरिव भिन्नलिंगयोरपि सामानाधि-
करण्येन विशेषणविशेष्यभावाभावात्। अजहल्लिंगे तु लिंगनियमानुशासनान्न तथा। अन्यपदस्य लिंगग्र-
१०७ हणातीत्यत्र विशेषणविशेष्यपदस्वभावकत्वमेव नियामकं। अथ नियमतो विशेष्यपदलिंगत्वे विशे-
षणपदस्य बहुव्रीहौ शक्तिं विना किं न निर्वहतीति चेत् न। विशेषणपदत्वमेव हि विशेष्यपदलिंगवत्वे तं-
107 त्रं न तु शक्तत्वे सति। गौरवात्। दंडादिवाक्यस्याशक्तस्यापि पुरुषादिविशेष्यलिंगकत्वात्। गुणवाचि-
चिशुक्लादिपदानां शुक्लः पट इत्यादौ लक्षणया विशेषणानां विशेष्यलिंगकत्वाच्च। ननु शुक्लादेर्गु-
णपरत्वे लाक्षणिकत्वे स्वलिंगप्राप्तौ गुणे शुक्लादयः पुंसि गुणिलिंगास्तद्वतीति लिंगानुशासना-
ल्लाक्षणिकस्यापि विशेष्यलिंगकत्वं। न च बहुव्रीहौ तथानुशासनमस्तीति चेत्। तस्य न्यायप्राप्तानुवा-
दकत्वात्। अत एव शुक्लरूपमित्यत्र शुक्लगुणवाचकत्वेपि लिंगानुशासनपरिहाय विशेषणपदत्वा-
त् शुक्लपदं विशेष्यरूपपदस्येव लिंगं गृह्णाति। अन्यथा शुक्लो रूपमिति स्या... त्। किं च बहुव्रीहेर्लिं-
गानुशासनाभावे स्वलिंगाभावात् विशेषणोपस्थापकवाक्यत्वाच्च विशेष्यपदलिंगत्वेव युक्ता। यथा श्रीम०
दंडी पुरुष इत्यादौ वस्तुतो बहुव्रीहेरन्यपदार्थे शक्त्या विपिकर्थं नानालिंगकत्वात्तथा लिंगानुशासनाभा- १०७

वात्। अथ विशेषणपदत्वाद्विशेष्यपदलिंगता विशेष्यपदं च नानालिंगं अतो नानालिंगतेति चेन्न। तर्हि ला
घवान्न लक्षणैवास्तु। ऽकृत्स्न्यायेनैव लक्षणीयविशेष्यपदलिंगोपपत्तिरिति॥ तत्पुरुषेपि राजपुरुष
इत्यादौ पूर्वपदस्य षष्ठ्यर्थसंबंधे निरूढलक्षणा एव राजसंबंधिपुरुषबुध्युत्पत्तेर्न समासे शक्तिः। अन
न्यलभ्यस्य शब्दार्थत्वात्। यत्तु समस्यमानपदातिरिक्तं न समासपदं। समस्यमानपदानां प्रत्यभिज्ञानादतो न
समासे शक्तिरिति। तन्न। पदतत्समुदाययोर्भिन्नत्वात्। न चानुपपत्तिं विना कथं षष्ठ्यर्थलक्ष
णेति चेत्। न। यदि षष्ठ्यर्थो न लक्ष्येत तदा राजपुरुषादौ लाघवादिनाऽऽकसामानाधिकरण्यावगमात् रा
जत्वविशिष्टपुरुषस्यैव वैभक्तिकोऽन्वयः स्यात्। राजवाहनमानयेत्यादौ वाहनपदे चावाहनवल्लक्षणा स्यात्
। अथ राजत्वविशिष्टे अस्मदादीनामानयनान्वयेऽयोग्य इति चेत्। तर्ह्येनयैवानुपपत्त्या तात्पर्यानुपप
त्त्या वा षष्ठ्यर्थलक्षणा विभक्त्यर्थापेक्षितो हि सर्वत्र नामान्वयः। अत एव विभक्त्यर्थासंभवे विभक्त्यर्थ
लक्षणौचिता। अथ राजपुत्रः रूपादन्वयप्रकारतायाः षष्ठ्यर्थसंबंधबुद्धिः तेन पूर्वपदे लक्षणा न श
समासे शक्तिरिति। तन्न। नानामार्थयोरन्वयाभिधाने न्वयप्रकारतया नियमतः षष्ठ्योपस्थितेर्हेत्व
भावात्। शाब्दादनुपस्थितस्यान्वयप्रकारतयाभाने मानाभावाच्चैत्रस्य नप्तेत्यादौ पुत्रस्य नप्तपदा

१०८ ष्ठ्यर्थावच्छेदकतयावस्थितस्यान्वयप्रकारत्वेन ज्ञानं राज्ञः पुरुष इति विग्रहे समासविधानाद्युक्तस्य ता
त्पर्येव संबंधस्यारिकात्वेन लक्षणा न वा शक्तिरित्यपरे। तन्न। राजपुरुषमानयेत्यस्य एवं नियमेन विग्र
~~हे समासविधानाद्युक्तस्य तात्पर्येव संबंधस्यारिकात्वेन लक्षणा न वा शक्तिरित्यपरे। तन्न। राजपुरुषमा~~
~~मानयेत्यस्य एवं नियमे च~~ विग्रहाश्रवणात्। आप्ताद्धिकानां तु विग्रहाभिधानं समासार्थकथनपरमावि
भाषाधिकारे च समासानुशासनं समासविग्रहयोः पर्यायत्वसाधुत्वं च बोधयितुं विशेषस्तु विग्रहे
सोऽर्थो नामविभक्त्यादिभिः स्वातंत्र्याभिधीयते। समासे तु एवं राजादिपदे न लक्षणया बहुव्रीहौ नित्यस
मासत्वाभिधानं विग्रहस्यासाधुत्वख्यापनार्थं चित्रा गावो यस्येति विग्रहाभिधानं च बहुव्रीह्यर्थकथनप
रमास्यादेतत्। विभाषेति सूत्रेण वाक्यसमासयोस्तुल्यार्थता दर्शिता। वाक्ये च मुख्या वृत्तिरतः समासे
ऽपि सैव वृत्तिः। अन्यथाऽतुल्यार्थतापत्तेः वाचकस्यैवानुशासनाच्च। यथा लिंगादेः। न च लाक्षणिकं
वाचकम्। अन्यथा गंगादेरप्यनुशासनापत्तेः। अथ वाचकव्युत्पादनवल्लाक्षणिकव्युत्पादनमपि
द्वयोरपि ज्ञातयोः पदार्थोपस्थापकत्वादिति चेत्। ~~वाचकत्वज्ञानं विना वाच्यार्थतात्पर्युक्तं वाच~~ ।म० १०८
~~नुशासनमालाक्षणिकवत्पादनमपि। द्वयोरपि ज्ञातयोः पदार्थोपस्थापकत्वादिति चे~~द्वाच

कत्वज्ञानं विना वाच्याज्ञानाद्युक्तं वाचकत्वानुशासनमालाक्षणिकत्वयुक्तत्तौ पारमार्थ्यात्तस्य स्मारकमतो ननुत-
स्य व्युत्पन्नत्वमन्तरेणापि ज्ञानं च प्रयोगानुशासनं व्याकरणं स च लक्षणयाप्यक्तिः। अतस्तस्याप्यनुशासनं घोषसमभिव्या-
हारे गंगायामिति पदस्यैवेति वाच्यमा गङ्गायामिति मात्रे त्वननुशिष्टं तत्र भेमस्ता तिसमभिव्याहारे व्युत्पन्नम्। ननु त-
द्वाक्यस्थत्वेना। किंच। गङ्गायामिति पदं नानुशिष्टं किंतु विभक्तिः। सा चोभयत्र वाचिके चेति न प्रातिपदिकत-
त्रैर्मुख्याया लक्षणाया वा अपेक्षा। अत एव विभक्तौ न लक्षणा। वाचकस्याननुशासनादिति। उच्यते। साधुपद-
स्यानुशासनं व्याकरणं तस्य साधुत्वज्ञापकत्वेनैव प्रामाणिकप्रसिद्धिसिद्धत्वात्। अत एव न गव्यादेरनुशासन-
म्। तस्यासाधुत्वात्। अस्ति च समासः साधुरतो फक्तं तस्य साधुत्वानुशासनं। साधुता च लाक्षणिकत्वेनापि सं-
भवति। पदवाचकता चार्थानन्यलभ्यत्वादवगम्यते। ननु व्याकरणं वाचकत्वानुशासनम्। प्रयोगमात्रे साधुत्वं ज्ञा-
पयेत्तौ वाद्धीनां गुणवृद्ध्यानादिविकारणादीनामिएनुमाद्यागमानां वर्णविकारमकारणकाणादीनां निरर्थकाना-
मपि साधुत्वार्थमनुशासनम्। अयोगत एव वृद्ध्येकयोरित्यादावनुशासनस्यैकत्व एकवचनप्रयोगः साधुरि-
ति साधुत्वज्ञापनार्थत्वेन सार्थकता। अन्यथैकत्वे एकवचनस्य स्वादिसूत्रेण विहितत्वाद्वैयर्थ्यापातात्। इति ता

८ नचसाधुत्वादेव पाक्षत्वे ... ॥ तिउ॰ तस्य वंतयोर्थ्य ... ॥ तत्र हि मनुष्यापे साधुत्वं प्रत्येकं पा... धुत्वं ८

शा॰भू॰ १०९ 109 दावशक्तत्वादेवैकवचनाप्रयोगः साधुरितिचेतान्लक्षणयाद्वित्वादौ प्रसक्तः प्रयोगो न साधुरिति ज्ञापकत्वेन सा
र्थकत्वम् । एवं च विभक्तौ न लक्षणा । लिङ्गादेस्त्वपूर्वे क्वाप्यनुशासनं नास्तीति लोके क्रियाकार्यत्वे लक्षणा॰ एवं
च तत्तीयायाश्च पि लक्षणया कर्मत्वादौ प्रयोगः सामान्यतो न साधुः । कर्तृकरणयोस्तृतीयेत्यनुशासनबलाद्य
त्ययेपि साधुत्वमनुशासनं तारवलात । तस्माद्यदि समासो नानुशिष्येत तदा लोके तस्यसाधुत्वं न ज्ञायेत॰ प्रत्युत
गवादिशब्दवदपशब्दत्वैवस्यात् । यदि च विभाषेति सूत्रं न प्रणीयेत तदा तथाभूतेर्थे समासस्यैवसाधुत्वं ज्ञायेत ।
न वाक्यस्य तदभिधाने शक्तस्यापि शिष्टैवा लघुत्वपंकत्वादेः । विभाषाशब्दः समासविग्रहयोः साधुत्वज्ञापनार्थो
न तु विकल्पेन समासे साधुत्वबोधकः । अवाचकः शब्दः समासोत्तो साधुर्गव्यादिपदवद्वाच्यमेव वाच्यं चकत्वा
त्साध्विति शंकानुत्पत्त्यर्थौ वाक्यसमासाविति वोधयद्विभाषापदमेव निकरणकरोति । ननु नामार्थयो राजसंव
न्धिपुरुषयोर्विभक्तिं विनान्वयाभावाद्राजसंबन्धिपुरुषाप्रतीतेर्विभक्तेः प्रकृत्यर्थगतस्वार्थप्रबोधकत्वमुत्त
तेश्च राजसंबन्धिपुरुषे समासस्य शक्तिरेव । एवं वहुव्रीह्यादिकर्मधारयादावपि॰ सार्थकत्वेपि प्रातिपदिकत्व
विधानमर्थवदादिसूत्रस्यप्रपंचइतिचेत॰न्न । नीलं घटमानयेत्यादौ नामार्थयोर्विशेषणविशेष्ययो र

न्वयबोधे आकांक्षादिकमेव हेतुर्न तु विभक्तिरपि नीलस्य घटवत्कर्मत्वाभावाद्दृष्टान्तत्वान्न नु मवाद्योर्नी
लविशिष्टस्य च कर्मत्वं विभक्त्यर्थं बहिर्भावेनैव नीलघटयोरन्वयबोधे स्यान्नत्वन्यथा। न च विभक्तिं विना समस्यमान
पदानां साधुत्वं नेति वाच्यम्। विभक्तिं विनापि समासस्य साधुत्वानुपपत्तेः स नात्। तस्मान्नामार्थयोरन्वयबोधे विशे
षणाद्विभक्तिः प्रयोगे साधुः। न तु कर्मत्वाद्युपनामिका। एवं च राजसंबंधिपुरुषस्य विभक्तिं विनापि पुरुषपदा
दुपस्थितिः। अत एव तादृशपुरुषपदार्थे विभक्त्यर्थान्वयः। यदि च विभक्तिबलात् क्रियान्वयो नीलमित्यस्यारुणान्वा
यादार्थः समास्तदापि राजसंबंधिपुरुषयोः क्रियान्वयादार्थः समासोऽस्तु। न च राजसंबंधिनः कर्मत्वेनानुपस्थि
तेर्न क्रियान्वय इति वाच्यम्। समस्यमानपदार्थान्वयार्थे समासाद्विभक्त्यनुशासनमतो विशेषणेऽपि विभक्त्यार्थान्व
यात्। अन्यत्वमपेक्ष्य शक्त्यभावनियमात्। समासान्निरर्थकाद्विभक्तिश्च समस्यमानपदार्थगतमेव स्वार्थमाह। तथैव
व्युत्पत्त्यन्तरकल्पनात्। समासे च नन्नशक्तिकल्पनातो लघुत्वात्। यद्वा विभक्तेः सन्निहितपदार्थगतस्वार्थबोधक
त्वमतो बहुव्रीह्यादावन्वयबोधपूर्वकोऽन्यपदलक्षणा। मां च षष्ठी तत्पुरुषे च विभक्तिसन्निहितोऽन्यपदार्थगतस्वार्थबो
धकत्वं विभक्तिसन्निहितपदस्यार्थेऽस्यमुख्यया लक्षणया वा। एवं नीलोत्पलमानयेत्यादौ कर्मधारये विभक्तिं विनैव ना
मार्थयोरन्वयबोधानंतरं विशिष्टस्य कर्मत्वेन क्रियान्वयः। कर्मधारये तु न शक्तिर्नवा लक्षणा ताभ्यां विनापि विवक्षि

श्रा·मू· तार्थान्वयाबोधापत्तेः। ननु नीलघटयोः सामानाधिकरण्यं नामार्थयोरभेदो वा गुणगुणिनोः समवायो वानुभूयते स चा
११० न्वय एव नन्वन्वयप्रतियोगिः अतोन्वयप्रतियोगिनो रूपस्थितिर्नामपदाच्छक्त्यैवेति न तदर्थं लक्षणा। राजपुरुष इत्यत्र
तु राजसंबंधिपुरुषयोरन्वयोऽनुभूयते। राजसंबंधिनश्चान्वयप्रतियोगिनो रूपस्थितिर्न राजपदशक्त्यर्थं लक्षणां
110 विना राज्ञः पुरुषं राजसंबंधिनपुरुषं राजपुरुषमानयेत्यादौ पर्यायान्वयाद्राजसंबंधिनः पुरुषान्वयो भासते। राजसंबं
धी अन्वयप्रतियोगित्वेन। एवं च बहुव्रीहौ सर्वत्रान्यपदानां षष्ठीतत्पुरुषे पूर्वपदस्यान्यपरतया लाक्षणिकत्वान्ता
र्यः कर्मधारयो बलवान्। तत्र सर्वेषां पदानां स्वार्थपरतया मुख्यत्वात्। अत एवैतयाश्चानिषादस्थपतिं याजयेदि
त्यत्र कर्मधारय एव मुख्यत्वेनाब्दस्वरसात्। षष्ठीतत्पुरुषे षष्ठ्यर्थलक्षणापत्तेः। एवं चेश्वरनिषादप्रतीतेस्तस्यैवा
धिकारात्। तदपूर्वेण स्वनिर्वाहकत्तयेश्वरनिषादस्यैव यागानुकूलविद्याप्रयुक्तेराक्षिप्यते। अन्यथा मुख्यार्थहानप्र
संगात्। नन्वत्र षष्ठ्यर्थलक्षणया लब्धविद्यस्त्रैवर्णिक एव निषादानामीश्वरो धिकारी बोध्यते न चेश्वरनिषादः। अक्लृप्त
विद्याप्रयुक्तिकल्पनात्। षष्ठ्यर्थलक्षणया लघुत्वादिति चेदुच्यते। मुख्यार्थान्वयाधीनकल्पनागौरवेण मुख्यार्थो न
हीयते किंतु बाधकं विना मुख्यार्थान्वयबोधस्य प्राथमिकत्वात्तदनुरोधेन तदुपपादकं कल्प्यते। फलमुखगौरवं च न राम°
दोषाय प्रमाणवतो गौरवस्यापि न्याय्यत्वात्। न वा क्लृप्तकल्पनाप्रसंग एव मुख्यार्थान्वये बाधकः। अक्लृप्तस्य प्रागन ११०

वगमात्. मुख्यार्थान्वयवत्त्वादेव तदवगमे ऽनुपजीव्यविरोधात्. अन्यथाप्रतीतानुपपत्तिबलात्कल्पनायामपि तत्स्यात्। अलक्षणक
ल्पनागौरवेण कल्पकस्य बाधितत्वात्. अथ शूद्रस्य वेदपाठनिषेधादीश्वरनिषादो ऽधिकारी बोधयितुं न शक्यत इति मुख्ये
बाधकान्तकर्मधारयः। न चेश्वरनिषादे विधिबलादेव पाठनिषेध एव बाध्यत इति युक्तम्. षष्ठ्यर्थलक्षणायां बाधे संभ
वति निर्निषेधकवेदवादकल्पनायाः अन्याय्यत्वादिति चेत्. सामान्यतो निषेधस्य तद्विशेषविधाने तदितरपरत्वात्. यथा
न हिंस्यात्सर्वाभूतानि श्वेतं गां छागमालभेतेत्यत्र. एवं च निषादपदमुख्यत्वे शूद्रपदे संकोचमात्रं शूद्रपदस्य निषाद
परत्वे निषादपदस्य मुख्यत्वबाध एव. यद्यपि संकोच एकदेशबाध एव. तथापि संकोचे द्वयोरपि मुख्यत्वे लक्षणादबाधा
त्वसंकोच एव ज्यायान्. अन्ये तु नात्र षष्ठ्यर्थो लक्ष्यते ऽनुपपत्त्यभावात्. अतः समासस्य षष्ठ्यर्थमन्तर्भाव्य शक्तिरेव। अन्यथा
कर्मधारयेपि पदार्थसामानाधिकरण्यप्रतीतेस्तत्रापि लक्षणोचितत्वम्. अथान्वयप्रकारतया सामानाधिकरण्यप्रती
तेर्न तत्र लक्षणा. तर्हि षष्ठ्यर्थेपि तथैव न लक्षणा न वान्वयप्रकारतया नियमतो विशेषोपस्थितौ प्रमाणम्. अतस्मादुभ
यत्र समासस्यैव बोधकत्वम्. कर्मधारये तु बलवत्त्वम् उत्सर्गतः सामानाधिकरण्यस्योचितत्वात्. निषादस्थपतेस्तु
स्थपतिपदार्थस्येश्वरस्य प्रतियोग्यपेक्षत्वान्न तत्पुरुषसमर्थः षष्ठीतत्पुरुष एवा निः प्रतियोगिके कर्मधारयो नी
लोत्पलादावुत्पलस्य निष्प्रतियोगिकत्वात्. तथा च निषादेश्वरस्याधिकारः। ऐश्वर्यस्य सजातीयापेक्षत्वात्. न प

श्र॰सू॰ तिपदान्नरपतेर्नरस्येव निषादस्थपतिपदान्निषादरूपेश्वरस्य प्रतीतेरिति· तन्न· राजवाहनादौ पूर्वपदे षष्ठ्यर्थलक्षण
१११ येव राजसंबंधिप्रतीतेः समासे शक्त्यभावात्· अनुपपत्तिरुक्तैव· उपकुंभमित्याद्यव्ययीभावोर्ध्वपिप्पलीत्यादिश्च
तत्पुरुषः पूर्वपदार्थप्रधान एव· कुंभस्य समीपे पिप्पल्या अर्द्धे च तात्पर्यात्· अतस्तत्रोत्तरपदे षष्ठ्यर्थलक्षणा न
तु समासे शक्तिः। नञ्समासे ऽब्राह्मणमानयेत्यत्र पर्युदासे पूर्वपदे नभिऽत्तरपदार्थसदृशत्त्रिभे लक्षणा·
अघटः पटइत्यादौ च प्रसज्यप्रतिषेधार्थे नभिन्नसमानाधिकरण्याभावाद् भावबद्धलक्षणा· व्यासे ऽप्येवं न घ
टः पटइत्यादौ· यथाश्रुतः पटइत्यत्र शक्त्यैव बद्धलक्षणान्त्यपचतीत्यादौ क्रियासंबंधे भूतत्तेन घटः पटइत्यादौ प्रस
ज्यप्रतिषेधेन श्रोमुख्यार्थता· सर्वत्र संबंधे पि न समासाविभाषाधिकारादिकल्पेन समासानुशासनात्· यत्र
तिषु येयजामहं करोतीति नानुयाजेष्वित्यपर्युदासेन श्रुतेनायमर्थः। उत यत्र तिषु यागेषु नानुयाजेष्वनुयाज
व्यतिरिक्तेषु येयजामहइति मंत्रं कुर्वीतेति अयमानुयाजेष्वित्यत्र यदि पर्युदासे न श्रू· तदा पदद्वयस्यान्यपर
त्वं स्यात्· समासापत्तिश्च· तस्मादनुबंगाकरोतीति नानन्वयात्प्रसज्यप्रतिषेधः· तेनानुयाजेषु येयजाम
हमिति मंत्रं न करोतीत्यर्थः। एवं च नानुयाजेष्वितिपदद्वयस्य नान्यपरता न वा नञो मुख्यार्थत्यागः। समा शा॰
साभावे न साधुता वेति चेत्· न· समासस्यानित्यत्वान्न ऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽऽ १११

नुयाजेषिति वाक्योपर्युदासेन नञः न चैवं वाक्यभेदः त्रिपदत्वान्नञो न्यपरत्वाभावः । गौर्वाहीक इत्यादौ वा
क्ये यियी गवादिपदस्यान्यपरत्वात् । यदि च प्रसक्तप्रतिषेधेन नञ् तदा मंत्रविधायकतन्निषेधकयोर्विरु
द्धार्थत्वेन वाक्यभेदापत्तिः । तस्मात् प्रथमपक्षतौ तैकवाक्यत [redacted] बलादे
कवाक्यत्वे संभवति वाक्यभेदस्यान्याय्यत्वान्नञ्पदे लक्षणा कल्प्यते । न तु नञ्पदमुख्यत्वानुरोधा
देकवाक्यत्वत्यागः न हि पदार्थानुरोधेन वाक्यार्थकल्पना किंतु वाक्यार्थानुरोधेन पदार्थकल्प
ना । न पदं च केवलं नास्त्येव नञ्पदादेव सर्वत्र समासानित्यत्वेन प्रयोगोपपत्तेः । अन्यथा प्रसक्तप्रति
षेधे तु नञ् न स्यात् द्वेवा नपदे नैव गतार्थत्वात् । अमानोना इत्यत्रापदमेव निषेधवाचकं । समास
वाक्यभेदेन नञो द्वैविध्यात् द्वात्तथाभिधानं ॥ इतरेतरद्वंद्वे धवखदिरौ छिंधि इत्यादौ विभक्त्योपनीत
द्वित्वस्य धवखदिरयोः प्रत्येकं न योग्यत्वान्न वा साकांक्षत्वं । द्वित्वमपि न प्रत्येकं योग्यं न वा साकांक्षं ।
एकत्र द्वित्वाभावात् । न च व्यासज्यवृत्तित्वेन द्वित्वमेकाश्रितमपीति वाच्यं । सहि द्वित्वमाकांक्षति द्वित्वं
चतं । यत्र द्वित्वपर्यवसानं प्राप्यते । एकस्य तथात्वे द्वौ बहवः इत्येकत्रापि स्यात् । अतो द्वंद्वपदघटकस्यना
न्वयबोधः [redacted] बोधे वा धवखदिरपदयोः खदिरदयधी श्व स्यात् । तस्मात्तद्घटकयोर्द्वित्वान्वयानुपपत्त्या

श·मू· सहितावस्थमुभयं द्वित्वान्वयाय समयोग्यं तत्सामान्यं चेति खदिरसहितधवोपस्थितये धवपदे साहित्य
११२ लक्षणा· ननु खदिरसहितधवस्यैकत्वात् खदिरसहितो धव इतिवत् द्विवचनानुपपत्तिः। धवसहित
खदिरसाहित्यावस्थायां लक्षणे च तस्या एकत्वादेकवचनापत्तिः· अवस्थाश्रययोरुपसर्जनत्वेन द्विवच
११ नान्वयानुपपत्तिश्चेति चेत्· अत्र कश्चित्· अवस्थायां लक्षणेऽपि तदाश्रयगतत्वार्थबोधकत्वमे
व द्विवचनबहुवचनयोः। पदप्रवृत्तिर्वैचित्र्यात्· तथैव व्युत्पत्तेः। यथा गुणवाचिनीलादिपदं क्वचिद्गु
मात्र णवाचकं क्वचित्तदुपलक्षितद्रव्यवाचकं· अन्यथा नीलः पट इति सामानाधिकरण्यं न स्यात्· एकत्र द्वय
भावात्· यत्तु लक्षिता साहित्यावस्था स्वाश्रयमुभयं लक्षयतीति· तन्न· लक्षितलक्षणायास्तदन्य
त्वात्· वस्तुतस्तु साहित्याश्रयः प्रधानं· साहित्यं त्ववच्छेदकतया गुणभूतं पदेन लक्ष्यते· तेन साहित्या
श्रयस्यानेकत्वाद्द्विवचनबहुवचने भवतः· अत एवेतरेतरद्वन्द्वः सर्वपदार्थप्रधानः। धवश्च खदि
रश्चेति विग्रहे तथैवार्थविवरणात्· समाहारे तु साहित्यावस्था प्रधानं पदार्थो गुणभूतास्तेन तस्यै
कत्वाद्देहीपटहमित्यादावेकवचनं· धर्मधर्मिणोश्च तात्पर्यभेदाद्द्वन्द्वयोर्भेदः। अत एव युगपदधि एम°
करणवचने इतरेतरद्वन्द्व इति शाब्दिकाः· अधिक्रियत इत्यधिकरणं पदार्थः। तेषां युगपद्वचनमे २ ११८

केनपदेनैकदेशोपस्थापनं तच्च न शक्त्या एकपदस्येतरपदार्थे शक्त्यभावात् अन्यथेतरपदवैयर्थ्य
प्रसंगः । अनेकार्थत्वेप्येकस्यैकत्रानेकार्थपरत्वाभावात् नापि पदद्वयं मिलितमुभयोपस्थापकं । मि
लितस्य मिलिते शक्त्यभावात् । नापि द्वन्द्वे शक्तिरेव पदलक्षणायैवानेकोपस्थितिसंभवात् । अतएवांग
वंगकालिङ्गशब्दात् द्वन्द्वे बहुषु वर्तमानात् परस्य तद्राजस्य णादेः तद्राजस्य बहुषु तेनैवास्त्रियामित्यनेन लो
पे अंगवङ्गकलिङ्गा इति भवति । अन्यथा साहित्यलक्षणां विना तेषां प्रत्येकं पदस्य बहुषु वृत्त्यभावादत्र
लोपे अंगवङ्गक पोनस्यात् घटौ घटा इत्यत्रापि घटः साहित्य घटत्वेन द्वित्व बहुत्वान्वययोग्यत्वेस
तितद्रूपस्थितये घटपदे साहित्यलक्षणा तदर्थप्रदर्शनार्थं द्वन्द्वापवादकं सरूपाणामेकशेषानुशा
सनमपि तदुक्तं सहभावविवक्षायां वृत्तिर्द्वन्द्वैकशेषयोः क्रमेणार्थप्रतीतौ हि नस्याद्द्विवचनादिक
मिति ननु स्वरूपद्वयमेव साहित्यं अतिरिक्तस्याभावात् स्वरूपयोश्च पृथक्पदादुपस्थितौ वृत्तिद्व युगपत्
यविरोधात् नचाजहत्स्वार्था साधारणरूपाभावात् एकक्रियान्वयित्वमेकान्वयप्रकारत्वम
पेक्षाबुद्धिविशेषविषयत्वादिकं वा द्वित्वान्वयात् एवंमविद्यमानमप्रतीतं चाद्यपक्षदिशा वितिहि

२

धा·म· प्रतीतिर्न तु रूपांतरेण· न च धवपदस्य खदिरे स्वार्थसंबंधो लक्षणाबीजमस्तीति चेत्तन्न· साहित्यं हि तुल्यए
११२ द्धारता· सा च धात्वुपनीतफलानुकूलसजातीयविजातीयव्यापारप्रचयस्यैकरूपस्तुल्यः संबंधः द्वंद्वे
ऽन्योन्यसंबंधोप्ययमेव· धव[illegible]खदिरौ छिंधीत्यत्र छिदानुकूलो यावत्तावान् व्यापारः स तयोस्तुल्य
113 एवाभासते चा· अत एव स्वर्गकामादीयत्याः सहत्वेनानुप्रवेशेपि न द्विवचनापत्तिरेकत्वविरोधोच्चा· अतु
ल्य[illegible] द्वारत्वात्· दंपत्योरेकरूपसजातीयविजातीयव्यापारप्रचयसंबंधरूपसाहित्याभावात्·
एवं छिदानुकूलतु-तुल्यव्यापारत्वेन साहित्यरूपेण वाच्यलक्ष्यसाधारणेनात्र हत्वार्थलक्षण
या धवपदादुपस्थिते धवखदिरास्वरूपे विभक्त्यर्थद्वित्वान्वयः। धवपदस्य खदिरेण संबंधोपि तुल्यव्यापा
रत्वमेव· न चास्य लक्ष्यत्वात् न संबंधरू[illegible]पतेति वाच्यं· अत्र हत्वार्थस्यांहि येन रूपेण लक्ष्यता स ए
व संबंधः· यथा षट्त्रिकाकपदयोः षट्त्रिघटितसमूहवर्तित्वं दध्युपघातकत्वं च लक्ष्यमेव संबंधः· न
चैवं खदिरपदवैयर्थ्यं लक्षणायां लक्षणीयपदानुपयोगादिति वाच्यं· खदिरपदं विना नियमतो
न खदिरोपस्थितिः· ततः साहित्याख्यद्वितीयविशेषणत्वापनापस्यार्थकत्वं· अन्यथा लक्षणाविरहे

ण्द्वद्वयधीप्रसंगात्॰ अत एवाग्नीषोमीये अग्नीषोमौ देवते इति द्वित्वान्वयबलादेव सहितावस्थयोः
सापेक्षयोर्देवतात्वं॰ द्वंद्वे आद्यपदं लक्षकं प्राथम्यात्॰ द्वितीयपदं तु साहित्यमनुनिरूपकतयाकांक्षितस
मर्थकं मुख्यमेव॰ उभयोः पदयोरमुख्यार्थत्वे हेत्वभावात्॰ अन्ये तु द्वितीयपदे पि लक्षणा॰ समभिव्याहृ
तविभक्त्यर्थान्वयानुरोधात्॰ अन्यथा समभिव्याहारभंगापत्तेः। पदार्थगतस्वार्थबोधिका हि विभक्तिः।
न च समासपदमन्यदस्ति समस्यमानपदात्॰ समासशक्त्यभावात्॰ तेन धवपदार्थानुगतं खदिरपदार्थग
तं च द्वित्वं तत्रैव विभक्तिराह। अतो धवपदवत् खदिरपदेपीतरेतरबद्धावस्थस्वार्थपरता प्रातिपदिका
र्थे इतरपदार्थगतं च द्वित्वं तत्रैव विभक्तिरर्थान्वयस्य विभक्त्यर्थगर्भत्वात्॰ उभयपदार्थगते एव द्वि
त्वकर्मत्वे विभक्तिराह। न च द्वयोः सहितावस्थस्वार्थपरत्वे धवद्वयं खदिरद्वयं च वाक्यार्थे न्वीयेत न त्वेको
धवः खदिरश्च। अतश्चतुष्टयापत्तिरिति वाच्यं॰ पदद्वयेन हि सहितयोः एकमेव साहित्यं लभ्यते॰ तच्च न च
तुष्टयवृत्ति॰ अपरे तु द्वितीयपदं फलतो नुवादः। यथाग्निचिताभिधाने एकपदं॰ अत एव समुच्चये न्वाच
ये च तयोः साहित्यानवगमान्न द्विबहुवचने न वा द्वंद्वः। यद्यपि चार्थे द्वंद्वानुशासनं तथापि यत्रान्यो

२

श्र॰म॰ न्यसाहित्यमन्वयपूर्वकमितरपदार्थान्वयस्तत्र समासः साधुः। तेनेतरेतरयोगसमाहारयोरुक्तार्थाभावात् समासः
११४ ।समुच्चयेऽन्वाचये च न तथा। असंबद्ध एवैकैकशः क्रियान्वयात्। एवं धवं खदिरं च छिंधीत्यादौ समुच्च
114 येतुल्यवत्संबद्धयोः क्रियान्वयधीः पश्चात्तु तयोरेकरूपसजातीयविजातीयव्यापारप्रचययोगित्वं सा
हित्यं चकारद्योत्यते। क्रियाभेदे त्वन्वाचयः। यथैधानाहर्तुं वनं व्रजन् शाकमथानेष्यसीति। गौश्चाश्वश्चे
ति द्वंद्वसमानार्थवाक्यमेव। साहित्यपरमतेनन्तु स्फोरितं। द्विवचनबहुवचनयोरेव तद्द्योतकत्वात्। यत्तु द्वित्वा
न्वयार्थं तदन्वयप्रयोगार्थोपनयनं। अपेक्षाबुद्धिविषयत्वावच्छेद्याच द्वित्वान्वय इत्यपेक्षा
बुद्धिविषयत्वावच्छेदस्वार्थपरतास्तु। इदमेव च साहित्यं न त्वेकक्रियान्वयः। तस्य विभक्त्यैव बो
धितत्वात्। एकक्रियात्वयाभावेपि द्वित्वान्वयदर्शनादिति। तन्न। अपेक्षाबुद्धिविशेषविषयत्वार्थमप्येक
रूपाधिरवच्छेदकं वाच्य इति तथैव लक्षणाया युक्तत्वात्। लाघवात्। न च विना लक्षणां अन्यसंबद्ध
स्यसतः सापेक्षस्य क्रियान्वयो विभक्त्यापि बोध्यत इति॥ अत्रोच्यते। एकस्यत्याहृत्य पदद्वयात् ए॰
स्वस्वशक्त्या स्वस्वार्थयोरेकदा स्मृतिसंभवादेकदाऽनेकस्यान्वयार्थं न साहित्यलक्षणा। एकैकमात्रयो

विभक्ता

रसंस्कारद्वयाद्विपदयोस्तदर्थयोश्चैकास्मृतिरित्युभयसिद्धं प्रत्येकं द्विपसंयोगात् समूहालंबनमिव
अन्यथा द्वंद्वे नलक्षणानवातयाऽनेकस्मृतिः। पदयोस्तदर्थयोश्चैकस्मृत्यभावात्· एवं च पदद्वया
दुपस्थिते धवखदिरादिस्वरूपे द्वित्वान्वयो बोध्यते· यथैं द्विपसंनिकृष्टे ज्ञाते वा धवखदिरस्वरूपे
प्रत्यक्षेण द्वित्वं बोध्यते· न च तत्र तयोः स्वरूपातिरिक्तं तुल्यदारत्वादिकं साहित्यमस्ति ज्ञाप्यते वा
तथा विभक्त्यापि विलक्षणस्वरूपे द्वित्वं बोध्यते· उभयोर्द्वित्वान्वयबोधकत्वे विशेषाभावात्·
ननु योग्यतावच्छेदकरूपेणोपस्थिते इतरपदार्थान्वयबोधः साहित्याश्रयत्वेन च धवखदि
रौ तथा न प्रत्येकं· छिद्रेतरत्वविशिष्टे च घटपदस्य लक्षणैवेति चेत् न· उपस्थिते योग्येऽन्वय
बोधः। अधिकस्य गुरुत्वात्· घटपदादपि योग्यस्यान्वयो बोध्यते न तु छिद्रेतरत्वेनेत्युक्तं॥ स्यादेतत्
तत्· पदद्वयात् स्वस्वशक्त्या एकदा स्मृतेऽनेकत्रेतरपदार्थस्य विभक्त्यर्थस्य च तत्र अन्वयबोधो न स्यात्· इत
रपदार्थेऽतरपदानां नामार्थे विभक्तीनां स्वार्थान्वयबोधकत्वमिति व्युत्पत्तेः व्याप्तेश्च· अनेकं च न पदा
र्थो न नामार्थः· मिलितपदद्वये पदत्वनामत्वयोरभावात्· अतो द्वित्वान्वययोग्यस्य पदार्थे नामार्थत्व

श॰ मू॰ निर्वाह्यार्थद्वयपदे साहित्यलक्षणेति ॥ तन्न पदार्थत्वं हि स्वार्थपदोपस्थाप्यत्वं पदतात्पर्यविषयत्वं वा । अस्ति
११५ च द्वयेद्वये पदस्यानेकमुपस्थाप्यं तत्र तात्पर्यं च । तन्निर्वाहो नेकस्य तिद्दाता लक्षणया पदेन वा । स्वस्वशक्त्याप
द्वैतन्नान दाभ्यां चेति न कश्चिद्विशेषः ॥ एकपदोपस्थाप्यत्वं च न पदार्थत्वं गौरवात् । एवं नानार्थत्वमपि तत्तात्पर्यवि
115 षयत्वमेव । अथ पदार्थतावच्छेदकावच्छिन्ने विभक्तेः स्वार्थान्वयबोधकत्वम तो मिलिते तदवच्छिन्नत्व
नमिलितवृत्तिपदार्थतावच्छेदके लक्षणं विनेति चेत्तन्न । एवं त्वद्विरूपद्वयस्य प्रत्येकं तदवच्छि
कृपा न्नत्वमेव मेलकं च न स्वरूपातिरिक्ता प्रत्येकस्यायोग्यत्वात् न द्वित्वान्वयः । तथापि यादृशो द्वित्वान्वय
स्तादृशो न तदवच्छिन्नस्तदवच्छिन्ने च न द्वित्वान्वय इति चेत्तन्न । स्वरूपद्वयातिरिक्तस्य यादृशपदार्थ
स्याभावात् । वस्तुतः समभिव्याहृतपदार्थे विभक्त्यर्थान्वय इति व्युत्पत्तिः लाघवात् । न तु पदार्थताव
च्छेदकावच्छिन्ने गौरवात् । ननु विभक्तेः पदार्थतावच्छेदकधर्मव्याप्यसंख्याबोधकत्वं । इह्यादन्यत्र तथा
व्युत्पत्तिरिति उभयगतपदार्थतावच्छेदके साहित्यलक्षणेति चेत् । पदार्थतावच्छेदकधर्मसमानाधि
त करणसंख्यार्थबोधकत्वं विभक्तिव्युत्पत्तिः लाघवात् । न तु समानाधिकरणो नियमांशोपि प्रविष्ट इति ।

वात् नन्वेवं घटावानयपदं चेत्यत्र घटत्वसमानाधिकरणं द्वित्वसमभिव्याहृतेपदे पीति तमादायान्वयबो-
धः स्यादिति चेन्न विभक्तीनां योग्यतादिमत्प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तेः नच घटावित्यत्र प-
टपदं प्रकृतिः एवं च खदिरावित्यत्र घटपदं व्यवहितमपि विभक्तिसमभिव्याहृतमेवातद्भावेन समास-
स्य प्रातिपदिकत्वात् विभक्त्यर्थतद्भावेनैव नामार्थस्य विधेयान्वयित्वात् विभक्तेरेकपदार्थमात्रगतव्या-
भिधायकत्वं नानापदार्थगतसंख्यान्वयाबोधकत्वं चेति चेत् न आद्ये एकमात्रपदयोर्व्युत्पत्तावपि
कत्वात् द्वितीयेऽन्वयाबोधकत्वे योग्यतादिविरहस्योपाधित्वात् नच्चैकधर्मावच्छेदं विनायदिस्वरू-
पद्वये द्वित्वान्वयस्तदा एवं च खदिरं चेत्यत्रैव वाक्यभेदः स्यात् विशिष्टैकार्थप्रतिपादकत्वादिति वा-
च्यं आनयनाद्यन्वितद्वित्वविशिष्टैकार्थबोधकत्वात् एवं च खदिरं ~~चेत्यत्रैव वाक्य~~ रावितिच नवा-
क्यं क्रियायाः प्रत्येकमन्वये वाक्यभेद इत्यपि नालङ्कारणापत्तेरपि प्रत्येकमेवं क्रियान्वयात् गमनादिक्रि- गक्रिणा
ति यायोग्यासत्त्वैक्याभावात् तद्द्वन्द्वानां तु प्रत्येकं तेनैव बहुधुर्वामानात्यास्पत्त्यसंदेहो लोपो भवति तेनैव त-
द्धान्ते नैवेति वचनात् नत्वेकबोधकात् अत एवं गानामप्यत्यानिबद्धरूपिरातानोत्रास्त्रगाद्

श॰म॰ त्युदाहरणमगानामपर्यगानावेति आग इति प्रत्युदाहरणं शक्तिकारो दर्शयति । तस्मान्नानापदादप्युपस्थि
११६ तिः नैकत्र द्वित्वान्वय इति नानैकोपस्थित्यर्थत्वलक्षणं । अत एव चंद्रे कलंकः सुजने दरिद्रता विकाशल
116 क्ष्मीः कमलेषु चंचला मुखाप्रसादः सधनेषु सर्वत्र यशो विधातुः कथयति खदितमित्यादावेकस्य
त्याहर नानापदजनितैकस्मृतिविषयेषु कलंकादिषु वक्तृत्वान्वयबोधः । मेलकोपस्थापक द्वन्द्वाभा
वात् । तत्कल्पने मानाभावात् । एकवचनं तु तासां वा कुचेऽनन्वयप्रसंगात् । नन्वेवं धवखदिरौ छिंधीत्य
त्र तयोः छिदानुकूलव्यापारत्वं साहित्यं न प्रतीयेतेति चेत् न । द्वित्वान्वयबोधात् पूर्वं तन्न प्रतीयत
एवातद्भुत्तरं तु विभक्त्या क्रियापदेन च संभूय छिदानुकूलसजातीयविजातीयव्यापारप्रचयस्य तु
ल्यत्वात् एव संबोधवेव धवखदिरे च बोध्यते । यथा धवं छिंधि खदिरं चेति समुच्चये । न चैवं द्वन्द्वसमाना
र्थत्वे समुच्चये पि समासः स्यादिति वाच्यं । द्वन्द्वे युगपदुपस्थिते द्वये एकदा क्रियान्वयबोधे तात्पर्यं । तेन
तत्र समासः समुच्चये क्रमेणोपस्थिते क्रमेण क्रियान्वयबोधे तात्पर्यमित्यसमासात् । अन्वाचये एव॰
पि एवं । किंच यदि तुल्यव्यापारवत्वेन साहित्येन द्वयोरुपस्थितिः पदार्थतावात्तदा तुल्यव्यापारो सहि

तौवागतौगच्छतइतिधीःस्यात्·नतुचैत्रमैत्राविति·पदार्थतावच्छेदकरूपेणपदार्थेविभक्तेःक्रियापदस्य
चार्थान्वयबोधकत्वव्युत्पत्तेः।व्याप्तेश्च·यथाद्व्युपघातकत्वेनैवाकाकपदादेदितरपदार्थान्वयः।स
हितावस्थचैत्रमैत्रत्वेनोपस्थितौप्रत्येकंद्वित्वान्वयानुपपत्तेः।युगपद्वृत्तिद्वयविरोधश्च·अपि
चचैत्रमैत्रौगच्छतइत्यत्रगमनस्यव्यासज्यवृत्त्यभावाच्चैत्रत्वेनगमनान्वयार्थंद्वित्वान्वयार्थंमैत्रसहित
चैत्रत्वेनोपस्थितौयुगपद्वृत्तिद्वयविरोधःसहितावस्थेचगमनकर्तृत्वाभावादाख्यातार्थसंख्यान्व
योऽपिनसहितावस्थानंचसहितत्वेनोपस्थितेपदार्थैकदेशेचैत्रमैत्रेचधात्वर्थगमनान्वयइतिवाव्य
सहितोगच्छतीतिधीप्रसंगात्·नचधात्वर्थगमनेआख्यातार्थद्वित्वान्वयःसामानाधिकरण्यभंगप्रसंगा
त्·सुब्वत्तिङ्·तयोरेकसंख्याभिधायकत्वात्·एवंगर्गाभुंजतइत्यत्रभोजनस्यैककर्तृत्वनियमादनेकक
ते र्तृकंभोजनंनसंभवतीतितत्रवृत्त्यागर्गैर्नोपस्थितेऽनेकत्रसुपिरथेबहुत्वान्वयः।नतुसहितत्वेनोपस्थि
ते·यत्तुतत्रापिधात्वर्थभोजनगतंबहुत्वमाख्यातेनोच्यतइति·तन्न·सुब्वत्तिङ्तयोःसामानाधिकरण्या
नुपपत्तेः।भोजनानांसहितत्वेनानुपस्थितेश्च·यदाचानुगतरूपंविनैवैकदास्वस्वशक्त्योपस्थापितेऽने

१

श॰म॰ कत्रयोग्यतयाद्विबहुत्वान्वयस्तदातिङं तसुवंतसंख्यान्वयः प्रातिपदिकार्थे भवतीति नैते दोषाः। यत्तु सार
११७ हित्यं नोभयानुगतं तुल्यव्यापारत्वादिकं। तेन रूपेण घटत्वदिरयोर्विभक्तिधात्वर्थान्वयाप्रतीतेः। किं
117 तु प्रत्येकविलक्षणस्वरूपद्वयमेव। प्रत्येकाद्वोभयमन्यदेव। भवति च द्वयादन्य एकोघटो न घटत्व
दिरौ। तौ च न घटवद्व्यनुभवात्। तथा च एकमात्रवाचकेन द्वय॰ अनुगतधर्मं विना पदवच्छक म श
क्यैलत्यत इति न हतिद्वयविरोधः। घटपदस्य च स्वार्थनिरूपत्वमेवलक्ष्ये स्वरूपद्वये संबंधः एकनि
रूपत्वाद्वयस्य। अनुगतधर्मं विनापि च घटपदादनेकोपस्थितिः। ध्रुवपदादिव चतुर्दशानां। योग्यतया च
विभक्त्यर्थस्य स्वरूपद्वये धात्वर्थस्य च प्रत्येकमन्वय इति। तन्न। ऽक्कीत्याहि स्वस्वशक्या नानापदजनिते
कस्मृतिविषयेऽनेकत्र द्वित्वान्वयबोधसंभवात्। न तदर्थं साहित्यलक्षणा। घटौ घटा इत्यत्र द्विबहुत्वा
न्वययोग्यानेकोपस्थितिः शक्तित एव तत्र घटपदात्संभवतीति न तदर्थं लक्षणा। यथा ग्रहं संमा
र्ष्टीत्यत्र ग्रहपदात्तत्र घटत्योपस्थितानेकग्रहे संमार्गान्वयः। तर्हि तत्राप्यनेकग्रहस्वरूपमात्रज्ञानवदिह एम॰
प्यनेकघटस्वरूपधीः स्यात्। न तु तेषां सहितावस्थत्वधीरिति चेत्। न। तां विनापि द्विबहुत्वान्वययोग्योपप

स्थितेः॥सहितावस्थितत्वेनानेकस्य द्विबहुत्वान्वययोग्यतेति चेत् न। अप्रकृत्युपस्थापितानेकत्वेनैव तद्योग्य

त्वात्।लाघवात्।भवत्वनेकत्र द्वित्वान्वयबोधः ते षां साहित्यधीरेव लक्षणां विना न स्यात् इति चेत् न। वि

भक्त्यर्थधात्वर्थव्यापारान्वयबोधात् एवमनेकत्र तुल्यव्यापारवत्त्वस्याप्रतीतेः। किं चैवं न विभक्त्य

र्थे द्विबहुत्वान्वयानुपपत्या लक्षणा किंतु साहित्यप्रतीत्यनुरोधात्। न चैवमपि धातुनैव तुल्यव्यापारत्वं

स्य बोधनात्। तदन्वयबोधात् एवं तत्प्रतीत्यसिद्धेः। समाहारे तु पाणिपादं पंचपूली त्यादौ तावद्द्व्येकध

र्माभिधानं लक्षणयैव। तदेकत्वादेकवचनं। तदाहुः समाहारः। समाहारोनेकस्यैकीकरणं एकोध

र्म इति यावत्। स चैको धर्मः सेनादाविव द्वित्वबहुत्वसंख्यापेक्षाबुद्धिविशेषविषयत्वं वा॥ विरू

पैकशेषे तु पितरावित्यत्रैकस्य पितृद्वयाभावादगत्या पितृपदे जनकदंपत्यलक्षणा विभक्त्युपनी

तं च द्वित्वं विरूपयोरेव मातापित्रोरवगम्यते। स्वरूपस्य पितृद्वयस्य मातृद्वयस्य चैकप्रत्यजनकत्वात्। श्व

शुरावित्यत्रापि श्वशुरपदे पत्नीजनकदंपत्यलक्षणा। पत्नीजनकद्वित्वं चोक्तन्यायात् पत्नीमातापित्रो

रेव। ब्राह्मणावानयेत्यत्र दंपतिप्रजाप्रकरणे मानांतरात् ब्राह्मणब्राह्मणीपरत्वाच्च गर्भे पुमान् स्त्रिय

श्र·सू· ११८ 118

तिविरूपैकशेषत्वाद्ब्राह्मणपदे स्त्रीपुंसलक्षणैव· अनन्यगतिकत्वात्· पुल्लिंगं तु पदार्थैकदेशगतं अ
नूद्यते· स्त्रीपरत्वाज्ञाने च ब्राह्मणपदे न तंत्रवृत्त्या पुंद्वयमेवोच्यते· न तु स्त्रीपुंसौ· सरूपैकशेषाद्वि
रूपैकशेषस्य लाक्षणिकत्वेन जघन्यत्वात्· यद्विच सरूपैकशेषे लक्षणा तदाप्योकारांतपदात्तस द्वि
तीयपुंबुद्धौ द्वितीयापेक्षायां तत्पदबोध्यस्य पुमवरुद्धत्वात् लिंगानुरोधात्‌रु लाघवार्थकल्पने मा
नाभावाच्च पुंद्वयमेवावगम्यते· न तु स्त्रीपुंसौ· शिवो नमस्कुर्यादित्यत्र न मस्य शिवातराभावाद्विरूपै
कशेषस्य गत्या शिवपदे न शिवश्च शिवा च लक्षणयोच्यते· भ्रातरौ पुत्रावित्यत्रापि मानांतराणां स्त्री
परत्वज्ञाने भ्रातृपुत्रौ स्वसृदुहितृभ्यामिति विरूपैकशेषात् भ्रातृपदे न भ्रातृस्वसारौ पुत्रपदे न पुत्र
दुहितरौ लक्ष्येते· स्त्रीपरत्वाज्ञाने च तंत्रवृत्त्या उक्तयुक्त्या भ्रातृद्वयं पुत्रद्वयमेवोच्यते· नन्वेवं सोमैव
सानाव्याशीनाद्ध्वीयातामित्यत्राप्योकारांतवसानपदात्तस द्वितीयपुंबुद्धौ द्वितीयापेक्षायां तत्पदबो
ध्यपुमवरुद्धत्वात् रा, लाघवार्थकल्पने हेत्वभावात्· पुंद्वयबुद्धौ पुरुषद्वयविधिरापद्याने स्यात्· वसानपदा एम०
तंत्रवृत्त्यापि स्त्रीपुंसयोर्ज्ञानाभावात्· न चैवं पुमांस्त्रियेत्यादिविरूपैकशेषोच्छेदप्रसंगः। यत्र हि मा

नांतरगत स्त्रीपरत्वधीः तत्र स्त्रीद्वितीयस्य प्रातिपदिकार्थत्वादुभयसमवेतद्वित्वस्य पुंस्यपि संभवादिति विभ
क्त्यातद्गतसंख्याभिधाने विरूपैकशेषसंभवात् उहतु स्त्रियाऽउपनायकाभावात् द्वितीयत्वेन स्त्रिया अ
प्राप्तत्वात्तवसानपदस्योक्तयुक्त्यातदुपस्थापकत्वासंभवात्सरूपैकशेषेणैतेवस्यादिति · मेवं स्त्रीमेवप्र
नावित्यत्र यत्कर्तव्यं तदनया सहेति विधिनाऽप्राधान्ये सहत्वेन प्राप्ततयापत्यैव पुंसः सद्वितीयत्वात् न
त्वप्राप्तेन पुमंतरेण वाक्यभेदापत्तेः । पुंस्त्वं तु विभक्त्या नामार्थगतमेवानूद्यते · न तु नामार्थैकदेशगतं अ
न्यसहितानस्थस्य पुंमात्रस्यैव नामार्थत्वादिति · ॥ ॥ आख्यातस्य यत्नवाचकत्वादन्वेतनेरथो गच्छतीत्यादा
वाख्याते व्यापारलक्षणा · तथाहि । आख्यातस्य पचतीत्यादौ यत्नो वाच्यः पचति पाकं करोतीत्यादि यत्ना
र्थककरोतिना सर्वाख्यातविवरणात् · रूढव्यवहाराद्विवाधकं विना विवरणादपि शक्त्युपपत्तेः । रूढ्यादि
समासस्य विग्रहेण विवरणेऽपि विग्रहार्थे न शक्तिग्रहः अन्यलभ्यत्वात् · किं करोतीति यत्नप्रश्ने पचती
त्युत्तरस्य यत्नार्थत्वं विनाऽनुपपत्तेरित्याचार्याः ॥ ॥ अत्रेदं वदंति आख्यातस्य करोतेश्च न यत्नार्थत्वं · रथो
गच्छति जानाति यतते निद्राति इत्यत्र धात्वर्थानुकूलयत्नाभावेप्याख्यातप्रयोगात् ज्ञानं करोतीति क

२

श्रा॰प्र॰ रोतिनात्तत्राख्यातविवरणाच्च । तत्र व्यापारस्य करोत्यर्थत्वे चेत्तेनैव तथा । न च तत्राख्यातकरोत्योर्गौणत्वं मुख्ये
११६ प्रश्नो बाधकाभावात् । अत एव प्रश्नोत्तरयोर्नैकार्थत्वं किंतु कृञः क्रियावाचकत्वमेव । तेन किं करोतीति क्रियामात्रप्र
श्ने पचति गच्छतीति क्रियाविशेषेणो= मन्ना = त्तरमपि समंजसं भवति । अथ क्रियाजन्यत्वाविशेषेऽपि
११९ तज्जन्यत्वात्तज्जन्यत्वाभ्यां घटांकुरयोः कृताकृतव्यवहारात् तज्जन्यत्वं कृधातुव्युत्पन्नकर्तृपदस्य कृत्याश्रयवा
क्रियामा चकत्वाच्च कृञो यत्नार्थत्वे कृञः क्रियाश्रयः कर्तृपदार्थः स्यात् । तथा च कारकमात्रेऽतिप्रसंगः । एवं च
त्रार्पिते कृञो यत्नार्थत्वे तेन चाख्यातविवरणात्तस्यापि यत्नोऽर्थः । तदुच्यते । कृताकृतविभागेन कर्तृरूपव्यव
स्थया यागएव कृतिः पूर्वापरस्मिन् सैव भावनेति । सैवाख्यातार्थो भावनेति चेत् । न । बीजेनांकुरः कृत
इत्यादिना सुखं कृतं बीजमंकुरं करोतीति यत्नं विनापि व्यवहारात् । कर्तृपदं च नियोगिकं । तथाहि ।
कृञो यत्नार्थत्वे तव्यश्च कृत्यर्थत्वे कर्त्रर्थत्वे वा धातुप्रत्ययार्थयोः कृत्योः [redacted] कृतिकर्त्रोर्वा परस्प
रमनन्वयः । कृतौ कृतिजन्यत्वस्य तद्विषयत्वस्य वाऽभावात् । कृतिविशिष्टस्य कृतिनिरूपकत्वाच्च ।
एवं कृञः क्रियार्थत्वे तव्यश्च क्रियाश्रयवाचकत्वे तयोः परस्परमनन्वय एवेत्युभयदर्शने कर्तृपदं

त्रिपा॰ पं १

कर्मादिपदवद्रूढमेवाहुः। ठिश्च कृत्याश्रयैवेत्यन्यदेतत्। तस्मात्कृतिविभागेन कर्तृरूपस्य वस्तुयाच
नकृतोऽयत्नार्थत्वमिति। किंचाख्यातस्यांशस्य करोतेश्च न यत्नार्थत्वं पाकाय यतते पाकं करोतीत्यादौ य
त्नद्वयस्य यत्नविषययत्नस्य चाप्रतीतेः। प्रकृतिप्रत्ययार्थयोः सामान्यानान्वयानुपपत्तिः। पौनरुक्त्या
त्। एकत्रैव विध्यनुवाददोषाच्च। ननु प्रकृतेस्तदर्थत्वेपि प्रत्ययस्य न तदर्थत्वं दोषः। एको द्वौ ब
हव इति संख्यावत्तीत्यत्र व्यभिचारात्। यत्तु द्वितीयसंख्येच्छादिकल्पनवदिहापि द्वितीययत्नकल्पनमि
ति। तन्न। द्वितीयसंख्येच्छायत्नाभावात्। वस्तुतः प्रत्येकं सामर्थ्यावच्छिन्नो समभेदरूपयोपस्थितेरा
वश्यकत्वेप्येकस्यान्वयेप्यदोषात्। पाकाय यतते पाकं कुर्यादित्यत्र कृत्यर्थकाख्यातत्वयापित
योगिकारादिति चेन्न। एको द्वौ बहव इत्यत्र नामार्थस्य विभक्त्युपनीतसंख्यान्वयावगमयोग्य
त्वात्। तदादेर्यत्ने सामर्थ्यानवधारणात्। तिदः पचेतीत्यत्र कृतौ सामर्थ्यावधारणाच्च। अथाय
त्नार्थकधातुपूरणाख्यातस्य यत्नार्थत्वं ते न यततेत्यत्र नानन्वयः। अचेतनेचाख्यातप्रयोगो गौण
एव। न च वृत्यन्तरेणापि प्रयोगसंभवात्क्तिकल्पनायुक्ता। यद्वाऽनुकूलयत्नप्रवृत्तेर्यदंतदेकदे

शा·म्र· शेनुकूलमात्रे प्रवर्त्तते· विशुद्धिमात्रं पुरस्कृत्य ब्राह्मणोश्रोत्रियपदवत्· अचेतनेषु मध्यमोत्तमपुरुषौन
१२० भवत एव· उपपदयोर्युष्मदस्मदोश्चेतनार्थत्वात्· भवतु वा गौण एव लोकस्यापर्यनुयोज्यत्वादिति
120 चेन्न· अचेतने आख्यातस्य मुख्यबाधकाभावेन गौणत्वाभावात्· तस्मादाख्यातस्यानुकूलत्वेन व्या
पारो वाच्य इति भाट्टाः। ते न· चेतनाचेतनयोर्धात्वर्थानुकूलव्यापारस्य सत्वादाख्यातप्रयोगो मुख्य
एव· नचैवं पथिश्रमभ्रमणेपि पचतीति स्यात्· श्रमभ्रमणं तिद्वारणायनस्य पाकानुकूलव्यापारत्वा
दितिवाच्यं· तत्र यत्नविशेषस्यैवानुकूलव्यापारविशेषस्य वाच्यत्वात्· अन्यथा यत्नवाच्यत्वेपि तं
डुलानुकूलयत्नवति पचतीति स्यात्· एवमचेतनेपि करोतिना आख्यातविवरणात् करोत्यर्थोपि व्या
पारविशेष एव· कथं तर्हि चैत्रः पचतीत्यत्र पाकानुकूलयत्नप्रतीतिः। आक्षेपादिति चेत् न· आ
ख्यातार्थे तद्व्यापारेण संख्यया वा यत्नानाक्षेपात्। तयोः प्रयत्नं विनापि सत्वात्। नापि कर्त्रा द्रव्यमा
त्रस्याकर्तृत्वात्· यत्नवतश्च कर्तृत्वे आख्यातेन तदभिधाने यत्नस्याप्यभिधानात्· नापि धात्वर्थ राम०
मात्रेण· तस्य प्रयत्नं विनापि सत्वात्· नापि यत्नो धात्वर्थः· क्रियायास्तत्फलस्य वा धातुवाच्यत्वा।

तः अन्यथा पाकइत्यत्रापि यत्नानुभवप्रसंगादिति चेत् । न । धात्वर्थविशेषेण पाकादिना यत्नाक्षे
पात् । तस्य यत्नं विनानुपपत्तेः । अथ पचतीत्यत्र पाकयत्नवानिति विवरणाद्यत्नार्थकतेति चेन्न । त
र्हि कर्त्रर्थतापि स्यात् । न हि पाकयत्न इत्येव विवरणं पचतीत्यस्य तात्पर्यविवरणं तत् । तच्चाक्षेपेणा
पि निर्वहतीति चेत् । तुल्यं यत्नेपि । कथं तर्हि रथो गच्छति विद्यते व्योमेति भावनानुभव इति चेत् ।
न कथंचित् । भावनाया धात्वर्थान्वयायोग्यत्वेन त्वयापि तत्र गौणत्वाभ्युपगमादिति । उच्यते ।
चैत्रः पचतीत्यत्र पाकानुकूलयत्नानुभवाद्यत्न एवाख्यातार्थो लाघवात् । न त्वनुकूलो व्यापारः ।
यत्नत्वापेक्षया व्यापारत्वस्योपाधित्वेन गुरुत्वात् । न चाचेतने व्याख्यातस्य मुख्यत्वार्थमनुगतो
व्यापार एव शक्यः मुख्यत्वसंभवे न त्यागायोगादिति वाच्यं । शक्तिग्राहकेण लघुनि शक्तिपरिच्छे
दात् । अचेतने प्रयोगस्य वृत्त्यन्तरेणापि संभवात् । मुख्यत्वार्थं शक्तिकल्पने च वृत्त्यन्तरोच्छेदः । ए
तेन व्यापारवाचकाख्यातस्य यत्नसाध्यार्थपच्यादिधातूपसंदानेन व्यापारविशेषयत्नोपस्था
पकत्वमिति निरस्तं । लाघवेन यत्नस्यैव शक्यत्वात् । ननु यत्नो नाख्यातार्थः पाकत्वेन पाकस्य

श·मू· यत्नसाध्यत्वानुमित्यायत्नत्वाभावादित्युक्तमितिचेत्‌· चैत्रः पचतीत्यत्रचैत्रः पाकानुकूलवर्तमानयत्न
१२१ वानप्रतीयते· नचपाकस्यवर्तमानयत्नेनव्याप्तिरस्ति· अतीतानागतेव्यभिचारात्‌· नचधात्वर्थेनानु
121 मितेयत्नेआख्यातेनवर्तमानत्वान्वयबोधः संभवति· यत्नस्यापदार्थत्वात्‌· स्वार्थव्यापारस्यवर्तमा
नत्वबोधनेनाख्यातस्यपर्यवसितत्वाच्च· अथचैत्रः पाकानुकूलवर्तमानव्यापारवानितिप्राग्
बोधानंतरंचैत्रः पाकानुकूलवर्तमानयत्नवान्चेतनत्वेसतिपाकानुकूलवर्तमानव्यापारवत्त्वा
त्मैत्रवत्‌· अनुमानंविनापियत्नवर्तमानत्वज्ञानमाख्यातस्यपर्यंशक्तिभ्रमादितिचेत्‌· न· यत्नाभा त्न
वकालेपितज्जन्यव्यापारस्यवर्तमानतयाव्यभिचारात्‌· किंच· व्यापारस्यवाच्यत्वेतल्लिंगकंचव
र्तमानयत्नानुमानमितिकल्पनाद्वैरूप्यत्वेवाच्यत्वलाघवात्‌· नचाचेतनेआख्यातस्यव्यापारवा
चकत्वावधारणादेवंकल्पनेतियुक्तं· गौणतयाभ्रान्तिभ्रमेणवातत्राख्यातात्व्यापारावगमोपपत्तेः· य
त्नविगमदशायांतज्जन्यव्यापारकालेपचतीत्यत्रवर्तमानव्यापाराभिधानमाख्यातेनलक्षणया· णम॰
यथारथोगच्छतीत्यत्र· अतोन्यत्नस्यसत्त्वात्तदनुरोधेनव्यापारेशक्तिः· अन्यथातवापियत्नकाले

पचतीति न स्यात्‌ । तस्मादाख्यातं यत्नवाचकं आख्यातत्वात्‌ लिङाख्यातवत्‌ । तर्कश्चोक्त एव । एतेन
फलानुकूलो व्यापारो धात्वर्थः । आख्यातवाच्यः संख्यैव । तेन चैत्रः पचति रथो गच्छतीत्यत्र चैत्ररथयो
र्धात्वर्थानुकूलव्यापारवत्त्वप्रतीतेर्मुख्य एव प्रयोगः । पचतीत्यत्र यत्नलाभो धात्वर्थेनाक्षेपात्‌ । विक्लि
त्त्यनुकूलव्यापारस्य यत्नं विनानुपपत्तेरिति गुरुमतमपास्तं । पचतीत्यत्र पाकानुकूलो वर्तमानत्वस्य यत्न
स्ये पादलाभे नाख्यातार्थत्वात्‌ । यत्तु रत्नकोशकृतोक्तं । धात्वर्थो व्यापारः । आख्यातार्थ उत्पादना ।
सा चोत्पादकता । सैव भावना । पचतीत्यादावाख्यातस्य पाकमुत्पादयतीति विवरणात्‌ । धात्वर्थोत्पा
दकता च चेतनाचेतनयोरिति सर्वत्राख्यातप्रयोगो मुख्य एव । प्रयतते जानातीत्यादावपि प्रयत्नं ज्ञान
मुत्पादयतीत्यर्थः । न तु व्यापारो यत्नो वाख्यातार्थः । यतते इत्यादौ मुख्यत्वे सति गौणत्वस्यान्या
य्यत्वात्‌ । आख्यातार्थविवरणे करोत्यर्थो ह्युत्पादकतैव । पाकं करोतीत्यादौ करोतीत्यस्योत्पादयती
ति विवरणात्‌ । घटं करोतीत्यत्र कृञर्थ उत्पत्तिरेव गम्यते । अत एव किं करोतीति सामान्येनोत्पादनाप्र
श्ने पचतीति पाकोत्पादनाविशेषेणोत्तरमपि सम्प्रज्ञसं । चैत्र उत्पादयतीत्यत्र धात्वर्थ एवोत्पादनाचै

श·मू· त्रेणान्वेति · आख्याताऽर्थ उत्पादनाऽऽव्यन्विते · उत्पत्तेरुत्पत्त्यभावात् · वस्तुतस्तु उत्पादयतीत्यत्र धात्वर्थ एवो
१२२ त्पादनाश्रितोऽनुत्पादपरधात्वर्थस्तद्वर्त्तिन आख्यातप्रत्ययस्यानन्यलभ्यतया उत्पादनावाच्या · पचती
122 त्यादौ च यत्नलाभः पाकादिना धात्वर्थेनाक्षेपात् · न तूत्पादनमात्रेण व्यभिचारादिति । तदप्यत एव
निरस्तं · पचतीत्यत्र यत्नप्रतीतेर्यत्न एवाख्यातार्थो लाघवात् · न तूत्पादकत्वं · उपाधितया गौरवात् · पा
कानुकूलवर्त्तमानयत्नस्याक्षेपादिना यत्नलाभाच्च · वस्तुतस्त्वत्र जानातीच्छति यतत इत्यत्र ज्ञानादिम
त्त्वं चैतन्यस्य प्रतीयते न तु तदुत्पादकत्वमचेतने ज्ञानोत्पादके शब्दलिङ्गेन्द्रियादौ जानातीत्यादिप्रयोग
प्रसंगात् · घटं जानातीति ~~तस्माल्लाघवात्पचतिप~~ त्युक्ते घटज्ञानवानेवेति संप्रत्ययापत्तेश्च · अचेत
नस्यापि ज्ञानोत्पादकत्वात् · शब्दादिकं ज्ञापयतीति चानुभवो न तु जानातीति । तस्माल्लाघवात्पचतिप
क्ष्यति अपाक्षीदित्यत्रातीतानागतवर्त्तमानयत्नप्रतीतेश्च यत्न आख्यातवाच्यः तेन यत्नस्य वर्तमा
नत्वादिकमाख्यातेनाभिधीयते · प्रकारान्तरेण तदलाभात् · जानातीच्छति यतते निद्रातीत्यत्र धा राम॰
त्वर्थो यत्नादिश्चैत्रेणान्वेति यत्नादिमांश्चैत्र इत्यनुभवात् · धात्वर्थे च यत्नादौ नाख्यातार्थयत्नान्व

यःयत्नादिविषयकयत्नस्याभावात्· रथो गच्छतीत्यत्र चाख्याते व्यापारे लक्षणा तेन गमनानुकूलव्यापारव
त्वमात्रं रथस्य प्रतीयते· अथ पाकानुकूलैकैककृतिकाले पचतीतिवत् कृतेरत्ययेऽग्रिमकृतेरनुत्पादे
च मध्येऽपाक्षीत् पक्ष्यतीति च स्यात्· न च धुवपदवत् कृतिप्रचयस्य शक्यत्वात् प्रचयध्वंसे प्रागभावे
चापाक्षीत् पक्ष्यतीति प्रयोग इति वाच्यं· एवं हि पचतीति न स्यादेव· एकदा कृतिप्रचयस्याभावात्· अ
थ मूर्तत्वविच्छेदः कृत्यभावनिरूपणत्वं· कृतिकाले च कृत्यभावो नास्ति· प्रतियोगिज्ञातीयवत्त्वस्याभाव
स्यासत्त्वादिति चेत् न· प्रागभावध्वंसयोः कृतिविशिष्टप्रतियोगित्वेन प्रतियोगिकालेपि सत्त्वात्· त
योः सकलकृतिप्रतियोगिकत्वासंभवात्· ननु फलायोगव्यवच्छिन्ना कृतिः शक्या· अत एव पाकानु
कूलतंडुलक्रियाकाले पचतीति न प्रयोगः। एवं चरमकृतिकाले पचति तत्प्रागभावकाले पक्ष्यति तद्ध्वं
सकाले चापाक्षीदिति मुख्यः प्रयोगः· तत्पूर्वं पचतीति गौण एवेति चेत्· तर्हि मध्येपि पक्ष्यतीति स्या
त्· तदा चरमकृतेरनागतत्वात्· एवं व्यापारप्रचयस्याख्यातार्थत्वे धात्वर्थत्वे वा मध्येपि पक्ष्यति अपाक्षीदि
ति स्यादिति· ॥ उच्यते· यत्राख्यातवाच्ये प्रचये एकैकस्य वर्तमानव्यवहारनिमित्तत्वात् तत्र तावतां ध्वंसेः

धा॰ भू॰ प्रागभावेभूतभविष्यद्व्यवहारः नतुवर्त्तमानव्यवहारनिमित्तंकिंचिदभावात् अचेतनाचेतनयोर्भोक्तृत्वेमना ग
१२२ दौतथैवप्रयोगात् प्रयोगेसतिनिमित्तानुसरणात्· धातोराख्यातस्यवाधात्वर्थानुकूलव्यापारवाचकत्वक
1276 ल्पनेदिभिरथनन्यगतिकतयातथैवस्वीकाराच्च· स्यादेतत् चैत्रस्तंडुलंपचतिचैत्रेणतंडुलाः पच्यन्तेइत्यत्रक
र्तृकर्मणोर्वाऽऽख्यातार्थसंख्यान्वयात् कर्तृकर्मणी अपितत्रलकारवाच्ये· तेनवाच्यगामिनीसंख्येति
नियमोभवति· अन्यथाक्षिप्तसंख्येयमात्रान्वयेनियमोनस्यादितिवैयाकरणाः तन्न कर्तृगतासंख्या
यत्रवाच्यातत्रकर्त्रातदन्वयः प्रतीयतेइत्युपपत्तेः कर्तृगतैवसंख्यैकवाच्येतिचेत्· कर्त्तैकवाच्यइतितु
ल्यंयत्रकर्तृगतासंख्याप्रतीयतइतिचेत्· न· अन्योन्याश्रयात्· कर्तुर्वाच्यत्वेतद्गतसंख्याधीस्तद्गतसं
ख्याप्रतीत्याचवाच्यतेति· मत्राख्यातेनकर्तुर्विवक्षातत्रकर्तावाच्यइतिचेत्· कर्तृगतसंख्याविवक्षायत्र
तत्रसावाच्येतितुल्यं· एवंकर्मण्यपिनश्नकंच· किंतुतद्गतसंख्यैवाकर्तृकर्मणीलकारवाच्येइत्यस्यायमर्
र्थः तद्गतसंख्यावाच्येति· संप्रदायस्तु· संख्येयमात्रसाकांक्षापिसंख्याभावनान्वयिनैवान्वेति· एकपदो पा॰
पात्तत्वप्रत्यासत्तेः भावनाचव्यापारत्वेनशब्दप्रातिपदिकार्थमाकांक्षतीति· नतुकर्मकारकादिः द्वितीया

आश्रित
त्वात्·

दिनात्तस्य व्यापारवत्त्वेनोपस्थितेः· अत एव न कर्माद्यपि व्यापारमाकांक्षतीति· अत एव प्रथमादिनिर्दिष्टनैव
न्वयः। प्रातिपदिकस्यापि क्रियान्वयार्थं व्यापाराकांक्षित्वात्· १५ इत्थं चाग्निनाचैत्रस्तण्डुलं पचतीत्यत्र कर्ता
।= भावना= चैत्रेण पच्यते तण्डुल इत्यत्र कर्म· अतस्तत्रैव भावनान्वय इति संख्यान्वयोपि तत्रैव· तदुक्तं यं यं भावना
नुधावति तं तं संख्यापीति स्थितिरिति· स्यादेतत्· चैत्रस्तण्डुलं पचतीत्यत्र भावनान्वयश्चैत्रे संभवति· आश्रय
त्वात्· चैत्रेण पच्यते तण्डुल इत्यत्र भावनान्वयस्तण्डुलस्य न विषयतया। यत्र स्वविक्लित्त्यनुकूलव्यापारवि
षयत्वात्· विषयत्वेनान्वयि वा तण्डुलं पचतीत्यत्रापि तण्डुलस्य विषयत्वेन भावनान्वय इति तद्वदेव संख्या
स्यात्। नाश्रयतया· तत्रापि नैत्र चैत्रेपि न यत्नान्वयः। तृतीयार्थ· यत्नेनैवावरुद्धत्वात् इत्यनन्वितैव तत्र भा
वना· अचेतनेच भावनान्वयाभावात् कथं संख्यान्वयनियम इति· न· यत्नविशिष्टे संख्यान्वयात्· चैत्रस्तण्डु
लं पचतीत्यत्र तण्डुलस्य कर्मत्वेनान्वयात् तण्डुलवृत्तिफलजनकव्यापारजनकयत्नाश्रयश्चैत्र इति प्रती
यत इति स विशिष्टः। चैत्रेण पच्यते तण्डुल इत्यत्र चैत्रवृत्तियत्नजन्यव्यापारजन्यफलाश्रयस्तण्डुलः प्रती
यत इति यत्नस्य परंपरया तण्डुल एव विशिष्टः· एवं च यद्यप्युभयत्र चैत्रः कर्ता तण्डुलः कर्म· तथापि यत्नविशि

शा.म. ष्येसंख्यान्वयः चैत्रो ग्रामं गच्छतीत्यत्र ग्रामवृत्तिफलजनकव्यापारजनकव्यापाराश्रयो रथः प्रती
१३४ यते। रथेन गम्यते ग्राम इत्यत्र रथवृत्तिव्यापारजन्यव्यापारजन्यफलाश्रयो ग्राम इति तत्रापि विशेष्ये संख्या
124 न्वयः न चैवं यत्नस्य व्यापारस्य च विशेष्येण संख्यान्वये नियामकमननुगतमिति वाच्यं। आख्याततात्प
र्यविषयस्य विशेष्ये संख्यान्वयात्। स च यत्नो व्यापारो वा चैत्रेण सुप्यत इत्यत्र न चैत्रो भावनाविशेष्यः।
तृतीयार्थावरुद्धत्वात्। कर्मं च ~~संख्योस्तत्रासाधुत्वमेव। तदुक्तं आक्षेपलभ्ये संख्येये नाभिधानस्य कल्पना~~
~~संख्येयमात्रत्व~~ नास्त्येव। अतो धात्वर्थ एव भावनाविशेष्यः फलत्वाद्विषयत्वादेति तत्र संख्यान्वयः द्वि
वचनबहुवचनयोस्तत्रासाधुत्वमेव। तदुक्तं आक्षेपलभ्ये संख्येये नाभिधानस्य कल्पना। संख्येयमात्रला
भेपि साकांक्षत्वेन व्यवस्थितिरिति। इदमेव कर्तुः कर्मणः आक्षेपलभ्यत्वं यद्भावनाविशेष्यत्वे सति प्रथ
मांतपदोपस्थाप्यत्वं। न तु संख्यालिंगकानुमितिविषयत्वं। अनुमित्या संख्येयमात्रगतत्वेन संख्याप्रतीतेः
ननु नामार्थे भावनान्वयेपि संख्यान्वयः प्रथमोपनीतसंख्यान्वयेन तस्य निराकांक्षत्वात्। न च प्रथमा न सं ल्ल॰
ख्यावाचिका किंतु प्रयोगसाधुरिति वाच्यं। चैत्र इदानीं राजेत्यत्र केवलादप्येकत्वप्रतीतेः। अन्यथा प्रथमा

पस्थितसंख्यायाः कर्तृकर्मणोरन्वयेन संख्यानतिदः-र्थ इत्यपि कल्प्यतेति चेत्॰ न॰ एकैवसैहि संख्या प्रथमा
ख्याताभ्याममभिधीयते॰ सामानाधिकरण्यानुरोधात्॰ यथा चैत्रो दंडीत्यत्र॰ अन्यथा त्वन्यतेणाख्यातेन चै
त्रसंख्याभिधानात् प्रथमार्थसंख्यान्वयश्चैत्रे न स्यात्॰ ओदनकामः पचेतेत्यत्र त्वपाधेयैव रीतिः। अभ्यु
पगंतव्या॰ तत्र कर्तुरवाच्यत्वादिति वक्ष्यते॰ अथ कर्ताप्याख्यातवाच्यः चैत्रः पचतीति सामानाधिकर
ण्यात्॰ अन्यथा नामाख्यातयोर्भिन्नप्रवृत्तिनिमित्तकत्वेप्येकत्रवृत्त्यभावेन सामानाधिकरण्यं न स्यादि
ति चेत्॰ न॰ नीलः पटः चैत्रः पचति पच्यते तंडुल इत्यादौ नाम्नोर्नामाख्यातयोर्वा एकसंख्यावाचकत्वमे
वहिशब्दं सामानाधिकरण्यं न तु भिन्नप्रवृत्तिनिमित्तस्यैकत्रार्थे वृत्तिः गौरवात्॰ ओदनकामः पचेते
त्यादौ व्यभिचाराच्च॰ विध्याख्यातस्य हि कृतिशून्यस्य नामसामानाधिकरण्यं॰ तयोरेकसंख्याभिधायकत्वा
त्॰ नत्वेककर्तृवाचकत्वेनात्रापि कर्तृवाच्यत्वे तस्येष्टसाधनत्वबोधनेन प्रवृत्तिः तस्यासाध्यत्वात्॰ अ
योग्यतया कर्तारं विहाय कृतिविषये पाके पाकविषयकृतीष्टसाधनतान्वये कर्तुरनन्वयादप्रतीतेश्च [लौदे]
नाभिधेयत्वं॰ पचतीत्यस्य पाकयत्नवानिति विवरणात् कर्ता वाच्य इति चेत्॰ न॰ द्वंद्वसमासस्य विग्रहेणाविव

२

शा·मू· णोपिविषयतार्थक्रियाभावेनव्यभिचारात्·कर्तुरन्यलभ्यत्वेनावाच्यत्वव्यवस्थितोविवरणस्यतात्पर्यवि
१२५ षयज्ञापकत्वात्·कर्तरिशक्तिभ्रममूलकत्वाद्वा·वस्तुतः पचतीत्यत्रयत्नवतः शक्यत्वेधात्वर्थस्यविषयत्वेन
साध्यत्वेनवाकृतावन्वयोनस्यात्·इतरपदार्थविशेषणतयोपस्थितेपदार्थैकदेशेचेतरपदार्थस्यानन्व
125 यात्·राजपुरुषमानयेत्यत्रराज्ञइवानयनेऽपदार्थैपदार्थान्वयस्यव्युत्पत्तिसिद्धत्वात्·यत्नस्याश्रितत्वे
नोपस्थितस्येतरत्रानाकांक्षितत्वात्·पाकयत्नवतोरन्वयेचयत्नवत्साध्यः पाकः पाकजनकोयत्नवानिति
धीः स्यान्नतुपाकयत्नयोर्विषयविषयिभावधीः पाककर्तृत्वस्यापिनपाकस्यकृतावन्वयः कृतेरपदा
र्थत्वात्·किंतुकृत्याश्रयः पाकस्यजनकइतिप्रतीतिः अतएवापचत्यपिपाचकपदप्रयोगात्ण्वुलःकृ
तियोग्यतावाच्येतिनिरस्तं·पाकस्यकृतावनन्वयप्रसंगादितिपाचकपदंतत्रगौणमेव·ननुकर्तृकर्म
णोर्लकारवाच्यत्वेनाभिहितेकर्तरिकर्मणिवाऽनभिहिताधिकारीयाकर्तृकर्मविभक्तिर्नभवति·किंतु
प्रथमैव·लकारेणतयोरनभिधानेचैत्रेणपचतितंडुलश्चैत्रः पच्यतेतंडुलमित्याद्यपिस्यादितिचेन्न·क णम०
र्तृकर्मगतसंख्याभिधानानभिधानाभ्यामेवाभिहितानभिहितकार्योपपत्तेः तादृशप्रयोगस्यासाधुत्वा

च्च· साधुत्वे हि सत्यनुशासनं· न त्वनुशासनानुरोधेन साधुत्वं· ग्राममगामादौ साधुत्वापत्तेश्च· ॥ नचैनार्त्तः·
सुपः प्रकृत्यर्थानुगतस्वार्थसंख्याबोधकत्वं· तिङः प्रथमान्तपदार्थगतस्वार्थसंख्याबोधकत्वमिति व्युत्प
त्तिरेव· व्युत्पत्तिश्च तत्तदाभाव्य· तत्र च फलेनान्वेयं· प्रथमान्तपदार्थः कर्त्ता कर्म च· अत एव चैत्रेणास्पृश्यत इत्य
त्र प्रथमान्तपदार्थाभावान्न संख्यान्वयः। न च धात्वर्थे संख्यान्वयः स्यात् एवं द्विबहुत्वेपि द्विबहुवचनयोर
भावात्· सुप्यत इत्येव प्रयोगात्· अत एव च स्वापमात्रावगमादाख्यातार्थे यत्न संख्यायोऽनन्वये आख्यात
प्रयोगमात्रे साधुः तिङं विना धातोः केवलस्यासाधुत्वात्· अतो न संख्यान्वयानुरोधेन कर्तृकर्मणी लका
रवाच्ये॥ ॥वयं तु ब्रूमः॥ चैत्रेण पच्यते तण्डुलो रथेन गम्यते ग्राम इत्यत्र तण्डुलः ग्रामौ कर्मणी प्रतीयेते·
अस्ति च तयोः परसमवेतक्रियाफलशालित्वं कर्मत्वं· तच्चाख्यातवाच्यमेव· तण्डुलं पचतीत्यत्र द्वितीया
त इवान्यतः कर्मत्वालाभात्· तस्मात् कर्तृत्ववत् कर्मत्वमपि लकारवाच्यं· तद्भिन्नयोः कर्तृकर्मणोरन्यत एव
लाभादिति॥ ॥धात्वर्थः फलमिति मण्डनाचार्याः· तथा हि पच्यर्थो विक्लित्तिर्लोके तत्तान्न तु विक्लि
त्तिफलजनकः स्पन्दः· हन्तेरपि मरणमर्थः न तु तज्जनकफलको व्यापारः· स्वेच्छाभिघातादिः गौरवात्· यत्न
को व्यापारसंबन्धः संकोचनादिः गौरवात् गमेरुत्तरसंयोगः पतेरधःसंयोगः त्यजेर्विभागोर्थः न तु तज्जनकफल १

शा० म० त्यर्थोपि देवतोद्देश्यकत्यागफलं स्वत्वध्वंस एवन्तु होत्यर्थः स्यागफलं प्रक्षेपः ददात्यर्थः संप्रदानस्वीकरणपूर्वं
१२६ कत्यागफलं स्वत्वध्वंसः परस्वत्वं च न तु तत्फलत्यागः गौरवात्· नन्वेवं व्यापारविरामे फलदशायां पचति दद
126 तीत्यादिप्रयोगः स्यात् न त्वपाक्षीद् दित्यादि व्यापारकाले पचतीत्यादि न स्यादिति वाच्यं· धात्वर्थानुकूलव्या
पारवर्तमानत्वमाख्यातार्थः· तेन व्यापारकाले पचतीत्यादि भवति न तु व्यापारविरामे· न च स्पन्दजन्यसंय
योगविभागाश्रयत्वेनाकाशं गच्छति पतति त्यजतीति स्यात्· विनश्यद्वस्थकर्मणि च न स्यात्· संयोगा
द्यभावादिति वाच्यं· व्यापारवति व्यापारकाले आख्यातप्रयोगात्· नन्वेवं धात्वर्थत्वेन फलं क्रियातधात्व
तंडुलं पचतीत्यादौ तंडुलादेः कर्मता न स्यात्· विक्लित्यादिरूपक्रियाजन्यफलशालित्वाभावादिति चे
त्· न· परसमवेतव्यापारफलशालित्वं कर्मत्वं स च व्यापारो धात्वर्थ आख्यातार्थो वेत्युभयथापि परसम
वेतव्यापारफलशालिनस्तंडुलादेः कर्मत्वं· विक्लित्यनुकूलादि व्यापारकाले पाको वर्तत इत्यत्र पाकपदे
व्यापारलक्षणलाघवेन विक्लित्तेः शक्यत्वात्· जानातीच्छति यतते विद्यते तिष्ठतीत्यादौ ज्ञानेच्छाप्रयत्न राम०
सत्तागतिनिवृत्तिरेव धात्वर्थः· न ज्ञानादि फलं न वा ज्ञानाद्यनुकूलो व्यापारः· ज्ञानादिमत्वमात्रप्रती

तेरिति॥ अत्रोच्यते। ओदनकामः पचेतेत्यत्र विधिप्रत्ययेन धात्वर्थे प्रवृत्त्यर्थं कृतिसाध्यत्वमिष्टसाधनत्वं
च बोध्यते। न च फले विक्लित्त्यादावोदनसाधनत्वं। न वा फले प्रवृत्तिः संभवति। उपायमकृतित एव तत्सि
द्धौ फलस्य साक्षात्कृत्या साधयितुमशक्यत्वात्। उपायकृतिसाध्यमेव हि फलं। ननु तदन्यकृतिसाध्यं
उपायकृतित एव तत्सिद्धेः। अथ संतापनादेः कृतिसाध्येष्टसाधनत्वं विना विक्लित्त्यर्थमप्रवृत्तेरु
पाय एवार्थः संतापनादिर्व्यापारः प्रवृत्तिविषयत्वात्। कृतिसाध्यत्वेनेष्टसाधनत्वेन च विधिप्रत्यये
न बोध्यत इति फलानुकूलो व्यापार एव धात्वर्थः। अथोपायस्य कृतिसाध्यत्वज्ञानं प्रवर्तकमिति स
त्यं। किंतु विधिबोधितफलकृतिसाध्यत्वेन तदुपायकृतिसाध्यत्वमाक्षिप्यते तेन विना तदनुपपत्तेरि
ति चेत्। न। व्यवहारात् प्रवृत्तिजनकज्ञाने विधिप्रत्ययस्य शक्तिग्रहात्। प्रवृत्तिसाक्षादुपपादकविषयत्वा
त् कल्पनायाः। एवं पचिगमियजिजुहोतिददातीनामपि व्यापार एव वाच्यः फले प्रवृत्त्यसंभवात्। त
त्र पच्यर्थोऽधःसंतापनमेव। तच्च रूपरसगंधपरावृत्तिफलाविनाभूतं संतापनं च विक्लित्त्योदनरूपादिप
रावृत्तिजनकतावच्छेदकोऽवश्यं वाच्यः। अन्यथा फलार्थमधःसंतापनेऽप्रवृत्तेः। व्यापारस्याख्यात

शा·मू· वाच्यत्वे च विशेषस्यावश्यवाच्यत्वात् । पच्यर्थेपि फलं न विशेषणांतत्वोपलक्षणं लोके ऽधः संतापनविशेष
१२३) स्य रूपादिपरावृत्यव्यभिचारेणाव्यावर्त्याभावात् । वेदे ऽधः संतापनमात्रं पाकपदार्थः । कृष्णलं श्रपयेदि
त्यादौ फलाभावात् । अस्तु वोपलक्षणं रूपादिपरावृत्तियोग्याधः संतापनं पाकपदार्थः । योग्यता तु संता
127 पने कृष्णलादावप्यस्ति । गमेः स्पंद एव विशेषो वाच्यः । न तूत्तरसंयोगजनकत्वेन स्पंदस्य वाच्यता । सर्वस्य
दानात् तथात्वेन व्यावर्त्याभावात् । स्पंदे च विशेषः संयोगविभागजनकतावच्छेदकः सर्वसिद्ध एव । त्यजेः
श्च कर्ममात्रं शक्यं । न तु एवं देशविभागफलककर्मत्वेन शक्यत्वं । सर्वकर्मणां तथात्वे व्यावर्त्याभावात् ।
त्यजतीति प्रयोगे च तद्बुद्धिर्निमित्तं । पतयंत त्यर्थोपि हि कर्मविशेष एव । गुरुत्वासमवायिकारणप्रयोज्या
धः संयोगफलकः । फलं तु कर्मविशेषपरिचायकमात्रं । मन्नति ददाति तु होतीनामिदं न ममेत्यादितत्त
त्संकल्पविशिष्टस्वत्वत्याग एव वाच्यः । संकल्पे च विशेषस्तद्विषयकृतस्तत्तत्फलविशेषजनकतावच्छेद
कः मानसप्रत्यक्षसिद्ध एव । न तु तत्तत्फलजनकसंकल्पविशेषे शक्तिगौरवात् । देवतोद्देश्यकस्वस्वत्वध्वं एम
सफलकत्यागत्वं संप्रदानस्वीकारेण पूर्वस्वस्वत्वध्वंसफलपरस्वत्वापत्तिफलकत्यागत्वं देवतोद्देश्यक

प्रत्येपफलकत्वप्रमात्वंचात्तत्संकल्पविशेषपरिचायकमिति। उपसर्गास्तु द्योतका न वाचकाः द्योतकत्वं
च धातोरर्थविशेषेतात्पर्यग्राहकत्वं। तदुपसंदानेनतत्रशक्तिर्वा न तु धात्वर्थाभिधायकत्वं। येनरू
त्यापत्तेः ननु प्रजयतीत्यादौ प्रकर्षस्यविजयतइत्यादावतिशयस्याभ्यागच्छतीत्यादावाभिमुख्य
सामीप्ययोः प्रतीतावुपसर्गान्वयव्यतिरेकानुविधानात् पदांतरवदत्रापिशक्तिः न च प्रतिष्ठतइ
त्यत्रागतिधीर्न स्यात्। प्रशब्दस्य प्रकर्षवाचित्वेनातिष्ठ्येनागमनार्थताधीप्रसंगादिति वाच्यं। त
त्र प्रशब्दस्य धात्वर्थविरुद्धार्थत्वात्। तत्रागमनमेव। धातोरिव तस्याप्यनेकार्थत्वात्। न च धातोः सार्थकत्वकॢप्तमतस्त
त्रानेकार्थताकॢप्ताउपसर्गेष्वेवमिति वाच्यं। धातूनां बहुत्वाल्लप्रकर्षवाचित्वेगौरवान्न किंतु प्रशब्दस्येति तस्यापि सार्थ
कत्वात्। धातोरनेकार्थत्वकॢप्तं तदभियुक्तैः। नोपसर्गस्येति चेत्। तर्हि धातोर्नानार्थत्वेउपसर्गानुविधानमर्थवि
शेषेन स्यात्। धौत्रत्तादिपदेतथादर्शनात्। उपसर्गस्यापिशक्तत्वेधात्वनुविधानं न स्यादिति चेत्। साधुत्वार्थं तत्र
तदनुविधानं। तेन विनाप्रयोगाभावात्। ननु शक्तौ धातोस्तच्छक्तावेवतदपेक्षेति वैषम्यं। अथ प्रजयत्यागच्छती
त्यादौ सामान्यवाचकात् धातोरेवप्रकर्षसामीप्यादिविशिष्टस्य विशेषस्योपस्थितिः। तात्पर्यग्राहकमात्रमुपस

श॰सू॰ गेद्द इति चेत् न· प्रकर्षादेर्विशेषस्याशक्यत्वेन तत्र लक्षणाया युगपद्वृत्तिद्वयापत्तेः· एतेनाभ्यागच्छतीत्यादौ सामीप्यादि
१२८ विशिष्टधात्वर्थप्रतीतेर्वाचकत्वात् प्रतिष्ठत इत्यादौ धातोरेव गमनार्थत्वात् तात्पर्यग्राहकस्तु प्रशब्दः। अन्यथा धातू
पसर्गयोर्विरोधे नानन्वयापत्तेः· एवं यत्र धातूपसर्गयोर्विरोधः तत्र द्योतकत्वमन्यत्र वाचकत्वमिति मतमपास्तं· आ
गमनविरोधिगमनस्यैव प्रशब्दार्थत्वात्॥ ॥अत्रोच्यते आख्यातस्य धात्वर्थेन सह स्वार्थान्वयबोधकत्वमतः प्र
तिष्ठत इत्यत्र गमनं धात्वर्थ एव· प्रशब्दार्थत्वे प्रकर्षस्य भावनान्वयो न स्यात्· प्रकृतिप्रत्यययोः संभूयान्वयबोध गमनस्य
कत्वनियमात्· एवं च प्रोक्तरीत्या त्वेन गमने शक्तिरिति प्रशब्दः शक्यवच्छेदको न शक्त इत्यौपसंदानिकी शक्तिरेव
द्योतकत्वं·॥प्रकर्षाभिमुख्यसामीप्यादिरूपसर्गवाच्यत्वेपि तद्विशिष्टधात्वर्थान्वयः संभवत्येव· भावनायाः।
ओदनं पचतीत्यत्रौदनविषयकपाकान्वयवदिति यद्यपि॥ तथापि उपसर्गस्य शक्तितावच्छेदकत्वान्न शक्तत्वे
गौरवात्· तथा च प्रोक्तरीत्या त्वेन प्रकृतिप्रत्यये सक्तिः। एवं हि नस्तु कृत विशेषणशक्तेः विशेषणविषयत्वमात्रं कल्प
ते अन्यथा सन्त्यं तरमेव [illegible] नचैवं जिपूर्वप्रत्वेन तत्रैव शक्तिरिति क्षितिवाच्यं॥ त्वे धात्ववाच्यत्वे भावनान्वे [illegible] २०॰
गात्॥ प्रतिष्ठत इत्यत्र उपसर्गस्य स्वपच्छेदकत्वकल्पनाद्या। अथवा प्रतिष्ठत इत्यत्र विरोधिलक्षणया धा
न्वय·

तोऽर्थमनोपस्थितितात्पर्यग्राहकः प्रकरणः ॥ अनन्यलभ्यस्य शब्दार्थत्वात् प्रजयतीत्यादावपि विशेष्यावाच-
कस्य धातोर्विशिष्टे लक्षणा वा विशेष्यादि प्रतीतस्यान्यत्वात् ॥ प्रादेस्तु तात्पर्यग्राहकत्वं न हि शक्तिं विनापि धा-
तुं तां प्रतीति संभवे तत्कल्पने महीः अनन्यलभ्यस्य शब्दार्थत्वात् । व्यतिसरत्यादौ तु लुप्तस्मृतो धातुरेवार्थप्रत्याय-
कः ॥ धातुलोपमज्ञानतस्तत्रार्थप्रत्ययाभावादिति कृतं प्रसक्तानुप्रसक्त्या । स्मादेतन्नातथापि संकेतग्रहे चेष्टातोऽप्य-
नुभवसंभवात् शब्दवत् सापि प्रमाणं । अतश्चत्वारि क्व प्रमाणानीति निचेत् । उच्यते । शब्दे न चेष्टायां संकेतग्रहात् शब्दस्मृत्यु-
पयोगिनी चेष्टा लिपिवत् । शब्द एव प्रमाणं मध्ये कृतत्वात् । तत्त्वेवं कथमेदमूकस्य व्यवहारः तस्य शब्दस्मरणादि-
ति चेत् न । अक्लृप्तत्वात् चेष्टापीतस्य न शब्देन संकेतग्रहानमानांतरेणेति समयाग्रहात् । न शब्दवच्चेष्टापि प्रति-
कुटिलैवाव्यवहारस्त्वेदमूकस्य यदैतद्विषयाममप्रवृत्तिर्निवृत्तिर्वा तस्याभिप्रेता भवति तदा मामुद्दिश्यायमेतत्क-
रोतीति अन्वयव्यतिरेकाभ्यां व्याप्तिग्रहात् तयाभिप्रायमनुमायप्रवृत्तिनिमित्तं लोकः शब्दं कुशलाभिज्ञतादिवकविनुर-
मादेः । न च कृतसमयापि चेष्टाऽभिप्रायमनुमापय प्रवर्तिकास्तु किं शब्दस्मरणेनेति वाच्यं । अविनाभावा-
र्थं न चैवं शब्देप्यभिप्रायानुमानादेव प्रवृत्त्यादिकं मस्त्विति वाच्यं ॥ शब्दादेवं प्रत्येमीत्यनुव्यवसायात् तदनुभावक-
त्वे स्थिते तदनुकूलशक्तिकल्पनात् । शाब्दे मूकादौ तु मानाभावात् । तत्र वृत्तेरन्यथोपपत्तेः । एवं अन्यत्रापि

१२

१

शा॰सू॰ शाब्दप्रयोजकत्वे स्थिते तद्द्वारैव वेद्यायाश्चानुभावकत्वं संभवतीति सानपेक्षत्वप्रमाणं ॥ अथवा स्मारयन्तु वेद्यायदा
१२८ र्थानेव मन्तु शब्दात् । तथापि चेद्यानप्रमाणं नु घोंगुलीकारो यात्रां करिष्यसीत्यादिकाकृत्यत्व विनीप्रयो
जिकाभिप्रायं स्मारयती प्रमानमेव न संबन्धेषु लो यात्रां करिष्यसीत्यत्र संबन्धेघु निवर्तता । तत्त्वत्व विनीयुतुका
129 रकेषु प्रातिपदिकार्थप्रधाना क्रियाख्यानवचनादिस्वरूपप्रधाना तथा च गौन पुनु मद्रत्यादि पदै रिवस्व
तंत्रेषु पदार्थेषु स्मारितेषु परस्परमन्वयायोगः ॥ प्रातिपदिकार्थे कर्मत्वादेरन्वयनादि प्रतीतानागतवर्त्त
मानत्वद्याद्वयप्रकारस्यानुपस्थितेः ॥ पदैकदेशावच्छेद्यैकदेशविशेषणात् प्रकरणादि विशेषणाप्रकर्मत्वा ५
दिवर्त्तमानस्मृतिनियम इति चेत् ॥ नाकर्मत्वाद्युपस्थापकचेष्टैकदेशाभावाभावात् प्रकरणादयस्तु ।
विषयविशेषेण शब्दान्नियमयंति । नत्वन्वयप्रकारकर्मत्वादौ कालविशेषे वा प्रवर्त्तयति ॥ अन्यथा गो
रस्व इत्यादावपि प्रकरणादिभिः कर्मत्वाद्युद्दीपविवक्षितार्थावसायः स्यात् ॥ न हि चेष्टाकलापे प्र
करणादयः कारकविशेषाणां तेषु मलं न तु पदैकदेशे इत्यस्ति नियमः । तथा च कालसम्बन्धो कर्मत्वादि प्रा
तिपदिकविभक्त्यादि समभिव्याहारादेव यथोपपत्तेः ॥ कथं तर्हि ततोन्वयव्यवहारः । संसर्गप्रतिभयोरन्य ००
तरस्मात् ॥ ॥ स्मारितशब्दानामपि कर्मत्वाद्यन्वयप्रकारोपस्थापकविभक्त्यादेरभावात् कथमन्व

श॰ख॰ यद्वोधकत्वमिति चेत्॥ मैवं नाविभक्त्यादिमत्तामेव सद्रूपतां स्मरणात्॥ शाब्दमात्रे तात्पर्यसंकेतग्रहात्॥ न त्वेवं तत्पदभ्रंशात्कथं प्रव
साधुधीजनकत्वा — — त्मकोक्तेऽस्त्वापकविभक्त्यादेरभावात्सु॥ न च साधुत्वस्मरणादिति रिति वाच्यं॥ साधुशब्दस्य कथाव
९२ ग्रहणमात्रस्य प्रत्ययात् साधुपदमात्रस्मारणात्॥ क्रमेणापकर्षापकविभक्त्यादेरभावाद्वा॥ न त्वसाधुत्वासस्म
रणाच्चेति चेत्॥ नायथाहि पदार्थस्यैक्यत्वेन ज्ञातादपभ्रंशादुपस्थितिः॥ तथा विभक्त्यर्थकर्मत्वादिशक्तेन ज्ञातादप
१३० भ्रंशैकदेशान्तत्वच एवच्छिन्नात्कर्मत्वाद्युपस्थितिः अथ साधुशब्दे अन्वयप्रकारविभक्त्यादेः सहकारित्वं तन्नु वे
—गां किंतु तात्पर्यग्रहमात्रं सहकारीति चेत्॥ नासमयाधीनवृत्तिकनप्रमात्रं प्रति तत्सहकारित्वात्॥ तद्विशे
षस्य शाब्दस्य गुरुत्वादिति न चैवं प्रमाणान्तरं स्मिण एते एवासौ न तत्त्वं न शाब्दं भूयं वीतं भूतं॥ अर्थापत्त्य
नुपलब्ध्योर्यथायथं तद्भावः प्रागेव चिंतितः॥ ॥सिद्धं चत्वारि प्रमाणानीत्युपरमरत्ने॥ ॥ध्वीतः कुशाग्र
मतयो भवतः प्रणम्य मौली विधायकरवारितुदेसमीहे॥ वाणीयमर्थरहितापि विशंखलापि स्वानुग्रहे ११०
ण हृदये विलोकनीया॥ ॥८१॥ ॥इति महामहोपाध्यायश्रीमद्गंगेश्वरविरचिते तत्त्वचिंतामणौ शब्दखं
डः समाप्तिमगमत्॥ ॥संवत् १८०८ ॥

नं॰ १३९४

न्याय ३५००

पत्रे॰ ११७